माध्यमिककक्षायाः पाठ्यक्रमः

# भारतीयदर्शनम् - २४७

## पुस्तकम् - २

विद्याधनम् सर्वधनं प्रधानम्

**राष्ट्रीय-मुक्त-विद्यालयी-शिक्षा-संस्थानम्**

ए-२४-२५, संस्थागतक्षेत्रम् , विभागः - ६२

नोएडा - २०१ ३०९ (उत्तरप्रदेशः)

जालपुटकूटम् - www.nios.ac.in निर्मूल्यः दूरभाषः - १८००१८०९३९३

**National Institute of Open Schooling**
A-२४-२५, Institutional Area, Sector – ६२
NOIDA – २०१ ३०९ (UP)

©राष्ट्रीय-मुक्त-विद्यालयी-शिक्षा-संस्थानम्   National Institute of Open Schooling

प्रथमसंस्करणम् २०१७   First Edition २०१७ (Copies )

ISBN (Book १)

ISBN (Book २)

सचिवः, राष्ट्रीय-मुक्त-विद्यालयी-शिक्षा-संस्थानम्, ए-२४-२५, संस्थागतक्षेत्रम् , विभागः - ६२, नोएडा - २०१ ३०९ (उत्तरप्रदेशः) द्वारा प्रकाशितम्। ...............द्वारा मुद्रितम्।

# माध्यमिककक्षा - भारतीयदर्शनम् (२४७)

## मन्त्रणामण्डलम्

**आचार्यः चन्द्र-भूषण-शर्मा**
अध्यक्षः
राष्ट्रीय-मुक्त-विद्यालयी-शिक्षा-संस्थानम्
नोएडा, उत्तरप्रदेशः - २०१ ३०९

**श्री संजय-कुमार-सिन्हा**
निदेशकः (शैक्षिक)
रा.मु.वि.शि.संस्थानम्
नोएडा, उत्तरप्रदेशः - २०१ ३०९

**डॉ. सन्ध्या-कुमारः**
उपनिदेशकः (शैक्षिक)
रा.मु.वि.शि.संस्थानम्
नोएडा, उत्तरप्रदेशः - २०१ ३०९

## पाठ्यविषय-निर्मिति-समितिः

**समितेः अध्यक्षः**
**स्वामी आत्मप्रियानन्दः**
कुलपतिः
रामकृष्ण-मिशन-विवेकानन्द-विश्वविद्यालयः
बेलुड-मठः, हावडा - ७११ २०२ (प.वङ्गम्)

**समितेः उपाध्यक्षः**
**डॉ. नागराजभट्टः**
सहायकप्राध्यापकः (संस्कृताध्ययनविभागः)
रामकृष्ण-मिशन-विवेकानन्द-विश्वविद्यालयः
बेलुड-मठः, हावडा - ७११ २०२ (प.वङ्गम्)

**डॉ. रामनाथझा**
आचार्यः (संस्कृताध्यनविशेषकेन्द्रम्)
जवाहरलाल-नेहरू-विश्वविद्यालयः, नवदेहली

**आचार्यः फूलचन्दः**
वैदिकगुरुकुलम्, पतञ्जलि-योगपीठम्, हरिद्वारम् (उत्तराखण्डः)

**डॉ. वेंकटरमणभट्टः**
सहायकप्राध्यापकः (संस्कृताध्ययनविभागः)
रामकृष्ण-मिशन-विवेकानन्द-विश्वविद्यालयः
बेलुड-मठः, हावडा - ७११ २०२ (प.वङ्गम्)

**श्रीमान् विवेक-कर्मकारः**
सहायकाध्यापकः (संस्कृतविभागः)
स्कटिश्-चर्च-महाविद्यालयः
कोलकाता - ७००००६ (प.वङ्गम्)

**श्रीमान् पलाश-घोडइः**
सहायकप्राध्यापकः (संस्कृतविभागः)
राजा-नरेन्द्र-लाल-खान-महिला-महाविद्यालयः
मण्डलम् - पश्चिममेदिनीपुरम् - ७२११०२ (प.वङ्गम्)

**श्रीमान् सन्तुकुमारपानः**
सहायकप्राध्यापकः (संस्कृतविभागः)
विजयनारायण-महाविद्यालयः
इटाचुना, हुगली - ७१२१४७ (प.वङ्गम्)

**स्वामी वेदतत्त्वानन्दः**
प्राचार्यः
रामकृष्ण-मठ-विवेकानन्द-वेद-विद्यालयः
बेलुड-मठः, मण्डलम् - हावडा - ७११ २०२ (प.वङ्गम्)

**डॉ. राम-नारायण-मीणा**
सहायक-निदेशकः (शैक्षिक)
राष्ट्रीय-मुक्त-विद्यालयी-शिक्षा-संस्थानम् , नोएडा- २०१ ३०९

## पाठ्यक्रम-समन्वयकः

**डॉ. राम-नारायण-मीणा**
सहायक-निदेशकः (शैक्षिक)
राष्ट्रीय-मुक्त-विद्यालयी-शिक्षा-संस्थानम् , नोएडा, उत्तरप्रदेशः - २०१ ३०९

# पाठ्यविषयसामग्री-निर्मिति-समितिः

## संपादकमण्डलम्

**डॉ. नागराजभट्टः**
सहायकप्राध्यापकः (संस्कृताध्ययनविभागः)
रामकृष्ण-मिशन-विवेकानन्द-विश्वविद्यालयः
बेलुड-मठः, हावडा - ७११ २०२ (प.वङ्गम्)

**स्वामी वेदतत्त्वानन्दः**
प्राचार्यः
रामकृष्ण-मठ-विवेकानन्द-वेद-विद्यालयः
बेलुड-मठः, मण्डलम् - हावडा - ७११ २०२ (प.वङ्गम्)

## पाठलेखकाः

**(पाठः १-४)**
**स्वामी वेदतत्त्वानन्दः**
प्राचार्यः
रामकृष्ण-मठ-विवेकानन्द-वेद-विद्यालयः
बेलुड-मठः, मण्डलम् - हावडा - ७११ २०२ (प.वङ्गम्)

**(पाठः ५-६, १५-२२)**
**डॉ. नागराजभट्टः**
सहायकप्राध्यापकः (संस्कृताध्ययनविभागः)
रामकृष्ण-मिशन-विवेकानन्द-विश्वविद्यालयः
बेलुड-मठः, हावडा - ७११ २०२ (प.वङ्गम्)

**(पाठः ७-९)**
**श्रीमान् सन्तुकुमारपानः**
सहायकप्राध्यापकः (संस्कृतविभागः)
विजयनारायण-महाविद्यालयः
पत्रालयः - इटाचुना, हुगली - ७१२१४७ (प.वङ्गम्)

**(पाठः १०-११)**
**श्रीमान् खोकन-भट्टाचार्यः**
सहायकप्राध्यापकः (संस्कृतविभागः)
श्रीगोपालब्यानार्जिमहाविद्यालयः
बागाटी, मगरा, हुगली - ७२११४८, पश्चिमवङ्गम्

**(पाठः १२, १३)**
**श्रीमान् विवेक-कर्मकारः**
सहायकाध्यापकः (संस्कृतविभागः)
स्कटिश्-चर्च-महाविद्यालयः
कोलकाता - ७००००६ (प.वङ्गम्)

**(पाठः १४)**
**श्रीमान् पलाश-घोडइः**
सहायकप्राध्यापकः (संस्कृतविभागः)
राजा-नरेन्द्र-लाल-खान-महिला-महाविद्यालयः
मण्डलम् - पश्चिममेदिनीपुरम् - ७२११०२ (प.वङ्गम्)

**(पाठः २३-२५)**
**स्वामी वेदार्थानन्दः**
अनुसन्धाता (संस्कृताध्ययनविभागः)
रामकृष्ण-मिशन-विवेकानन्द-विश्वविद्यालयः
मण्डलम् - हावडा - ७११ २०२ (प.वङ्गम्)

## रेखाचित्राङ्कनं मुखपृष्ठचित्रणं च

**स्वामी हररूपानन्दः**
रामकृष्ण-मिशन् ,बेलुड-मठः
मण्डलम् - हावडा - ७११ २०२ (प.वङ्गम्)

## अध्यक्षीयः सन्देशः

प्रिय विद्यार्थिन्

'भारतीयज्ञानपरम्परा' इति पाठ्यक्रमस्य अध्ययनाय अध्येत्रे हार्दं स्वागतं व्याह्रियते।

भारतम् अति प्राचीनम् अति विशालं च। भारतस्य वाङ्मयमपि तथैव प्राचीनं प्रशस्यतरं सुमहत् च। सृष्टिकर्ता भगवान् एव भारतीयानां सकलविद्यानाम् उत्स इति सिद्धान्तः शास्त्रेषु। भारतस्य सुज्ञाते अल्पज्ञाते अज्ञाते च इतिहासे वाग्विनिमयस्य माध्यमं संस्कृतमिति सुविदितं समेषाम्। प्रदीर्घे अस्मिन् भारतेतिहासे यानि शास्त्राणि समुद्भूतानि, यत् चिन्तनं प्रावर्तत, ये भावाः प्रकटिताः तत्सर्वमपि संस्कृतभाषाभाण्डारे निबद्धमस्ति। अस्य भाण्डारस्य आकारः कियान्, तलः कियान् गभीरः, मूल्यं कियद् अधिकम् इति निर्धारणे न कोऽपि समर्थः। पुरा किं किं पठन्ति स्म भारतीया इति एकेन श्लोकेन कथञ्चित् संक्षिप्य प्रकट्यते -

**अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।**
**पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश।। (वायुपुराणम् ६१.७८)**

अस्मिन् श्लोके चतुर्दश विद्यास्थानानि कथ्यन्ते। चत्वारो वेदाः (उपवेदाः च) षड् वेदाङ्गानि मीमांसा (पूर्वोत्तरमीमांसे) न्यायः (आन्वीक्षिकी) पुराणम् (अष्टादश मुख्यानि पुराणानि, उपपुराणानि च) धर्मशास्त्रम् (स्मृतिः) इति चतुर्दश विद्यास्थानानि कथ्यन्ते। इतोऽपि काव्यादीनि बहूनि शास्त्राणि सन्ति। एतासां विद्यानाम् उत्सः प्रवाहः प्रदानं प्रगतिः प्रवृद्धिः च महता कालेन जाता। समाजस्य कल्याणाय भारतस्य पाठदानपरम्परायां गुरुकुलेषु आध्यात्मिका मनोवैज्ञानिका शरीरारोग्यविषया राजनीतिः दण्डनीतिः काव्यानि काव्यशास्त्राणि अन्यानि च बहूनि शास्त्राणि पाठ्यन्ते पठ्यन्ते स्म।

एतासाम् विद्यानां शिक्षणाय बटुः पितृगृहं त्यक्त्वा गुरुकुलेषु ब्रह्मचर्याश्रमं यापयति स्म। एतासु निष्पाणो भवति स्म। एतासु विद्यासु निष्णाता जना अद्यापि केचित् सन्ति। नैसर्गिकपरिवर्तनानि परदेशीयानि आक्रमणानि स्वदेशीया विप्लवाः इत्यादिभिः बहुभिः कारणैः एता विद्या यथापूर्वं न पाठ्यन्ते भारते। अपिच ये केऽपि पठन्ति तेषां पाठ्यक्रमः परीक्षा प्रमाणपत्रम् इत्यादिकम् आधुनिकशिक्षणपद्धत्या क्वचित् राज्येषु भवति, बहुत्र नैव भवति। अतः एतेषां प्राचीनशास्त्राणाम् अध्ययनं परीक्षणं प्रमाणीकरणं च भवतु इति धिया अयं पाठ्यक्रमः राष्ट्रियमुक्तविद्यालयीशिक्षासंस्थानेन प्रारब्धः। जनहिताकारि यद् यावद् यथा च ज्ञानं एतेषु शास्त्रेषु निहितं निभृतम् चास्ति तद् जनानां पुरस्तात् प्रकटितं भवतु इति लक्ष्यम्। तेन सर्वेऽत्र सुखिनः सन्तु, सर्वे सन्तु निरामयाः, सर्वे भद्रदृष्टिसम्पना भूत्वा भद्राणि पश्यन्तु, मा कश्चिद् दुःखम् आप्नुयात्, मा कश्चिद् दुःखदाने प्रवर्तेत इति अत्यन्तम् उदारम् उद्देश्यम् 'भारतीयज्ञानपरम्परा' इति नामकस्य अस्य पाठ्यक्रमस्य प्रकल्पने वर्तते। विज्ञानं शरीरारोग्यं चिन्तयति। कलाविषया मनोविज्ञानम् आध्यात्मिकविज्ञानं मनोरञ्जनं च चिन्तयन्ति। विज्ञानं साधनस्वरूपं सुखोपभोगः साध्यं चास्ति। अतः विज्ञानादपि कलाशाखायाः श्रेष्ठत्वं निःसन्देहमस्ति। जनः कलाम् उपयुज्य विज्ञानात् सुखम् नाप्नोति। अपि तु विज्ञानम् उपयुज्य कलातः सुखमाप्नोति। नात्र व्यतिक्रमः परिलक्ष्यते।

अयं भारतीयदर्शनस्य पाठ्यक्रमः छात्रानुकूलो ज्ञानवर्धको लक्ष्यसाधकः पुरुषार्थसाधकश्च अस्ति इति विश्वसिमि।

अस्य पाठ्यक्रमस्य निर्माणे ये हिताभिलाषिणो विद्वांसः उपदेष्टारः पाठलेखकाः त्रुटिसंशोधकाः टङ्कायोजकाः च साक्षात् परोक्षरूपेण वा साहाय्यं कृतवन्तः, तेभ्यः संस्थानपक्षतो हार्दिकं कार्तज्ञ्यं व्याह्रियते। रामकृष्णमिशन्-विवेकानन्द-विश्वविद्यालयस्य कुलपतिवर्याः श्रीमन्तः स्वामिन आत्मप्रियानन्दाः विशेषतो धन्यवादार्हा येषाम् आनुकूल्यं प्रेरणां च विना कार्यस्यास्य परिसमाप्तिः दुष्करा एव।

अस्य पाठ्यक्रमस्य अध्येतारो धन्या भवन्तु, सफला भवन्तु, विद्वांसो भवन्तु, सज्जना भवन्तु, देशभक्ता भवन्तु, समाजसेवका भवन्तु इति अति हार्दा सदिच्छा अस्माकम्।

डॉ. चन्द्रभूषणशर्मा
अध्यक्षः
राष्ट्रीय-मुक्त-विद्यालयी-शिक्षा-संस्थानम्

## निदेशकीया वाक्

प्रिय अध्येतः

'भारतीयज्ञानपरम्परा' इति पाठ्यक्रमं पठितुम् उत्साहिभ्यो भारतीयज्ञानपरम्पराया अनुरागिभ्य उपासकेभ्यश्च हार्दिकं स्वागतं विज्ञाप्यते। परमहर्षविषयः अयं यद् गुरुकुलेषु अधीयाना विषया अस्माकं राष्ट्रीय-मुक्त-विद्यालयी-शिक्षा-संस्थानस्य पाठ्यक्रमेऽपि समाविष्टा भवन्ति। आ बहोः कालाद् विद्यमानः अन्तरायो दूरीभवेदिति आशासे। हिन्दुजैनबौद्धानां धर्मिकम् आध्यात्मिकं काव्यादिकं च वाङ्मयं प्रायः सर्वमपि संस्कृते निबद्धमस्ति। एतेषां शतस्य कोटीनां मनुजानां प्रियाणाम् विषयाणाम् भूमिकायै प्रस्तुत्यै प्रवेशयोग्यतायै प्ररोचनायै च माध्यमिकस्तरे उच्चमाध्यमिकस्तरे च केचिद् विषयाः पाठ्यत्वेन योज्यन्ते। यथा आंग्ल-हिन्द्यादिभाषाज्ञानं विना तत्तद्भाषया लिखिता माध्यमिकस्तरीया ग्रन्थाः पठितुं बोद्धुं च न शक्यन्ते तद्वत् अत्रापि प्रारम्भिकं संस्कृतं न जानाति चेत् इमं पाठ्यक्रमं बोद्धुं न पारयेत्। अतः प्रारम्भिकं संस्कृतं विद्वान् छात्रः अत्र अस्य पाठ्यक्रमस्य अध्ययने अधिकारित्वेन इति गण्यते।

गुरुकुलेषु अधीयानाः छात्रा अष्टमकक्षां यावत् कामं स्वपरम्परानुसारम् अध्ययनं करोतु। नवमदशमकक्षयोः तु एकादशद्वादशकक्षयोः च भारतीयज्ञानपरम्परा इति पाठ्यक्रमस्य निष्ठया नियमितम् अध्ययनं करोतु। अस्य पाठ्यक्रमस्य अध्येता उच्चशिक्षायै योग्यो भविष्यति।

संस्कृतस्य विभिन्नेषु शास्त्रेषु कृतभूरिपरिश्रमाः विद्वांसः प्राध्यापकाः शिक्षकाः शिक्षाविदः च अस्य पाठ्यक्रमस्य प्रारूपरचनायाम् विषयनिर्धारणे विषयपरिमाणनिर्धारणे विषयप्रकटनभाषास्तरनिर्णये विषयपाठलेखने च संलग्नाः। अतः अस्य पाठ्यक्रमस्य स्तरः उन्नत एव इति किम् उ वक्तव्यम्।

भारतीयदर्शनस्य एषा स्वाध्यायसामग्री भवतां कृते पर्याप्ता सुबोधा रुचिरा आनन्दरसस्यन्दिनी सौभाग्यदायिनी धर्मार्थकाममोक्षोपयोगिनी च स्यादिति आशास्महे। अस्य पाठ्यक्रमस्य प्रधानं लक्ष्यं यद् भारतीयज्ञानपरम्परायाः शैक्षणिकक्षेत्रेषु विशिष्टं योग्यं च स्थानं स्वीकृतिः गवेषणा च स्यादिति। तल्लक्ष्यम् पाठ्यक्रमेणानेन सेत्स्यति इति दृढविश्वासिनो वयम्।

अध्येता अध्ययनकाले यदि मन्येत यद् अस्मिन् अध्ययनसम्भारे पाठनिचये यत्र संशोधनं परिवर्तनं परिवर्धनं संस्कारः च अपेक्ष्यन्ते, तेषां समेषां प्रस्तावानां वयं स्वागतं कर्तुं सिद्धाः स्मः। अमुं पाठ्यक्रमम् इतोऽपि अधिकम् प्रभाविनम् उपयोगिनं सरलं च विधातुं भवद्भिः सह वयं सदा प्रयत्नपरा एव।

अध्येतॄणां समेषामपि अध्ययने साफल्याय जीवने च साफल्याय कृतकृत्यायै च आशीर्वचः अस्माकम्।

किं बाहुना विस्तरेण। अस्माकं गौरववाणीं जगति विरलाम् सर्वविद्याया लक्ष्यभूताम् एव उद्धरामि -

**सर्वेऽत्र सुखिनः सन्तु सर्वे सन्तु निरामयाः।**
**सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग् भवेत्।।**
**दुर्जनः सज्जनो भूयात् सज्जनः शान्तिमाप्नुयात्।**
**शान्तो मुच्येत बन्धेभ्यो मुक्तश्चान्यान् विमोचयेत्।।**
**स्वस्त्यस्तु विश्वस्य खलः प्रसीदतां ध्यायन्तु भूतानि शिवं मिथो धिया।**
**मनश्च भद्रं भजतादधोक्षजे आवेश्यतां नो मतिरप्यहैतुकी।।**

श्री संजय-कुमार-सिन्हा
निदेशकः (शैक्षिकम्)
राष्ट्रीय-मुक्त-विद्यालयी-शिक्षा-संस्थानम्

## समन्वयकीयानि वचांसि

प्रिय जिज्ञासो

**ॐ सह नाववतु। सह नौ भुनक्तु। सह वीर्यं करवावहै। तेजस्विनावधीतमस्तु। मा विद्विषावहै॥ ॐ शान्तिः शान्तिः शान्तिः॥**

परम्पराम् अवलम्ब्य इयं प्रार्थना यद् अस्माकम् अध्ययनं विघ्नरहितं भवतु। अज्ञाननाशकं तेजस्वि भवतु। विद्वेषभावनानाशकं भवतु। विद्यालाभेन सर्वविधतापानां शान्तिः भवतु इति।

भारतीयज्ञानपरम्परा इति पाठ्यक्रमस्य अङ्गभूतोऽयं पाठ्यविषयः। अस्य माध्यमिककक्षायाः कृते निर्धारणमस्ति। एतत्पाठ्यक्रमस्य पाठनिचयात्मिकाम् इमाम् अध्ययनसामग्रीम् भवते ददद् अहं परमं हर्षम् अनुभवामि। सरलं संस्कृतं जानन् यः कोऽपि अस्य अध्ययने समर्थो गण्यते।

भारतीयदर्शनस्य प्रपञ्चः अति महान्। बहूनि दर्शनानि च सन्ति। मुख्यानां दर्शनानां संक्षेपेण परिचयः अस्मिन् पाठ्यकमे दीयते। तथापि कस्यापि एकस्य दर्शनं प्रक्रियापुरःसरम् अध्ययनं क्रमशः कर्तव्यम्। ततः अन्येषु अपि व्युत्पत्तिमान् भवति छात्रः इति विषयं मनसि निधाय अद्वैतवेदान्तदर्शनस्य विशिष्य परिचयः अस्मिन् पाठ्यविषये वर्तते।

माध्यमिककक्षायां प्रदत्तोऽयं भारतीयदर्शनम् इति विषयः अपि अत्यन्तम् उपकारकः वर्तते। छात्रः तस्य अध्ययनेन ज्ञानपीनः भविष्यति। उच्चतरमाध्यमिककक्षाया भारतीयदर्शनम् इति विषयस्य अध्ययनायापि अस्य अत्यन्तम् उपयोगिता वर्तते। एतत्सामग्री अद्वैतवेदान्तस्य सश्रद्धम् अध्ययने प्रवेशाय प्ररोचनाय च। अनया आकरग्रन्था न गतार्था न वा हेयाः अपि तु गभीरतया अध्येयाः।

समग्रोऽपि पाठ्यविषयः द्वयोः पुस्तकयोः कल्पितोऽस्ति। अस्य अध्ययनेन भारतीयदर्शनानां सामान्यपरिचयः अद्वैतवेदान्तस्य च मूलभूतं ज्ञानं छात्रस्य भवेत्।

अध्येता पाठान् सम्यक् पठित्वा पाठगतानां प्रश्नानाम् उत्तराणि स्वयं विचार्य अन्ते प्रदत्तानाम् उत्तराणां दर्शनं कुर्यात्, तैः उत्तरैः स्वस्य उत्तरं च मेलयेद्। प्रतिपत्रं प्रदत्ते रिक्तभागे स्वस्य टिप्पणीं रचयेद्। पाठान्ते प्रदत्तानाम् उत्तराणि निर्माय परीक्षायै सन्नद्धो भवतु।

अध्ययनसम्भारे क्वापि काठिन्यम् अनुभूयते चेत् अध्ययनकेन्द्रं यथाकालं गत्वा समस्यासमाधानाय आचार्यं पश्यतु। राष्ट्रियमुक्तविद्यालयीशिक्षासंस्थानेन सह ई-पत्रद्वारा सम्पर्कं वा करोतु। जालपुटे अपि संपर्कव्यवस्था वर्तत एव। जालपुटकुटः www.nios.ac.in इति अस्ति।

पाठ्यविषयोऽयं भवतः ज्ञानं वर्धयतात् , परीक्षासु साफल्यम् आवहतात् , रुचिं वर्धयतात् , मनोरथान् पूरयतात् इति कामये।

अज्ञानान्धकारस्य नाशाय ज्ञानज्योतिषः दर्शनाय च इयं मे हार्दिकी प्रार्थना -

**ॐ असतो मा सद् गमय। तमसो मा ज्योतिर्गमय। मृत्योर्मामृतं गमय॥ ॐ शान्तिः शान्तिः शान्तिः॥**

भवत्कल्याणकामी

राम-नारायण-मीणा
पाठ्यक्रमसमन्वयकः (शैक्षिकम्)
राष्ट्रीय-मुक्त-विद्यालयी-शिक्षा-संस्थानम्

## पुस्तकम्- १

### दर्शनविद्याप्रस्थानपरिचयः

१. दर्शनस्य सामान्यपरिचयः
२. भारतीयविद्याविभागः
३. भारतीयविद्यापरिचयः-१
४. भारतीयविद्वापरिचयः-२
५. प्रस्थानत्रये श्रुतिप्रस्थानम्
६. प्रस्थानत्रये स्मृतिन्यायप्रस्थाने

### नास्तिकदर्शनानि

७. चार्वाकदर्शनम्
८. बौद्धदर्शनम्
९. आर्हतदर्शनम्

### आस्तिकदर्शनानि

१०. न्यायदर्शनम्
११. वैशेषिकदर्शनम्
१२. सांख्यदर्शनम्
१३. योगदर्शनम्
१४. मीमांसादर्शनम्
१५. वेदान्तदर्शनम्-१
१६. वेदान्तदर्शनम्-२

## पुस्तकम्- २

### अद्वैतवेदान्तः

१७. अनुबन्धचतुष्टयम्
१८. निर्गुणं ब्रह्म
१९. सगुणं ब्रह्म
२०. अज्ञानम्
२१. जीवः
२२. अध्यारोपापवादौ
२३. बहिरङ्गसाधनम्
२४. अन्तरङ्गसाधनम्
२५. मोक्षः

# भारतीयदर्शनम्

# माध्यमिककक्षा

## द्वितीयं पर्व


| क्रमः | विषयसूची | पृष्ठसंख्या |
|---|---|---|
| | **अद्वैतवेदान्तः** | |
| १७. | अनुबन्धचतुष्टयम् | १ |
| १८. | निर्गुणं ब्रह्म | २० |
| १९. | सगुणं ब्रह्म | ३१ |
| २०. | अज्ञानम् | ४३ |
| २१ | जीवः | ५९ |
| २२. | अध्यारोपापवादौ | ७४ |
| २३. | बहिरङ्गसाधनम् | ९१ |
| २४. | अन्तरङ्गसाधनम् | ११३ |
| २५. | मोक्षः | १३० |
| | पाठ्यक्रमस्य विवरणम् | |
| | प्रश्नपत्रस्य प्रारूपम् | |
| | प्रश्नपत्रप्रतिमा | |
| | प्रश्नपत्रप्रतिमाया उत्तरमाला | |

# १७

# अनुबन्धचतुष्टयम्

## प्रस्तावना -

कस्मिंश्चित् शास्त्रे प्रवेशात् प्राक् तस्य शास्त्रस्य विषये सम्यक् ज्ञानम् आवश्यकं भवति। ग्रन्थस्य विषयप्रयोजनादिनिरूपणाय अनुबन्धचतुष्टयं ग्रन्थादौ निरूप्यते। ग्रन्थस्य प्रारम्भे यथा आस्तिकाः मङ्गलाचरणं नियततया आचरन्ति तथैव अनुबन्धानाम् अपि उल्लेखः कर्तव्यः। अनुबन्धैः इदं ज्ञायते यत् शास्त्रम् इदं पाठकस्य उपयुक्तं न वा। शास्त्रस्य कः विषयः। शास्त्रेण सह विषयस्य कः सम्बन्धः। अस्य शास्त्रस्याध्ययनेन कः लाभः भवतीति। वस्तुतः अनुबन्धाः वाचकाः भवन्ति। शास्त्रभेदेन अनुबन्धस्य वाच्याः अपि भिद्यन्ते। अस्मिन् पाठे वेदान्तशास्त्रस्य अनुबन्धाः विचार्यन्ते।

## उद्देश्यानि -

इदं पाठं पठित्वा भवान् -

- अनुबन्धचतुष्टयं किं भवति इति ज्ञास्यति।
- वेदान्तस्य अनुबन्धचतुष्टयं किमति ज्ञास्यति।
- वेदान्तस्य कः अधिकारी इति जानीयात्।
- वेदान्तस्य विषयम् अवगच्छेत्।
- वेदान्तस्य प्रयोजनं बुध्यात्।
- वेदान्तोक्तप्रयोजनलाभाय अधिकारसम्पादनपरो भवेत्।
- मनुष्यजीवनस्य लक्ष्यं स्पष्टीभविष्यति।
- वेदान्तस्य व्यावहारिकताम् अवगम्य जीवनं यापयितुं क्षमो भविष्यति।
- वेदान्तस्य प्रौढग्रन्थेषु रुचिमान् भूत्वा उच्चतरतत्त्वानेषणे प्रवर्तेत।

## १७.१ आलोचितविषयः

शास्त्रेषु प्रवेशात् प्राक् अस्माकम् मनसि केचन प्रश्नाः स्वतः एव जागरिताः भवन्ति -

१. एतत् शास्त्रं कः पठितुं शक्नोति, अर्थात् अस्य शास्त्रस्य अधिकारी कः ?
२. अस्मिन् शास्त्रे कं विषयम् अधिकृत्य आलोचितम् अस्ति।
३. अत्र लिखितेन विषयेण सह पुस्तकस्य कः सम्बन्धः अथवा पाठकेन सह विषयस्य कः

सम्बन्धः?

४. अस्य शास्त्रस्य किं प्रयोजनम् ?

- एतेषां प्रश्नानामुत्तरलाभाय अनुबन्धाः उपस्थाप्यन्ते। अधिकारी, विषयः, सम्बन्धः, प्रयोजनम् - इति चत्वारः अनुबन्धाः। त एव अनुबन्धचतुष्टम् इति उच्यते। "अनु स्वज्ञानात् अनन्तरं बध्नन्ति शास्त्रे ग्रन्थे वा आसज्जयन्ति प्रवर्तयन्ति ये ते अनुबन्धाः" इति अनुबन्धशब्दस्य व्युत्पत्तिः। अतः अनुबन्धानां ज्ञानात् अनन्तरम् एव कस्मिंश्चित् शास्त्रे पुरुषस्य प्रवृत्तिः सम्भवति। यदि शास्त्रादौ अनुबन्धानाम् उल्लेखः न भवति तर्हि शास्त्राध्ययने प्रवृत्तिः न जायते। तस्मात् कुमारिलभट्टेन श्लोकवार्तिके उक्तम् -

**"ज्ञातार्थं ज्ञातसम्बन्धं श्रोतुं श्रोता प्रवर्तते।**
**ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः।।" इति।** (१/१/१७)

श्रोता ज्ञाता अर्थं सम्बन्धं च ज्ञात्वा शास्त्रे प्रवर्तते। अतः शास्त्रस्य आदौ सम्बन्धादीनाम् उल्लेखः आवश्यकः इति श्लोकार्थः।

इदानीं प्रश्नः सम्भवति यत् अधिकारि-विषय-सम्बन्ध-प्रयोजनानाम् अनुबन्धानां क्रमेण उपस्थितौ कोऽपि नियमः अस्ति न वा। उच्यते - शास्त्रस्य ज्ञातारं विना शास्त्रे प्रवृत्तिः नैव सम्भवति, तस्मात् अधिकारिणः उल्लेखः प्रथमः। यद्यपि अधिकारिणः उपस्थितिः भवति, तथापि विषयज्ञानहीनस्य अधिकारिणः शास्त्रे प्रवृत्तिः असम्भवा भवति। तस्मात् द्वितीयस्य विषयस्य उल्लेखः। विषयेण सह शास्त्रस्य अथवा विषयेण सह पुरुषस्य सम्बन्धज्ञानम् आवश्यकम्। तस्मात् सम्बन्धस्य तृतीये स्थाने उल्लेखः विद्यते। प्रयोजनस्य सर्वदा अन्तिमे अवस्थितिः। तस्मात् तस्य चतुर्थे स्थाने उल्लेखः विद्यते।

षड्विधानि आस्तिकदर्शनानि - न्यायः, वैशेषिकं, सांख्यं, योगः, पूर्वमीमांसा उत्तरमीमांसा च। उत्तरमीमांसा एव वेदान्त इति उच्यते। इदानीं प्रसङ्गात् प्राप्तस्य वेदान्तदर्शनस्य अधिकारि-विषय-सम्बन्ध-प्रयोजनपदवाच्याः के इति प्रकरणग्रन्थान् आश्रित्य विस्तरेण आलोचयामः। अत्र इदम् अवधेयं यत् कस्यापि शास्त्रस्य ये अनुबन्धाः भवन्ति तस्य शास्त्रस्य प्रकरणग्रन्थानाम् अपि ते एव अनुबन्धाः भवन्ति। प्रकरणग्रन्थः इत्यस्य अर्थः कः इति चेत् उच्यते -

**"शास्त्रैकदेशसम्बन्धं शास्त्रकार्यान्तरे स्थितम्।**
**आहुः प्रकरणं नाम ग्रन्थभेदं विपश्चितः।।" इति। (पराशर-उपपुराणम्-१८/२१-२२)**

यः ग्रन्थः शास्त्रस्य एकदेशेन सह सम्बन्धः भवति, तं सम्बन्धयुक्तं विषयम् एव विशेषेण विस्तारयति, तं ग्रन्थं विपश्चितः विद्वांसः प्रकरणम् इति वदन्ति। यथा वेदान्तसारः, विवेकचूडामणिः, पञ्चदशी इत्यादिग्रन्थाः वेदान्तशास्त्रस्य प्रकरणग्रन्थाः।

## पाठगतप्रश्नाः-१

१. के अनुबन्धाः ?



२. अनुबन्धशब्दस्य का व्युत्पत्तिः?
३. कति आस्तिकदर्शनानि?
४. उत्तरमीमांसायाः अपरं नाम किम्?
५. वेदान्तशास्त्रस्य प्रकरणग्रन्थम् एकं वदत।

इदानीं वेदान्तसारम् आश्रित्य अनुबन्धचतुष्टयं विस्तारयामः।

## १७.२ अधिकारी -

वेदान्तसारे अधिकारिणः स्वरूपम् उच्यते -

"अधिकारी तु विधिवदधीतवेदवेदाङ्गत्वेन आपाततः अधिगताखिलवेदार्थः अस्मिन् जन्मनि जन्मान्तरे वा काम्यनिषिद्धवर्जनपुरःसरं नित्यनैमित्तिकप्रायश्चित्तोपासनानुष्ठानेन निर्गतनिखिलकल्मषतया नितान्तनिर्मलस्वान्तः साधनचतुष्टयसम्पन्नः प्रमाता" इति।

प्रमाता तु अधिकारी इति अन्वयः। तुशब्देन वेदान्ताधिकारी अन्यस्मात् अधिकारिणः विशिष्टगुणसम्पन्नः इति उक्तः भवति। प्रमाता एव अधिकारी। अन्यत् सर्वं प्रमातुः विशेषणम्। प्रमाता इति शब्दस्यार्थो हि ज्ञानं लभमानः पुरुषः इति। अस्य लक्षणस्य सरलार्थस्तावत् जन्मनि जन्मान्तरेषु वा विध्यनुसारं शिक्षा कल्पः व्याकरणं छन्दः ज्योतिषं निरुक्तं चेति साङ्गवेदाध्ययनेन संशयविरोधिनिश्चयरूपेण च समग्रं वेदार्थं ज्ञात्वा, काम्यनिषिद्धकर्मणोः च वर्जनं कृत्वा, नित्यकर्मणः नैमित्तिककर्मणः प्रायश्चित्तकर्मणः उपासनारुपकर्मणश्च अनुष्ठानेन चित्तस्य निर्मलतां सम्पाद्य नित्यानित्यवस्तुविवेकम् इहामुत्रफलभोगविरागं शमदमादिषट्कं मुमुक्षुत्वं च यः साधितवान् स एव पुरुषः अत्र अधिकारी। अस्य अधिकारिणः लक्षणविषये बह्वः व्याख्याः सन्ति। अधुना वेदान्तसारस्य विविधव्याख्याम् आश्रित्य अधिकारिलक्षणं सविस्तरं विमृश्यते।

श्रीमदापदेवविरचिता बालबोधिनी इति वेदान्तसारस्य व्याख्या प्रसिद्धा वर्तते। बालबोधिनीकारस्य मते "प्रमातृशब्दः सदाचारप्रयुक्तब्राह्मणादिपरः" इति। अर्थात् वेदाध्ययनादिसदाचारैः युक्तः ब्राह्मणः प्रमाता भवति। परन्तु तथा स्वीकारे स्त्री-शूद्रादीनां येषां वेदाध्ययने अधिकारः नास्ति, तेषां वेदान्तश्रवणे अपि अधिकारस्य निषेधो भवति।

श्रीरामतीर्थयतिविरचिता विद्वन्मनोरञ्जनी इति वेदान्तसारस्य व्याख्या परमप्रमाणभूता वर्तते। विद्वन्मनोरञ्जनीकारस्य मते तु "लौकिकवैदिकव्यवहारेषु अभ्रान्तः जीवः एव प्रमाता" इति। अर्थात् यः पुरुषः ज्ञानसहितं लौकिकं वैदिकं च कर्म सुष्ठु सम्पादयति स प्रमाता भवति। प्रमाता इति शब्देन सर्वेषां जीवानां ग्रहणं न सम्भवति। सर्वे जीवाः सर्वं कार्यं यथायथं सम्पादयितुं न शक्नुवन्ति। यस्य यत्र अधिकारः नास्ति स यदि तत् कार्यं करोति तर्हि प्रमादः भवितुम् अर्हति। प्रमाता इति शब्देन सर्वेषां ग्रहणं भवति चेत् येषां वेदान्ते अधिकारः नास्ति तेषाम् अपि ग्रहणं भवति। परन्तु वेदान्ततत्त्वम् अतिगम्भीरम्। तत्र भ्रमः सम्भवति। शास्त्रस्य अभिप्रायं सर्वे बोद्धुं न शक्नुवन्ति। क्वचित् अन्यथा एव प्रतिपादयन्ति।

अतः वेदान्ते सर्वे जीवाः न प्रमातारः। किन्तु केवलं प्रमाता एव अधिकारी न भवति। इतोऽपि उपयुक्ताः गुणाः तस्मिन् भवन्ति। कीदृशः गुणवान् प्रमाता इति क्रमेण प्रतिपादितः भवति। अधिकारिलक्षणे उक्तं “साधनचतुष्टयसम्पन्नः प्रमाता अधिकारी” इति। चतुर्विधं साधनं विद्यते, तादृशसाधनवान् प्रमाता सः अधिकारी। प्रमाता तदा एव साधनचतुष्टयवान् भवति यदा तस्य अन्तःकरणं नितान्तनिर्मलं भवति। शुद्धसत्त्वाः एव मुक्तिं प्राप्नुवन्ति। अतः एव मुण्डकोपनिषदि श्रूयते **“वेदान्तविज्ञानसुनिश्चितार्थाः सन्न्यासयोगाद्यतयः शुद्धसत्त्वाः। ते ब्रह्मलोकेषु परान्तकाले परामृताः परिमुच्यन्ति सर्वे” [३/२/५]** इति श्रुतिरत्र मानम्। मनः तदा एव निर्मलं भवति यदा निःशेषरूपेण कल्मषाः मनसः निर्गतानि भवन्ति। कल्मषा एव मलः। मलकारणात् एव मनुष्याः नित्यं वस्तु अनित्यं वस्तु च बोद्धुं न शक्नुवन्ति, संसारे बद्धाः भवन्ति, सद्गुणानां विकाशः न भवति। अतः मनसः मलनिष्काशनम् अत्यावश्यकम्। मलनिष्काशनं च सम्भवति काम्यं निषिद्धम् इति द्विविधं कर्म वर्जयित्वा नित्यं नैमित्तिकं प्रायश्चित्तम् च इति त्रिविधकर्मणाम् अनुष्ठानेन। एतादृशं तपः अचरितव्यम्। एतादृशकर्मणा अर्थात्तपसा कल्मषाः दूरीभवन्ति। मनुसंहितायाम् उच्यते “तपसा कल्मषं हन्ति विद्ययामृतमश्नुते”[१२/१०४] इति स्मृतिरत्र मानम्। तैत्तरीयोपनिषद्भाष्येपि भगवत्पादैः शङ्कराचार्यैः निगद्यते “वक्षति -‘तपसा ब्रह्म विजिज्ञासस्व’ (तै.उ.३। २। १) इति । अतो विद्योत्पत्त्यर्थमनुष्ठेयानि कर्माणि । अनुशास्तीत्यनुशासनशब्दादनुशासनातिक्रमे हि दोषोत्पत्तिः । प्रागुपन्यासाच्च कर्मणाम् , केवलब्रह्मविद्यारम्भाच्च पूर्वं कर्माण्युपन्यस्तानि।” इति । श्रीमद्भगवद्गीतायामपि उच्यते “लभन्ते ब्रह्मनिर्वाणमृषयः क्षीणकल्मषाः। छिन्नद्वैधा यतात्मनः सर्वभूतहिते रताः॥”[५/२५] इति।

एतेषाम् आचरणं तदैव सम्भवति यदा प्रमाता ऋक्-साम-यजुरथर्वाणां चतुर्णां वेदानाम् अर्थं सामान्येन जानाति। वेदानाम् अर्थज्ञानं वेदाङ्गैः एव सम्भवति। व्याकरणं, निरुक्तं, ज्योतिषः, शिक्षा, कल्पसूत्रम् छन्दश्शास्त्रं च इति षड् वेदाङ्गानि। षड्विधैः वेदाङ्गैः एव वेदानां सम्यक् अर्थज्ञानं सम्भवति, अन्यथा न भवति। अतः वेदानाम् अर्थस्य परिज्ञानाय विधिपूर्वकं षडङ्गसहितं वेदाध्ययनम् आवश्यकम्। अतः लक्षणे “विधिवदधीतवेदवेदाङ्गत्वेन” इति उक्तम्।

अत्र प्रश्नः भवति यत् वेदेषु एव वेदान्तस्य अन्तर्भावः। यदि वेदाङ्गसहितं विधिम् अनुसृत्य वेदपाठः भवति तर्हि प्रमाता वेदपाठकाले एव वेदान्ततत्त्वं जानाति। तस्मात् पृथक्तया वेदान्तशास्त्रस्य ज्ञानाय योग्यता न अर्जनीया। अस्य प्रश्नस्य समाधानाय लक्षणे “आपाततः” इति पदस्य प्रयोगः। आपाततः इत्यस्य प्राथमिकतया इत्यर्थः। यः प्राथमिकतया वेदार्थं जानाति परन्तु वेदान्ततत्त्वं न जानाति तादृशः प्रमाता अत्र अधिकारी।

अत्र इदं ज्ञातव्यं यत् विधिपूर्वकं वेदाध्ययनम्, वेदार्थज्ञानम्, काम्यनिषिद्धकर्मणोः परित्यागः, नित्यनैमित्तिकप्रायश्चित्तोपासनानाम् अनुष्ठानम् इत्यादिकर्माणि एकस्मिन् जन्मनि एव ते करिष्यन्ति ये पूर्वस्मिन् जन्मनि एतत्सर्वं न कृतवन्तः। परन्तु ये पूर्वजन्मसु एतत्कर्मादिकं साधितवन्तः तेषां कृते एकस्मिन् जन्मनि नित्यादिकर्मणाम् आवश्यकता नास्ति। अत्र प्रश्नः सम्भवति यत् कथं ज्ञातुं शक्नुमः यत् कोऽपि पूर्वस्मिन् जन्मनि नित्यनैमित्तिकादिकर्माणि साधितवान् न वा? तत्रोच्यते, जगति केचन पुरुषाः सन्ति ये न द्विजकुलेषु उत्पन्नाः अपि तु शूद्रकुले उत्पन्नाः, परन्तु तेषां मनः संसारेषु न लग्नं



भवति। तत्र पूर्वजन्मनि सम्पादितेन नित्यादिकर्मणा मनःशुद्धिः एव कारणम्। ते अस्मिन् जन्मनि यद्यपि वेदाध्ययनं वैदिककर्मानुष्ठानं न कृतवन्तः तथापि तद् विनापि वेदान्ते अधिकारिणः भवन्ति। यथा विदुरादयः। अनेके महापुरुषाः एकस्मिन् एव जन्मनि विधिपूर्वकवेदाध्ययनेन नित्यादिकर्मानुष्ठानेन वेदान्ते अधिकारलाभाय यतन्ते। परन्तु साधारणजनाः बहुषु जन्मसु कृतेन तपस्याबलेन अधिकारिणः भवन्ति। भगवान् श्रीकृष्णः गीतायाम् उक्तवान् यत् -

**"प्रयत्नाद्यतमानस्तु योगी संशुद्धिकिल्बिषः।**
**अनेकजन्मसंसिद्धस्ततो याति परां गतिम्।।"इति।(६/४५)**

संशुद्धकिल्बिषः - विनष्टपापः, यस्य सर्वाणि पापानि विनष्टानि तादृशः पुरुषः। प्रयत्नात् - बहु यत्नेन। यतमानः प्रवर्तमानः, कार्ये लग्नः इत्यर्थः, योगी योगवान् पुरुषः, तु, अनेकजन्मसंसिद्धः नानाजन्मसु परिशुद्धः, ततः तस्मात् अनन्तरम्, पराम् प्रकृष्टाम्, गतिं स्थानम्, याति गच्छति प्राप्नोति इति श्लोकार्थः।

अर्थात् यः पुरुषः विधिम् अनुसृत्य शास्त्रोक्तकर्माणि आचरति, तस्य सर्वाणि पापानि विनश्यन्ति। एवं बहुषु जन्मसु क्रमेण शुद्धः भूत्वा मुक्तिरूपां परमां गतिं प्राप्नोति इति भावार्थः।

विद्यारण्यमुनिः पञ्चदश्याम् अपि उक्तवान्-

**"कुर्वते कर्म भोगाय कर्म कर्तुं च भुज्यते।**
**नद्यां कीटा इवावर्तादावर्तान्तरमाशु ते।।**
**व्रजन्तो जन्मनो जन्म लभन्ते नैव निर्वृतिम्।।" इति (१/३०)**

भोगाय सुखदुःखानां भोगाय, कर्म पुण्यानि पापानि च कर्माणि कुर्वते। पुनः कर्म कर्तुं पूर्वकृतस्य कर्मणः फलं भुञ्जते फलस्य भोगं कुर्वन्ति। यथा आवर्ते पतिताः कीटाः आवर्तात् आवर्तान्तरं गच्छन्ति तथैव जीवाः जन्मनः जन्म लभन्ते, ततः मुक्तिः न भवति। एवं बहु जन्मनः परं -

**"सत्कर्मपरिपाकात्ते करुणानिधिनोद्धृताः।**
**प्राप्य तीरतरुच्छायां विश्राम्यन्ति यथासुखम्।।" इति। (१/३१)**

ते कीटाः सत्कर्मपरिपाकात् करुणानिधिना परमकृपालुना केनचित् पुरुषविशेषेण उद्धृताः रक्षिताः जलप्रवाहतीरे तरुच्छायां प्राप्य तत्र यथा विश्राम्यन्ति, तथैव जीवाः संसारावर्ते बहु जन्म यापयित्वा सत्कर्मपरिपाकात् करुणानिधिना परमकृपालुना गुरुणा उद्धृताः सन्तः रक्षिताः भवन्ति। अतः आत्मनः शुद्ध्यर्थं बहु जन्म आवश्यकम् इति प्रमाणितम्। तस्मात् लक्षणे "अस्मिन् जन्मनि जन्मान्तरे वा" इति उक्तम्। एवम् अधिकारिलक्षणं सामान्यरूपेण प्रदर्शितम्। इदानीं तस्य विस्तारः आवश्यकः।

एतत् सिद्धं यत् विधिवत् वेदाङ्गसहितं वेदाध्ययनं कर्तव्यं, तत् एकस्मिन् एव जन्मनि अथवा बहुषु जन्मसु भवतु। विधिवत् अध्ययनम् इत्यस्य अर्थः त्रैवर्णिकानां ब्राह्मण-क्षत्रिय-वैश्यानाम् उपनयनसंस्कारः कर्तव्यः। ततः गुरुगृहं गन्तव्यम्। तत्र स्थित्वा ब्रह्मचर्यं पालयित्वा वेदाङ्गैः सहितं वेदानाम् अध्ययनम् एव विधिवत् अध्ययनम्। वेदान्ततत्त्वज्ञानाय वेदानाम् आपाततः अर्थज्ञानम् आवश्यकम्। वेदानाम् अर्थज्ञानेन मनः विशुद्धं भवति। विशुद्धं मनः त्याज्यकर्मणि नियुक्तं न भवति।



## पाठगतप्रश्नाः - २

६. प्रमाताशब्दस्य कः अर्थः?

७. वालबोधिनीटीकायाः कर्ता कः?

८. आपदेवस्य मते प्रमातृशब्दार्थः कः?

९. विद्वन्मनोरञ्जनीकारः कः ?

१०. साधनः कतिविधः?

११. कति वेदाङ्गानि?

१२. पञ्चदशीग्रन्थस्य कः रचयिता?

१३. उपनयनसंस्कारः केषां भवति?

१४. विशुद्धं मनः कुत्र नियुक्तं न भवति?

## १७.३ काम्यकर्म -

द्विविधं त्याज्यं कर्म – काम्यकर्म, निषिद्धकर्म चेति।

"फलोद्देश्येन क्रियमाणानि कर्माणि काम्यानि"(विद्वन्मनोरञ्जनी)। यत्किञ्चित् फलम् आकाङ्क्ष्य यत् कर्म क्रियते तत् काम्यं कर्म। यथा स्वर्गप्राप्त्यर्थं क्रियमाणानि ज्योतिष्टोमयज्ञादीनि। मरणादनन्तरं स्वर्गप्राप्तिः भवतु इति फललाभाय ज्योतिष्टोमयागः अनुष्ठीयते। अतः स्वर्गरूपफलप्राप्तये ज्योतिष्टोमयागः क्रियते। अतः ज्योतिष्टोमयागः काम्यं कर्म। काम्यकर्मणः फलम् अनित्यम्। यत् कृतकं तदनित्यम् इति नियमः। अर्थात् यत् क्रियाजन्यं साधनजन्यं तद् अनित्यम्। फलभोगात् परं पुनः तत् फलं कोऽपि इच्छति चेत् तत् कार्यं पुनः कर्तव्यम्।

## १७.४ निषिद्धकर्म -

निषिद्धानि नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि। वेदेषु येषां कर्मणां निषेधः विद्यते तानि निषिद्धकर्माणि। एतानि कर्माणि नरकादि अनिष्टं साधयन्ति। यथा - "ब्राह्मणो न हन्तव्यः" वेदे एवं निर्देशः अस्ति। अतः कोऽपि वेदस्य निर्देशम् अश्रुत्वा ब्राह्मणहननं करोति तर्हि सः निषिद्धं कर्म आचरति। तेन सः पापभाक् भवति। तस्य नरकाद्यनिष्टलोकप्राप्तिः भवति। अस्य फलमपि अनित्यम् एव।

वेदतत्त्वज्ञानेन यस्य अज्ञाननाशः भवति सः काम्यकर्मणि तथा निषिद्धकर्मणि नियुक्तः न भवति। अनित्यं फलं त्यक्त्वा नित्यफललाभाय यत्नं करोति। कैः कर्मभिः नित्यफललाभः भवति? साधनचतुष्टयेन एव नित्यफललाभः भवति। ततः पूर्वं नित्य-नैमित्तिक-प्रायश्चित्त-उपासनानाम् अनुष्ठानं कर्तव्यम्।

## १७.५ नित्यकर्म-

"नित्यानि अकरणे प्रत्यवायसाधनानि"। येषां कर्मणाम् आचरणेन महत्पुण्यं न सम्भवति, परन्तु अननुष्ठानेन पापः भवति तानि कर्माणि नित्यानि। यथा - सन्ध्यावन्दनादीनि। श्रुतौ आम्नातं "अहरहः सन्ध्यामुपासीत" इति। प्रत्यहं सन्ध्योपासना कर्तव्या इति श्रुतेः निर्देशः। यः प्रत्यहं सन्ध्योपासनं करोति, सः तेन कर्मणा लाभवान् न भवति। परन्तु यः आलस्यवशात् सन्ध्योपासनं न करोति सः पापी भवति। मनुसंहितायाम् अपि उक्तम्

**"अकुर्वन् विहितं कर्म निन्दितं च समाचरन्।**
**प्रसज्जन् च इन्द्रियार्थेषु नरः पतनमृच्छति।।"[११/४४] इति।**
**सर्वसिद्धान्तसङ्ग्रहे उच्यते -**
**"मोक्षार्थी न प्रवर्तेत तत्र काम्यनिषिद्धकर्मणोः।**
**नित्यनैमित्तिके कुर्यात् प्रत्यवायजिहासया॥"[११/३४,३५] इति।**
**तैत्तिरीयोपनिषदः शीक्षावल्ल्याम् भगवत्पादैः शङ्कराचार्यैः निगदितं**
**"इष्टानिष्टफलानामनारब्धानां क्षयार्थानि नित्यानि इति चेत् , न ;अकरणे प्रत्यवायश्रवणात् ।प्रत्यवायशब्दो हि अनिष्टविषयः। नित्याकरणनिमित्तस्य प्रत्यवायस्य दुःखरूपस्य आगामिनः परिहारार्थानि नित्यानीत्यभ्युपगमात् न अनारब्धफलकर्मक्षयार्थानि।" इति।**

यः शास्त्रैः विहितं सन्ध्यावन्दनादिकं परित्यज्य शास्त्रनिषिद्धं ब्राह्मणहननादिकम् आचरति, पुनः इन्द्रियभोग्येषु विषयेषु आसक्तः भवति सः नरकादौ पतितः भवति। अतः शास्त्रविहितानां नित्यकर्मणां सन्ध्यावन्दनादीनाम् आचरणं प्रत्यहं कर्तव्यम्।

## १७.६ नैमित्तिकं कर्म -

"नैमित्तिकानि पुत्रजन्माद्यनुबन्धीनि जातेष्ट्यादीनि"। नैमित्तिकं हि निमित्तमूलकम्। कस्यचित् निमित्तस्य उपस्थितौ शास्त्रोपदेशेन यत् कर्म कर्तव्यं भवति तत् नैमित्तिकं कर्म। यथा जातेष्ट्यादीनि यज्ञानि। जातेष्टियागस्य विधायकं वाक्यम् एवम् अस्ति - "वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते" इति। यदा पुत्रः भवति तदा द्वादशसु कपालेषु पुरोडाशं स्थापयित्वा वैश्वानरदेवाय दातव्यम्। पुत्रजातनिमित्तं जातेष्टियागः भवति तस्मात् सः यागः नैमित्तिकं कर्म।

## १७.७ प्रायश्चित्तं कर्म -

"प्रायश्चित्तानि पापक्षयसाधनानि चान्द्रायणादीनि"। मनुष्याः भ्रमादेव प्रमादं कुर्वन्ति। लोभादीनां वशम् आगत्य पापम् आचरन्ति। विहितकर्मणाम् अननुष्ठानेन निषिद्धकर्मणां च अनुष्ठानेन मनुष्याः पापभाजः भवन्ति। परं च कृतस्य पापस्य कृते अनुशोचनं कुर्वन्ति। अस्मिन्नेव जन्मनि तस्मात् पापात् मुक्तिं प्राप्तुं यतन्ते। एतादृशानां मनुष्याणां कृते एव शास्त्रे प्रायश्चित्तकर्मणः विधानं विद्यते। प्रायश्चित्तशब्दार्थः "प्रायः तुष्टं चित्तं यत्र तत् प्रायश्चित्तम्" इति। प्रायशब्दार्थः प्रकृष्टम् अयः अर्थात्

लौहवत् कठोरः तपः। अर्थात् यस्मिन् व्रतानुष्ठाने कठोरेण तपसा चित्तं तुष्टं भवति तत् प्रायश्चित्तम्। येन पापानां क्षयः भवति। चान्द्रायणम् एकं प्रायश्चित्तम्। चान्द्रायणविषये मनुः आह –

**" एकैकं ह्रासयेत् पिण्डं कृष्णे शुक्ले च वर्धयेत्।**
**उपस्पृशन् त्रिषवणमेतच्चान्द्रायणं स्मृतम्।।" इति (११/२१६)**

प्रत्यहं प्रातः सायं मध्याह्ने च स्नानम् कर्तव्यम्। पूर्णिमायां पञ्चदशमुष्टिपरिमितं भोजनं कृत्वा कृष्णपक्षस्य प्रतिपत्तिथेः चतुर्दशीपर्यन्तं प्रत्यहम् एकमुष्टिपरिमितं भोजनं न्यूनं कर्तव्यम्। ततः अमावस्यायाम् उपवासः कर्तव्यः। ततः शुक्लपक्षस्य प्रतिपत्तिथौ भोजनारम्भः कर्तव्यः। प्रत्यहम् एकमुष्टिपरिमितस्य भोजनस्य बर्धनं कर्तव्यम्। पुनः पूर्णिमायां पञ्चदशमुष्टिपरिमितं भोजनं कर्तव्यम्। एवम् एकमासः कर्तव्यः। अस्य प्रायश्चित्तकर्मणः नाम चान्द्रायणम्। एवमन्यानि अपि प्रायश्चित्तकर्माणि सन्ति।

एताषां नित्यनैमित्तिकप्रायश्चित्तानां बुद्धिशुद्धिः परम् अर्थात् मुख्यं प्रयोजनम्। एतेषां कर्मणामनुष्ठानेन बुद्धेः शुद्धिः निर्मलता भवति। तस्मात् एव एतेषाम् आचरणं कर्तव्यम्।

## १७.८ उपासनम् -

"उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि"। यः पुरुषः प्रायश्चित्तं कर्म करोति तस्य मनः निर्मलं भवति। निर्मलस्य मनसः एकाग्रतासम्पादनाय उपासनं कर्तव्यम्। उप समीपे आस्यते स्थीयते अनेन इति उपासनम् अनेन व्युत्पत्तिबलेन उपासनं हि येन कर्मणा उपासकः उपास्यस्य समीपं तिष्ठति। अर्थात् उपासकस्य चित्तं सर्वदा उपास्ये एव लग्नं भवति। उपासना विद्यारूपा। अत्र विद्याशब्दस्य अर्थः विद्यते लभ्यते उपास्ये चित्तस्थैर्यं यया क्रियया सा विद्या। अर्थात् यया क्रियया उपास्ये गुणसहिते ब्रह्मणि उपासकस्य चित्तं स्थिरीभवति सा क्रिया विद्या। सा विद्या शाण्डिल्यादिमहर्षिभिः उपदिष्टा। तस्मात् "शाण्डिल्यविद्यादीनि" इति उक्तम्। उपासनैः चित्रस्य एकाग्रता एव सम्पादिता भवति। तत्र प्रमाणं "तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन" इति श्रुतिवचनम्। "तपसा कल्मषं हन्ति" इति स्मृतिवचनं च।

एतेषां नित्यनैमित्तिकप्रायश्चित्तोपासनानाम् अवान्तरफलम् अर्थात् गौणं फलं तु पितृलोकप्राप्तिः सत्यलोकप्राप्तिः। तत्र प्रमाणं - "कर्मणा पितृलोकः विद्यया देवलोकः" इति श्रुतिः।

एतैः नित्यनैमित्तिकप्रायश्चित्तोपासनाभिः परिशुद्धं मनः साधनचतुष्टयसम्पादने समर्थं भवति। अतः नित्यादिकर्मणा यस्य पुरुषस्य चित्तं निर्मलं भवति सः साधनचतुष्टयसम्पादने स्वं नियोजयति।

## पाठगतप्रश्नाः - ३

१५. त्याज्यं कर्म कतिविधम्?

१६. कानि काम्यकर्माणि?

१७. स्वर्गप्राप्तये कः यागः अनुष्ठीयते?

१८. कानि निषिद्धकर्माणि?

१९. निषिद्धकर्मानुष्ठाने किं भवति?

२०. कानि नित्यकर्माणि?

२१. कानि नैमित्तिककर्माणि?

२२. कानि प्रायश्चित्तानि?

२३. कानि उपासनानि?

२४. नित्यादिकर्मणां मुख्यं फलं किम्?

२५. नित्यादिकर्मणां गौणं फलं किम्?+

---

साधनचतुष्टयं किमिति वेदान्तसारकारः वदति -

"साधनानि नित्यानित्यवस्तुविवेक-इहामुत्रफलभोगविराग-शमादिषट्कसम्पत्ति-मुमुक्षुत्त्वानि"इति

अर्थात् नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षुत्वं च चत्वारि साधनानि। इदानीम् एतेषां क्रमशः विवरणं पश्यामः -

## १७.१ नित्यानित्यवस्तुविवेकः -

नित्यं वस्तु अनित्यं वस्तु इति द्विविधं वस्तु विद्यते जगति। तयोः विवेकः विवेचनम्, किं नित्यं वस्तु किम् अनित्यं वस्तु इति विचारपूर्वकज्ञानम् एव नित्यानित्यवस्तुविवेकः। वेदान्तसारकारमते - "नित्यानित्यवस्तुविवेकस्तावत् ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम्" इति। ब्रह्म एव नित्यं वस्तु ततः अन्यत् अखिलं सर्वम् आकाशादिप्रपञ्चः अनित्यं वस्तु इति विचारपूर्वकं ज्ञानम्। नित्यं वस्तु किं भवति। यत् कालत्रये एव तिष्ठति तत् नित्यं वस्तु। अतीते काले अपि आसीत्, वर्तमानकाले अपि अस्ति, भविष्यत्काले अपि भविष्यति यत् तत् नित्यं वस्तु। तादृशम् एकं ब्रह्म एव विद्यते। ब्रह्म नित्यं वस्तु इत्यत्र प्रमाणम् - "अजो नित्यः शाश्वतः" (कठोपनिषदि १/२/१८), "सत्यं ज्ञानम् अनन्तं ब्रह्म" (तैत्तिरीये २/१) इत्यादयः श्रुतयः। ब्रह्मभिन्नम् अन्यत् सर्वम् अपि अनित्यम्। तानि पूर्वं नासन्, इदानीं सन्ति, भविष्यत्काले अपि न स्थास्यन्ति। अतः तानि कालत्रये न तिष्ठन्ति। अतः तानि अनित्यवस्तूनि। ब्रह्मभिन्नानां सर्वेषाम् अनित्यत्वविषये "नेह नानास्ति किञ्चन" (४/४/१९) "अथ यदल्पं तन्मर्त्यम्" (छान्दोग्ये ७/२४/१) इत्यादिश्रुतयः प्रमाणभूताः। नित्यवस्तुनः अनित्यवस्तुनः पृथक्करणम् एव नित्यानित्यवस्तुविवेकः। विवेकचूडामणौ अपि उक्तम् -

**"ब्रह्म सत्यं जगन्मिथ्येत्येवंरूपो विनिश्चयः।**
**सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः।।"इति**

"ब्रह्म सत्यं जगत् मिथ्या" - इत्येवंरूपः यः विनिश्चयः निर्धारणः, सः अयं नित्यानित्यवस्तुविवेकः समुदाहृतः कथितः उक्तः इत्यर्थः।

नित्यानित्यवस्तुविवेकः यदा भवति तदा एव द्वितीये इहामुत्रफलभोगविरागे यत्नः करणीयः।

## १७.१० इहामुत्रफलभोगविरागः -

इह अस्मिन् लोके अमुत्र स्वर्गलोके कर्मजन्यं यत् फलं प्राप्यते तस्य भोगात् विरक्तिः आसक्त्याः अभावः एव इहामुत्रफलभोगविरागः। वेदान्तसारे उक्तं -

"ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानाम् अनित्यत्ववत् आमुष्मिकाणाम् अपि अमृतादिविषयभोगानाम् अनित्यतया तेभ्यो नितरां विरतिः इहामुत्रफलभोगविरागः"इति।

इहलोके भव ऐहिकः। स्रक्, चन्दनं, वनिता, गृहं, क्षेत्रम् - इत्यादिविषयाः इहलोके भवाः अर्थात् इहलोके एव तिष्ठन्ति, अत एते विषया ऐहिकाः। एतेषां विषयाणां भोगेन एव जीवाः आत्मानं सुखिनः इति मन्यन्ते। परन्तु ऐहिकवस्तुभ्यः यत् सुखं प्राप्नुवन्ति जीवाः तत् अनित्यम्। यतो हि विषयाः अनित्याः। अतः ततः जन्यं सुखम् अपि अनित्यम्। एवम् एव आमुष्मिकाणां स्वर्गसुखानाम् अमृतादिविषयभोगानाम् अपि अनित्यत्वम्। तत्र प्रमाणम् - "तद्यथेह कर्मजितो लोकः क्षीयते एवम् एव अमुत्र पुण्यजितो लोकः क्षीयते" (छा - १/८/१६) इत्यादयः श्रुतयः। अर्थात् कर्मणा जीतः पृथिवीलोकः भोगेन क्षीयते तथैव पुण्येन जीतः लोकः स्वर्गलोकः अपि भोगेन क्षीयते। "क्षीणे पुण्ये मर्त्यलोकं विशन्ति" इति गीतावचनम् अपि प्रमाणम्। अतः लौकिकं सुखं तथा स्वर्गसुखम् उभयम् अपि अनित्यम्। यतो हि ते अनित्याः अतः तेभ्यः नितरां विरतिः अत्यन्ततया विमुखता एव इहामुत्रफलभोगविरागः। विवेकचूडामणौ अपि उक्तम् -

**"तद्वैराग्यं जुगुप्सा या दर्शनश्रवणादिभिः।**
**देहादिब्रह्मपर्यन्ते ह्यनित्ये भोगवस्तुनि।।"**(२१)

स्वदेहात् आरभ्य ब्रह्मलोकपर्यन्ते भोग्यवस्तुनि दर्शनेन श्रवणेन वा या जुगुप्सा घृणाबोधः तत् एव वैराग्यम्। अर्थात् मनुष्यशरीरम् अनित्यम् इति सर्वे एव जानन्ति। पुण्यकर्मणा पुरुषः ब्रह्मलोकं प्राप्नोति। यद्यपि तत्र निवासः दीर्घकालपर्यन्तं भवति तथापि तत्र नित्यं तत्र निवासः न सम्भवति। ब्रह्मलोके प्राप्तस्य सुखस्य अवसानं भवति एव। कानिचन वस्तूनि अनित्यानि इति दृष्ट्वा एव ज्ञायते, कानिचन वस्तूनि अनित्यानि इति आप्तजनमुखात् श्रुत्वा ज्ञायते। उभयप्रकारेण भोग्यवस्तुनः अनित्यत्वं ज्ञात्वा तस्मिन् या जुगुप्सा घृणाभावः तत् एव वैराग्यम् इति उच्यते।

## १७.११ शमादिषट्कसम्पत्तिः-

अधिकारी द्वितीयसाधनसम्पन्नः यदा भवति तदा तृतीयसाधनस्य मार्गः उन्मुक्तः भवति। तृतीयसाधनं भवति शम-दम-उपरति-तितिक्षा-समाधान-श्रद्धानां प्राप्तिः।

**शमः** - "शमस्तावत् श्रवणादिव्यतिरिक्तविषयेभ्यः मनसः निग्रहः" इति उक्तं वेदान्तसारे। वस्तुतः मनसः निग्रहः एव शमः। वेदान्ततत्त्वस्य श्रवण-मनन-निदिध्यासनेन एव तत्त्वज्ञानं जायते। येन वृत्तिविशेषेण आत्मविषयकश्रवणादिभिन्नविषयेभ्यः बलात् मनसः निग्रहः भवति सः शमः। जीवस्य चित्तम् अतिशयचपलम्। एकस्मिन् विषये दीर्घकालं यावत् न तिष्ठति। बुभुक्षोः भोजनं प्रति यथा अभिरुचिः भवति तथा एव वैराग्ययुक्तस्य पुरुषस्य मनः तत्त्वज्ञाने अभिरुचिसम्पन्नं सत् अपि पूर्वसंस्कारवशात्

विक्षिप्तं भवति। तस्यां दशायां येन वृत्तिविशेषेण पार्थिवं सुखम् अनित्यं परिणामे दुःखजनकम् इति बलपूर्वकं विषयेभ्यः आकर्षति सः शमः। विवेकचूडामणौ अपि उक्तम् -

**"विरज्य विषयव्राताद्दोषदृष्ट्या मुहुर्मुहुः।**
**स्वलक्ष्ये नियतावस्था मनसः शम उच्यते।।"इति(२२)**

मुहुर्मुहुः प्रतिक्षणं, दोषदृष्ट्या दोषदर्शनेन, विषयव्रातात् विषयसमूहात् विरज्य वैराग्यप्राप्त्या मनसः स्वलक्ष्ये ब्रह्मतत्वज्ञाने नियतावस्था निश्चलरूपेण अवस्थानं शमः उच्यते कथितो भवति।

**दमः** - "दमो बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम्" इति वेदान्तसारे उक्तम्। बाह्येन्द्रियाणां चक्षु-कर्ण-नासिका-जिह्वा-त्वचां तद्विषयेभ्यः आकर्षणम्। चक्षुषः रूपात्, कर्णस्य शब्दात्, नासिकायाः गन्धात्, जिह्वायाः रसात्, त्वचः स्पर्शात् आकर्षणं येन वृत्तिविशेषेण क्रियते सः दमः। वस्तुतः दमः हि बाह्येन्द्रियाणां निग्रहः। आदौ अन्तरिन्द्रियस्य निग्रहः कर्तव्यः। ततः बाह्येन्द्रियाणां निग्रहः। तस्मात् आदौ शमस्य निर्देशः ततः दमस्य निर्देशः। यदि मनः वशीभूतं भवति तर्हि चक्षुरादीनां निग्रहः सम्भवः। मनसः सङ्कल्पवशात् एव चक्षुरादयः रूपादिषु धाविताः भवन्ति। यदि कोऽपि पुरुषः कस्मिंश्चित् विषये मनसः नियोगं करोति तर्हि तस्य सम्मुखे सुरूपं तिष्ठति चेत् अपि न पश्यति, सुगीतं भवति चेत् अपि न शृणोति। अतः मनसः निग्रहः भवति चेत् बहिरिन्द्रियाणां स्वतः निग्रहः भवति। परन्तु संस्कारवशात् विक्षिप्तं भवति। तस्मात् यत्नः कर्तव्यः। विवेकचूडामणौ दमविषये उक्तम् -

**"विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके।**
**उभयेषामिन्द्रियाणां स दमः परिकीर्तितः।।" इति (२३)**

उभयेषाम् इन्द्रियाणां ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च विषयेभ्यः स्वस्वविषयेभ्यः परावर्त्य विमुखीकृत्य स्वस्वगोलके स्वस्वस्थाने स्थापनं स्थिरीकृत्य निश्चलरूपेण रक्षणं, सः दमः परिकीर्तितः कथितः।

शमदमवान् पुरुषः एव स्थितप्रज्ञः इति भगवान् श्रीकृष्णः अपि गीतायाम् उक्तवान् -

**"यदा संहरते चायं कुर्मोऽङ्गानीव सर्वशः।**
**इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता।।" इति (२/५८)**

यदा अयं कुर्मः अङ्गानि इव सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते तस्य प्रज्ञा प्रतिष्ठिता भवति इति **अन्वयः**। अर्थात् इन्द्रियाणि सर्वदा अपि शब्दादिषु विषयेषु प्रवृत्तानि भवन्ति। कूर्मः यथा भयात् स्वानि अङ्गानि संकोचयति तथा यदा अयं ज्ञाननिष्ठायां प्रवृत्तः जनः सर्वाणि इन्द्रियाणि शब्दादिभ्यः संकोचयति तदा तस्य प्रज्ञा प्रतिष्ठिता भवति। स च स्थितप्रज्ञः भवति।

**उपरतिः** - वेदान्तसारे उपरतेः लक्षणद्वयम् उक्तम् - "निवर्तितानाम् एतेषां तद्व्यतिरिक्तविषयेभ्यः उपरमणम् उपरतिः" अथवा "विहितानां कर्मणां विधिना परित्यागः" इति।

मनसः तथा बहिरिन्द्रियाणां निग्रहणेन एव तत्त्वज्ञानस्य मार्गः उन्मुक्तः न भवति। पूर्वतनवासनावशात् तानि पुनः चञ्चलानि भवन्ति। अतः निवर्तितानाम् इन्द्रियाणाम् मनसः तथा बहिरिन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यः पुनः पुनः दोषदर्शनेन उपरमणम् निवृत्तिः एव उपरतिः। अथवा

शास्त्रविहितानां नित्यनैमित्तिकप्रायश्चित्तानां विधिपूर्वकं परित्यागः एव उपरतिः। विवेकचूडामणौ उक्तम् - “बाह्यानालम्बनं वृत्तेरेषोपरतिरुत्तमा।”इति। वृत्तेः मनसः विषयप्रकाशकशक्तेः, बाह्यानालम्बनं बाह्यानात्मवस्त्वाकारेण अपरिणतभवनम् एव उत्तमा उपरतिः।

**तितिक्षा** - “तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता ” इति उक्तम्। अर्थात् शीतोष्णप्रभृति-विपरीतविषयान् तथा ततः उत्पन्नसुखदुःखादीनां सहनम्। सर्वे जीवाः सुखेन आनन्दम् अनुभवन्ति। आनन्देन प्रमादः न भवति। परन्तु दुःखस्य सहनं सर्वे कर्तुं न शक्नुवन्ति। अतः दुःखकारणात् प्रमादं कुर्वन्ति बहवः। परन्तु यः तितिक्षाम् अभ्यस्यति तस्य समीपे सुखं दुःखम् उभयम् अपि समानम्। सः सुखेन अत्यधिकम् आनन्दम् न अनुभवति, दुःखेन अपि दुःखितः न भवति। अतः सः अप्रमादः धैर्यवान् भूत्वा साधनातः अविचलितः न भवति। विवेकचूडामणौ उक्तम् -

**“सहनं सर्वदुःखानामप्रतीकारपूर्वकम्।**
**चिन्ताविलापरहितं सा तितिक्षा निगद्यते।।”इति।**

सर्वदुःखानां सर्वविधदुःखानां चिन्ताविलापरहितं चिन्तां विलापं च त्यक्त्वा अप्रतीकारपूर्वकम् प्रतीकारं न कृत्वा सहनं स्वीकारः एव तितिक्षा निगद्यते उच्यते इत्यर्थः।

वस्तुतः शमदमोपरतिभ्यः बहिर्विषयेभ्यः निवृत्तिः भवति। तितिक्षायां तु अन्तर्विषयेभ्यः चित्तस्य निवर्तनं भवति।

**समाधानम्** - “निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्।” अर्थात् विषयेभ्यः प्रत्याहितस्य चित्तस्य आत्मनः विषये श्रवण-मनन-निदिध्यासने तथा तस्य अनुगुणविषये गुरुशुश्रुषादौ अवस्थानम् एव समाधानम्। अस्याम् दशायाम् एवं किमपि न कर्तव्यं येन आत्मविषयस्मृतिधारायाः विच्छेदो भवति। आत्मविषयकप्रत्ययप्रवाहस्य उत्पादनम् एव समाधिः, तदेव समाधानम्। विवेकचूडामणौ उक्तम् -

**“सम्यगास्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वथा।**
**तत्समाधानमित्युक्तं न तु चित्तस्य लालनम्।।”इति।**

शुद्धे निर्गुणे ब्रह्मणि ब्रह्मविषयकतत्त्वज्ञाने बुद्धेः चित्तस्य सम्यक् यथार्थतया आस्थापनं स्थिरीकरणम् एव समाधानम् इत्युक्तम्। तु किन्तु चित्तस्य लालनम् कौतुहलात् वेदान्ततत्त्वस्य आलोचनेन मनसः तृप्तिलाभः न समाधानम् इत्यर्थः। समाधिं विना आत्मसाक्षात्कारः न भवति।

**श्रद्धा** - केवलेन श्रवणादिना तत्त्वसाक्षात्कारः न भवति। श्रवणादिकं श्रद्धापूर्वकं कर्तव्यम् एव। श्रद्धा हि का इति चेत् उच्यते - “गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा”इति। गुरुवचनेषु तथा गुरूपदिष्टशास्त्रवचनेषु दृढतरविश्वासः एव श्रद्धा। आत्मतत्त्वजिज्ञासोः श्रद्धा एव मेरुदण्डः। श्रद्धा नास्ति चेत् शतशः उपदेशे अपि अर्थस्य अवधारणं न भविष्यति। अतः आत्मजिज्ञासोः श्रद्धायाः अवलम्बनम् अनिवार्यम्। विवेकचूडामणौ उक्तम् -

**“शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यवधारणम्।**

**सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते।।"इति।**

गुरुवाक्यस्य गुरुणा उपदिष्टस्य वाक्यस्य, तथा शास्त्रवाक्यस्य वेदान्तवाक्यस्य, सत्यबुद्ध्यवधारणं सत्यतया ग्रहणं, यया येन निश्चयेन वस्तूपलभ्यते आत्मनः उपलब्धिः भवति सा श्रद्धा कथिता सर्वैः उक्ता।

एवं शमादिशट्कसम्पत्तिः ग्रहणीया भवति।

## पाठगतप्रश्नाः - ४

२६. कः नित्यानित्यवस्तुविवेकः?

२७. कः विरागः?

२८. स्वर्गसुखम् अपि अनित्यम् इत्यत्र का श्रुतिः प्रमाणभूता?

२९. कः शमः?

३०. कः दमः?

३१. का उपरतिः?

३२. का तितिक्षा?

३३. किं समाधानम्?

३४. का श्रद्धा?

## १७.१२ मुमुक्षुत्वम् -

मुमुक्षुत्वस्य अर्थः मोक्षे इच्छा। आत्मज्ञानप्राप्तये एतत् एव प्रधानं साधनम्। यदि पुरुषस्य मोक्षप्राप्तये इच्छा न भवति तर्हि मोक्षोपायस्य अन्वेषणं न करोति। तस्मात् आत्मदर्शनम् अपि न करोति। आत्मदर्शनं मोक्षस्य मार्गः इति वेदान्ततत्त्व-श्रवण-मनन-निदिध्यासनम् आत्मदर्शने कारणम् इति बोद्धुं न शक्नोति। अतः वेदान्ते तस्य प्रवृत्तिः एव न स्यात्। तेन वेदान्तैकवेद्यस्य आत्मनः ज्ञानम् अपि तस्य न भवति। अतः अधिकारिणः मोक्षेच्छा अवश्यं भवितव्या। विवेकचूडामणौ शङ्कराचार्येण उक्तम् -

**"अहंकारादिदेहान्तान् बन्धानज्ञानकल्पितान्।**
**स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता।।"इति।**

अहंकारादिदेहान्तान् सूक्ष्मात् अहंकारात् आरभ्य स्थूलदेहपर्यन्तम्, अज्ञानकल्पितान् अज्ञानात् उत्पन्नान् बन्धान् बन्धसहमूहान् स्वस्वरूपावबोधेन आत्मज्ञानेन मोक्तुम् इच्छा एव मुमुक्षुता इत्यर्थः।

एवं साधनचतुष्टयं निरूपितम्। यावत् नित्यानित्यवस्तुविवेकः न भवति तावत् अनित्ये वस्तुनि वैराग्यं न उत्पद्यते। वैराग्यं विना शमादीनाम् अपि आचरणं न सम्भवति। शमादीनाम् अभावे मोक्षविषयिणी इच्छा एव न सम्भवति। मोक्षे इच्छां विना ब्रह्मजिज्ञासा अपि न स्यात्। तस्मात् आदौ

नित्यानित्यवस्तुविवेकः ततः इहामुत्रफलभोगविरागः ततः शमादिषट्कसम्पत्तिः ततः मुमुक्षुत्त्वम् इति क्रमेण तेषामुल्लेखः।

एवं सर्वैः गुणैः युक्तः प्रमाता वेदान्तविद्यायाम् अधिकारी भवति। अत्र श्रुतेः प्रमाणम् अपि प्राप्यते-

"**शान्तो दान्त उपरतिस्तितिक्षुः समाहितो भूत्वाऽत्मन्येवात्मानं पश्यति**"इति।

अर्थात् यस्य मनः शान्तम्, इन्द्रियाणि न चञ्चलानि, यः सन्न्यासदीक्षां प्राप्तवान्, यः सुखदुःखेषु समानमनाः तिष्ठति सः समाहितः भूत्वा एकाग्रभावं प्राप्य आत्मनि एव आत्मानं पश्यति।

अस्याः श्रुतेः समर्थनं करोति उपदेशसाहस्रीगतं वाक्यम् इदम् -

**"प्रशान्तचित्ताय जितेन्द्रियाय च**
**प्रहीणदोषाय यथोक्तकारिणे।**
**गुणान्विताय अनुगताय सर्वदा**
**प्रदेयमेतत् सततं मुमुक्षवे।।"** (३२४,१६/१२)

प्रशान्तचित्ताय यस्य मनः शान्तं तस्मै, जितेन्द्रियाय यस्य इन्द्रियाणि चञ्चलानि न भवन्ति, प्रहीणदोषाय यः त्याज्यकर्म परित्यज्य नित्यादिकर्मणाम् अनुष्ठानं करोति तस्मै, गुणान्विताय विवेकवैराग्यादिगुणविशिष्टाय, यथोक्तकारिणे अनुगताय सर्वदा यः गुरोः तथा शास्त्रवचनं निर्देशानुसारं पालयति सर्वदा आचार्यस्य अनुगतः एव तिष्ठति तस्मै, सततं मुमुक्षवे मोक्षप्राप्तये यस्य अदम्यः उत्साहः तस्मै एतत् ब्रह्मविद्या प्रदेयं दातव्यम् इति।

एतादृशः अधिकारी जनन-मरणादि-संसारानल-सन्तप्तः दीप्तशिरा जलराशिम् इव उपहारपाणिः श्रोत्रियं ब्रह्मनिष्टं गुरुम् उपसृत्य तमनुसरति "समित्पाणिः श्रोत्रियं ब्रह्मिनिष्ठम्" इत्यादिश्रुतेः।

## पाठगतप्रश्नाः- ५

३५. किं हि मुमुक्षुत्त्वम्?

३६. विवेकचूडामणेः कर्ता कः?

३७. शमादीनाम् अभावे किं न भवति?

एवम् अधिकारिस्वरूपं निरूप्य इदानीं विषयं प्रतिपादयति -

## १७.१३ विषयः-

वेदान्तशास्त्रस्य विषयनिरूपणावसरे वेदान्तसारे उक्तम् - "जीवब्रह्मैक्यं शुद्धचैतन्यं प्रमेयम्, तत्रैव वेदान्तानां तात्पर्यात्" इति। इदं वेदान्तशास्त्रं जीवस्य ब्रह्मणः च ऐक्यं प्रतिपादयति। जीवः अल्पज्ञः



ब्रह्म सर्वज्ञं, तयोः जीवब्रह्मणोः शुद्धचैतन्यरूपम् ऐक्यं प्रतिपादयति। अत्र प्रश्नः किमर्थं वेदान्तशास्त्रं जीवब्रह्मणोः ऐक्यम् एव प्रतिपादयति? ग्रन्थकर्ता कथयति यत् - "तत्रैव वेदान्तानां तात्पर्यात्" इति। अर्थात् सर्वाणि वेदान्तवाक्यानि उपनिषद्वाक्यानि "अयमात्मा ब्रह्म" "तत्त्वमसि" "अहं ब्रह्मास्मि" "प्रज्ञानं ब्रह्म" इत्यादीनि जीवब्रह्मणोः ऐक्यम् एव प्रतिपादयति। सर्वेषां वाक्यानां शुद्धचैतन्यप्रतिपादनम् एव लक्ष्यम्। अतः इदं शास्त्रम् अपि तदेव प्रतिपादयति। पुनः प्रश्नः भवति यत् वेदान्तवाक्यैः जीवब्रह्मणोः कीदृशम् ऐक्यं विवक्षितम्? नीरक्षीरवत् गौणं वा घटाकाशपटाकाशवत् मुख्यं वा? नीरं क्षीरम् उभयं भिन्नम्। परन्तु तयोः मिश्रणे कृते जलदुग्धयोः साधारणतया पृथक्करणं न सम्भवति। तयोः ऐक्यम् अनुभयते। वेदान्तवाक्यैः एतादृशम् ऐक्यं विवक्षितं वा? उच्यते "शुद्धचैतन्यम्" इति। अर्थात् ऐक्यशब्देन अत्र नीरक्षीरवत् गौणम् ऐक्यं न विवक्षितम्। अत्र ऐक्यशब्दार्थः अभेदः इति। घटमध्यवर्ती आकाशः महाकाशस्य एव अंशः, परन्तु घटरूपावरणवशात् पृथक् इति अनुभूयते। यथा घटमध्यवर्ती आकाशः घटस्य नाशे जाते महाकाशेन सह मिलितः भवति तथैव अज्ञाननाशे जाते जीवचैतन्यं शुद्धचैतन्यरूपेण ब्रह्मचैतन्येन सह एकात्मभावं प्राप्नोति। एतादृशं मुख्यम् ऐक्यम् एव वेदान्तस्य प्रतिपाद्यम्। आत्मोपनिषदि आम्नातं -

**"घटे नष्टे यथा व्योम व्योमैव भवति स्वयम्।**
**तथोपाधिविलये ब्रह्मैव ब्रह्मवित् स्वयम्।।"इति (१/२२)**

अर्थात् घटे नष्टे घटस्य नाशः भवति चेत् यथा व्योम घटमध्यवर्ती आकाशः व्योमैव स्वयं भवति स्वयम् एव महाकाशः भवति, तथा उपाधिविलये आवरणनाशे अज्ञाननाशे जाते ब्रह्मवित् जीवात्मा ब्रह्मैव परं ब्रह्म एव स्वयं भवति।

वस्तुतः जीवब्रह्मणोः अभेदः एव विद्यते। तत्र या भेदप्रतीतिः सा अज्ञानमूलका। एतादृशम् अज्ञानं तावत्पर्यन्तं तिष्ठति यावत्पर्यन्तं स्वरूपज्ञाने यत्नः न भवति। अतः अज्ञानं नाशयित्वा जीवब्रह्मणोः शुद्धचैतन्यरूपस्वरूपप्रतिपादनाय एव एतादृशः विषयः स्वीकृतः।

## १७.१४ सम्बन्धः -

अधिकारिणं विषयं च प्रतिपाद्य तृतीयं सम्बन्धं प्रतिपादयति - "सम्बन्धस्तु तदैक्यप्रमेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावः" इति। तदैक्यं तयोः जीवब्रह्मणोः ऐक्यं अभेदः, जीवबह्मणोः ऐक्यप्रमेयस्य ऐक्यज्ञेयस्य तत्प्रतिपादकोपनिषत्प्रमाणस्य ऐक्यप्रतिपादकोपनिषत्प्रमाणस्य च बोध्यबोधकभावसम्बन्धः। शास्त्रेण तथा ग्रन्थेन सह विषयस्य सर्वदा बोद्ध्यबोधकभावः एव सम्बन्धः भवति। शास्त्रं ग्रन्थः वा बोधकम्, ब्रह्म बोध्यम्। अतः विषयेण सह शास्त्रस्य बोद्ध्यबोधकभावसम्बन्धः। बोद्ध्यशब्दार्थः बोधस्य विषयः, बोधकशब्दार्थः बोधस्य जनकः अर्थात् यः बोधं जनयति। ग्रन्थप्रतिपाद्यविषयः शास्त्रात् ग्रन्थात् वा उत्पन्नस्य बोधस्य विषयः अतः सः बोध्यः इति उच्यते। शास्त्रं तथा ग्रन्थः विषयबोधस्य जनकः अतः सः बोधक इति उच्यते। विषयेण सह शास्त्रस्य ग्रन्थस्य वा एतादृशः एव बोध्यबोधकभावः सम्बन्धः सम्भवति। एतादृशस्य एव सम्बन्धस्य ज्ञानं भवति चेत् विषयं ज्ञातुम् इच्छुकः तस्य बोधके शास्त्रे ग्रन्थे वा प्रवृत्तः भवति।

## १७.१५ प्रयोजनम् -

अन्तिमः अनुबन्धः प्रयोजनम्। "प्रयोजनम् अनुद्दिश्य न मन्दोऽपि प्रवर्तते"। प्रयोजनम् अज्ञात्वा मन्दबुद्धिः जनः अपि कस्मिन्नपि कार्ये प्रवृत्तः न भवति, बुद्धिमतां का कथा, ते तु अवश्यम् एव प्रवृत्ताः न भविष्यन्ति। "यम् अर्थम् अधिकृत्य प्रवर्तते तत् प्रयोजनम्" इति गौतमीयं सूत्रम् अपि कथयति यत् यं वस्तु अधिकृत्य अर्थात् यस्य वस्तुनः प्राप्तये पुरुषः कस्मिन्नपि कार्ये प्रवृत्तः भवति तत्प्राप्तिः एव तस्य कार्यस्य प्रयोजनम्। कुमारिलभट्टः अपि आह -

**"सर्वस्यैव तु शास्त्रस्य कर्मणो वापि कस्यचित्।**
**यावत् प्रयोजनं नोक्तं तावत् तत् केन गृह्यते।।"इति।**

अतः शास्त्रादौ ग्रन्थादौ वा शास्त्रस्य ग्रन्थस्य वा प्रयोजनम् उक्तं भवति। तस्मात् अनुबन्धचतुष्टये प्रयोजनस्य अन्तर्भावः। वेदान्तशास्त्रस्य किं प्रयोजनम् इति कथयति -

**"प्रयोजनं तु तदैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानन्दावाप्तिश्च।" इति।**

तत्र प्रमाणं प्रदर्शयन्ति "तरति शोकमात्मवित्" इति श्रुतिवाक्येन, "ब्रह्मविद् ब्रह्मैव भवति" इति स्मृतिवाक्येन च। मनुष्यः अनादिकालात् एव ब्रह्मणा सह आत्मनः ऐक्यविषये अज्ञानग्रस्तः अस्ति। स्वरूपानन्दं विस्मृत्य अन्येषु अनित्यवस्तुषु आनन्दस्य अन्वेषणे रतः विद्यते। यदि पुरुषः कथमपि जानाति यत् स सामान्यः नास्ति, साक्षात् ब्रह्म एव अस्ति, आनन्दप्राप्तये अन्यत्र कुत्रापि न गन्तव्यम्, स्वस्वरूपम् एव आनन्ददायकम् अस्ति, किञ्च एतत्सर्वं सः वेदान्तशास्त्रस्य अध्ययनेन ज्ञातुं शक्नोति - तदा सः ब्रह्मणा सह आत्मनः अज्ञाननिवृत्तये तथा स्वस्वरूपानन्दस्य अनुभवाय च निर्बन्धं करोति। तस्मात् सः वेदान्तशास्त्रस्य अध्ययने प्रवृत्तः भवति। एतदेव वेदान्तशास्त्रस्य प्रयोजनं यत् उक्तं ग्रन्थकर्त्रा - तदैक्यप्रमेयगताज्ञाननिवृत्तिः ब्रह्मणा सह आत्मनः ऐक्यविषयकाज्ञानस्य निवृत्तिः तथा स्वस्वरूपानन्दावाप्तिश्च स्वरूपज्ञाने यः आनन्दः तस्य प्राप्तिः। अत्र इदम् अवधेयं यत् ऐक्यगताज्ञाननिवृत्तिः भवति चेत् एव स्वस्वरूपानन्दप्राप्तिः भवति।

## पाठगतप्रश्नाः -६

३८. वेदान्तशास्त्रस्य कः विषयः?

३९. वेदान्तानां तात्पर्यं कुत्र?

४०. जीवब्रह्मैक्यम् इत्यत्र ऐक्यशब्दार्थः कः?

४१. शास्त्रेण सह विषयस्य कः सम्बन्धः?

४२. बोधकशब्दार्थः कः?

४३. वेदान्तशास्त्रस्य किं प्रयोजनम्?

४४. स्वरूपानन्दप्राप्तिः कदा भवति?



## पाठसारः -

शास्त्रस्य ज्ञानात् प्राक् शास्त्रविषयकानुबन्धानां ज्ञानम् आवश्यकम्। अनुबन्धचतुष्टयेषु प्रमाता एव अधिकारी भवति। प्रमाता वेदानाम् आपाततः अर्थं जानीयात्। त्याज्यकर्मणां त्यागं कुर्यात्। नित्यनैमित्तादिकर्माणि आचरेत्। तेन मनःशुद्धिः भवति। मनः शुद्धं भवति चेत् साधनचतुष्टयसम्पादने अवकाशः प्राप्यते। आदौ नित्यानित्यवस्तुविवेकः कर्तव्यः। तेन वैराग्यम् उत्पद्यते। ततः शमादिषु रुचिः वर्धते। ततः मोक्षेच्छा भवति। यस्य मोक्षे इच्छा अस्ति सः एव वेदान्ते अधिकारी।

विषयस्तु जीवब्रह्मणोः ऐक्यप्रतिपादनपरः। अत्र न नीरक्षीरवत् गौणम् ऐक्यं विवक्षितम्, अपि तु घटाकाशमहाकाशवत् मुख्यम् ऐक्यं विवक्षितम्।

सम्बन्धः बोद्ध्यबोधकभावरूपः। अत्र बोद्ध्यं ब्रह्म, शास्त्रं ग्रन्थः वा बोधकः।

प्रयोजनं तु जीवब्रह्मणोः ऐक्यगताज्ञाननिवृत्तिः स्वस्वरूपानन्दप्राप्तिः। अस्य ग्रन्थस्य पठनेन अस्माकं जीवब्रह्मणोः विषये यः भ्रमः विद्यते तस्य नाशः भवति, जीवब्रह्मणोः ऐक्यम् अनुभूयते, तेन स्वरूपानन्दज्ञानेन आनन्दः अनुभूयते।

एवम् अस्मिन् पाठे वेदान्तसारग्रन्थानुसारं वेदान्तस्य अनुबन्धचतुष्टयं समासेन आलोचितम्।

## योग्यतावर्धनम्

- अधिकारीनिरूपणावसरे वेदान्तस्य सारः उक्तः। वेदान्तस्य यथा योग्यः अधिकारी भवेत् तथा चेष्टा विधेया।
- शास्त्रान्तराणाम् अनुबन्धानाम् अन्वेषणेन अस्य पाठस्य यौक्तिकतां वर्धयेत्।

## पाठान्तप्रश्नाः -

१. वेदान्तशास्त्रस्य कः अधिकारी?

२. त्याज्यकर्माणि कानि? विशदम् आलोचयत।

३. नित्यादीन् वर्णयत।

४. साधनचतुष्टयं वर्णयत।

५. शमादिशट्कसम्पत्तिः किमर्थम् अर्जनीया?

६. वेदान्तस्य विषयं प्रतिपादयत।

७. वेदान्तस्य प्रयोजनं किम्।

## पाठगतप्रश्नानाम् उत्तराणि -

**पाठगतप्रश्नाः-१**

१. अधिकारी, विषयः, सम्बनधः प्रयोजनम् - इति चत्वारः अनुबन्धाः।

२. अनु स्वज्ञानात् अनन्तरं बध्नन्ति शास्त्रे ग्रन्थे वा आसज्जयन्ति प्रवर्तयन्ति ये ते अनुबन्धाः - इति अनुबन्धशब्दस्य व्युत्पत्तिः।

३. षड्विधानि आस्तिकदर्शनानि - न्यायः, वैशेषिकः, सांख्यः, योगः, पूर्वमीमांसा उत्तरमीमांसा च।

४. वेदान्तः एव उत्तरमीमांसायाः अपरं नाम।

५. वेदान्तसारः इति एकः वेदान्तशास्त्रस्य प्रकरणग्रन्थः।

**पाठगतप्रश्नाः-२**

६. प्रमाताशब्दस्य अर्थः ज्ञानं लभमानः पुरुषः।

७. वालबोधिनीटीकायाः कर्ता आपदेवः।

८. आपदेवमते प्रमातृशब्दः सदाचारप्रयुक्तब्राह्मणादिपरः।

९. विद्वन्मनोरञ्जनीकारः श्रीरामतीर्थयतिः।

१०. साधनः चतुर्विधः- नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिशट्कसम्पत्तिः, मुमुक्षुत्त्वम्।

११. व्याकरणं, निरुक्तं, ज्योतिषः, शिक्षा, कल्पसूत्रम् छन्दश्शास्त्रं च इति षड् वेदाङ्गानि।

१२. पञ्चदशीग्रन्थस्य रचयिता विद्यारण्यमुनिः।

१३. त्रैवर्णिकानां ब्राह्मण-क्षत्रिय-वैश्यानाम् उपनयनसंस्कारः भवति।

१४. विशुद्धं मनः त्याज्यकर्मणि नियुक्तं न भवति।

**पाठगतप्रश्नाः-३**

१५. त्याजं कर्म द्विविधम् - काम्यकर्म निषिद्धकर्म चेति।

१६. फलोद्देश्येन क्रियमाणानि कर्माणि काम्यानि।

१७. स्वर्गप्राप्तये ज्योतिष्टोमयज्ञः अनुष्टीयते।

१८. नरकाद्यनिष्टसाधनानि ब्राह्मणहननादीनि निषिद्धानि कर्माणि।

१९. निषिद्धकर्मानुष्ठाने नरकाद्यनिष्टसाधनं भवति।

२०. अकरणे प्रत्यवायसाधनानि नित्यकर्माणि। यथा सन्ध्यावन्दनादीनि।

२१. पुत्रजन्माद्यनुबन्धीनि जातेष्ट्यादीनि नैमित्तिकानि कर्माणि।

२२. पापक्षयसाधनानि चान्द्रायणादीनि प्रायश्चित्तानि कर्माणि।

२३. सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि उपासनानि।

२४. नित्यादिकर्मणां मुख्यं फलं बुद्धिशुद्धिः।

२५. नित्यादिकर्मणां गौणं फलं पितृलोकप्राप्तिः सत्यलोकप्राप्तिः।

**पाठगतप्रश्नाः-४**

२६. ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम् एव नित्यानित्यवस्तुविवेकः।

२७. ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानाम् अनित्यत्ववत् आमुष्मिकाणाम् अपि अमृतादिविषयभोगानाम् अनित्यतया तेभ्यो नितरां विरतिः इहामुत्रफलभोगविरागः।

२८. स्वर्गसुखम् अपि अनित्यम् अस्मिन् विषये "तद्यथेह कर्मजितो लोकः क्षीयते एवम् एव अमुत्र पुण्यजितो लोकः क्षीयते" इति श्रुतिः एव प्रमाणभूता।

२९. श्रवणादिव्यतिरिक्तविषयेभ्यः मनसः निग्रहः एव शमः।

३०. बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनं दमः।

३१. निवर्तितानाम् अन्तरिन्द्रियाणां तथा बहिरिन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यः उपरमणम् उपरतिः अथवा विहितानां कर्मणां विधिना परित्यागः एव उपरतिः।

३२. शीतोष्णादिद्वन्द्वसहिष्णुता तितिक्षा।

३३. निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्।

३४. गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा।

**पाठगतप्रश्नाः-५**

३५. मुमुक्षुत्वं हि मोक्षे इच्छा।

३६. विवेकचूडामणेः कर्ता शङ्कराचार्यः।

३७. शमादीनाम् अभावे मोक्षे इच्छा न भवति।

**पाठगतप्रश्नाः-६**

३८. जीवब्रह्मैक्यम् एव वेदान्तशास्त्रस्य विषयः।

३९. जीवब्रह्मणोः ऐक्ये एव वेदान्तानां तात्पर्यम्।

४०. जीवब्रह्मैक्यम् इत्यत्र ऐक्यशब्दार्थः अभेदः।

४१. शास्त्रेण सह विषयस्य बोध्यबोधकभावसम्बन्धः।

४२. बोधस्य जनकः बोधकः, अत्र ग्रन्थः।

४३. जीवब्रह्मैक्यप्रमेयगताज्ञाननिवृत्तिः स्वस्वरूपानन्दावाप्तिश्च प्रयोजनम्।

४४. जीवब्रह्मणोः ऐक्यगताज्ञाननिवृत्तिः भवति चेत् एव स्वस्वरूपानन्दप्राप्तिः भवति।

॥ इति सप्तदशः पाठः ॥

# १८

# निर्गुणं ब्रह्म

## प्रस्तावना

वेदान्तः हि उपनिषत्। सर्वासाम् उपनिषदां ब्रह्मणि एव तात्पर्यम्। एकमेवाद्वयं ब्रह्म। तथापि उपाधिवशाद् द्विविधमिति कल्प्यते, प्रतिपाद्यते च। तद्धि श्रुतिस्मृत्यादिभ्यः द्विविधं ब्रह्म अवगम्यते। सगुणं ब्रह्म निर्गुणं च ब्रह्म। निर्गुणं ब्रह्म सर्वोपाधिविवर्जितं तिष्ठति। तद्ब्रह्म सर्वेषु भूतेषु अनुस्यूततया विद्यमानमस्ति। स एव सर्वं कर्म कारयति। किन्तु निर्गुणं ब्रह्म अकर्तृस्वरूपं भवति। साक्षिरूपेण सर्वत्र स विद्यते। अस्मिन् पाठे निर्गुणं ब्रह्म आलोच्यते।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्-

- निर्गुणब्रह्मणः स्वरूपं किम् इति ज्ञातुं शक्नुयात्।
- वेदान्ते कति प्रमाणानि, के च ते इति वक्तुं शक्ष्यति।
- सर्वासाम् उपनिषदां कुत्र तात्पर्यं इति अवगच्छेत्।
- ब्रह्मणः स्वरूपलक्षणविषये उपनिषदि किमुक्तम् इति जानीयात्।
- ब्रह्मणः स्वप्रकाशत्वं हि किम् इति वक्तुं शक्ष्यति।
- षड्भावविकाराःके सन्ति इति ज्ञातुं शक्नुयात्।
- ब्रह्मशब्दार्थः कः इति अवगच्छेत्।
- कति अनादयः, के च ते इति वक्तुं शक्ष्यति।
- अध्यासस्वरूपं किम् इति ज्ञातुं शक्नुयात्।

## १८.१ ब्रह्मशब्दार्थः

सर्वातिशयरहितं व्यापकम् आत्मतत्त्वमेव ब्रह्म इति वेदान्तेषु गीयते। अतिशयः पृथिव्यादिभूतानां धर्मः भवति। यथा अग्निभूतापेक्षया वायोः सूक्ष्मत्वं, नित्यत्वं च अनुभूयते। किन्तु वायोरपेक्षया आकाशस्य सूक्ष्मता नित्यता च ज्ञायते। अतः पञ्चसु भूतेषु एव अयं तारतम्यभावः वर्तते। आत्मतत्त्वात् अन्यत् न किञ्चित् नित्यं सूक्ष्मं वा उपपद्यते। अतः ब्रह्म एव सर्वातिशयरहितं (निरतिशयं) इत्युच्यते। "बृहत्त्वात् ब्रह्मेति व्युत्पत्तिबलेन अस्ति किमपि महद्वस्तु इति अविशेषेण प्रतीयते"(तै.ब्रह्मानन्दवल्ली- शा.भा १/१)। "बृह्- बृहि वृद्धौ" इति धातोः ब्रह्मशब्दः निष्पन्नः। अतः अतिशयरहितं महत्त्वमेव ब्रह्मशब्देन सूच्यते।

महत्त्वं च यत्र "नान्यत् पश्यति नान्यत् शृणोति स भूमा"(छा.उ ७/२४/१) इत्यादिश्रुतिषु स्पष्टं निगदितम्।

## १८.२ निर्गुणब्रह्मणः लक्षणम्

### १८.२.१ ब्रह्मणः स्वरूपलक्षणम्

वेदान्ते षड्विधानि प्रमाणानि सन्ति। प्रत्यक्षम् अनुमानम् उपमानम् आगमः अर्थापत्तिः अनुपलब्धिः च इति। एतेषां षड्विधानां प्रमाणानां प्रामाण्यं द्विविधं भवति। व्यवहारिकतत्त्वबोधकत्वं पारमार्थिकतत्त्वबोधकत्वं च इति। यस्य व्यवहारकाले बाधः न भवति, किन्तु तत्त्वज्ञाने सति बाधः भवति तदेव व्यवहारिकं तत्त्वम्। यस्य कालत्रये अपि बाधः न सम्भवति तदेव पारमार्थिकं तत्त्वम्। एतस्य तत्त्वद्वयस्य बोधकं भवति प्रमाणम्। अत एव प्रमाणे द्विविधं प्रामाण्यं विद्यते। ब्रह्मस्वरूपविषयकप्रमाणभिन्नप्रमाणानां व्यवहारिकतत्त्वबोधकत्वरूपं प्रामाण्यम्। ब्रह्मस्वरूपविषयकप्रमाणभिन्नानां प्रमाणानां ये विषयाः सन्ति तेषां विषयाणां व्यवहारकाले बाधः न भवति। किन्तु ब्रह्मणः साक्षात्कारे सति तेषां विषयानां बाधः भवति। "सर्वं खल्विदं ब्रह्म"(छान्दोग्योपनिषदि- "३-१४-१)", "आत्मैवेदं सर्वं"(छान्दोग्योपनिषदि- "७-२५-२"), "ब्रह्मैवेदममृतं"(मुण्डकोपनिषदि- "२-२-११"), "सदेव सोम्य इदमग्र आसीत्"(छान्दोग्योपनिषदि- "३-२-१"), "तत्त्वमसि"(छान्दोग्योपनिषदि- "६-८-७"), "अयमात्मा ब्रह्म"(बृहदारण्यकोपनिषदि- "२-५-१९"), "ब्रह्मैवेदममृतं पुरस्ताद्ब्रह्म दक्षितश्चोत्तरेण। अधश्चोर्ध्वञ्च प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठम्॥"[२/२/१२] चेत्यादीनाम् अखण्डचैतन्यतात्पर्यबोधकवेदान्तवाक्यानां पारमार्थिकतत्त्वबोधकत्वरूपं प्रामाण्यम्। एतेषाम् अखण्डचैतन्यतात्पर्यबोधकवेदान्तवाक्यानां जीवब्रह्मैक्यरूपः यः विषयः, तस्य विषयस्य कालत्रये अपि बाधः न भवति। इदं सर्वं जगत् ब्रह्मवस्तु एव। लक्षणप्रमाणाभ्याम् एव वस्तुसिद्धिः। अतः आदौ लक्षणम् उच्यते। लक्षणं द्विविधं भवति। स्वरूपलक्षणं तटस्थलक्षणं च इति। स्वरूपबोधे स्वरूपलक्षणम् एव प्रमाणम्। पुनः उपनिषदि अपि आदौ ब्रह्मणः स्वरूपं निगदितम्। अतः आदौ स्वरूपलक्षणं कथ्यते। तैत्तिरीयोपनिषदः ब्रह्मानन्दवल्ल्यां निगद्यते "ब्रह्मविदाप्नोति परम्। तदेषाभ्युक्ता। सत्यं ज्ञानम् अनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति।"[२/१/१] इति।आनन्दस्वरूपात् ब्रह्मण एव सर्वमिदं समुत्पन्नम्। पुनरपि तैत्तिरीयोपनिषदि उच्यते "आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खलु इमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्ति अभिसंविशन्ति।" इति। सत्यं ज्ञानम् अनन्तम् आनन्दं च इत्यादिकं ब्रह्मणः स्वरूपलक्षणं भवति। ब्रह्मवित्पुरुषः परमं ब्रह्म प्राप्नोति। सत्यं ज्ञानम् अनन्तं ब्रह्म इति परमात्मनः लक्षणार्थकं वाक्यम्। येन रूपेण यद्वस्तु निश्चितं भवति तत् रूपं तत् वस्तु न व्यभिचरति चेत् तत् सत्यं भवति। ब्रह्म कूटस्थं भवति। तस्य स्वरूपात् कदापि च्युतिः न सम्भवति। विकारभूतं सर्वं मिथ्या भवति। अतः तत् ब्रह्म न मिथ्याभूतम्। तैत्तिरीयोनिषद्भाष्ये भगवता शङ्कराचार्येण कथ्यते "सत्यमिति- यद्रूपेण यन्निश्चितं, तद्रूपं न व्यभिचरति चेत्तत् सत्यम्। यद्रूपेण यत् निश्चितं, तद्रूपं व्यभिचरत् तदनृतमित्युच्यते। अतः विकारोऽनृतं, 'वाचारम्भणं विकारो नामधेयं मृत्तिका इत्येव सत्यम्' एवं सदेव सत्यमिति अवधारणात्" इति। अत्र

सत्यं ज्ञानम् अनन्तं च इति त्रीणि पदानि ब्रह्मणः विशेषणानि। पुनः च विशेष्यं भवति ब्रह्म। अस्माभिः ब्रह्म एव ज्ञातव्यम्। ज्ञातव्यरूपेण ब्रह्मणः एव विवक्षितत्वात् ब्रह्म विशेष्यम्। अत्र विशेषणविशेष्यभावो विद्यते। अतः सत्यं ज्ञानम् अनन्तं ब्रह्म चेति समानाधिकरणानि पदानि सन्ति।

ननु एकजातीयं बहु द्रव्यं विशेषणैः विशेषितं भवति चेत् तत् युक्तियुक्तं भवति। कारणं हि विशेष्यनिर्धारणार्थं विशेषणानां सार्थक्यं भवति। किन्तु अत्र तु विशेष्यं ब्रह्म एकमेव वस्तु, न बहु। अतः विशेष्यस्य ब्रह्मणः विशेषणानि अप्रयोजनानि इति आशङ्कायां सत्याम् उच्यते तत् न भवति। अत्र लक्षणायाः निर्देशः एव विशेषणप्रयोगस्य उद्देश्यम्। एतानि विशेषणानि लक्षणार्थानि, न विशेषणप्रधानानि। विशेषणानि सजातीयेभ्यः एव व्यावर्तकानि भवन्ति। किन्तु लक्षणानि सजातीयविजातीयादिभ्यः सर्वेभ्यः व्यावर्तकानि भवन्ति। तैत्तिरीयोपनिषदः ब्रह्मानन्दवल्ल्यां भगवता शङ्कराचार्येण निगद्यते "न, लक्षणार्थत्वात् विशेषणानाम्। नायं दोषः। कस्मात् ? लक्षणार्थप्रधानानि विशेषणानि, न विशेषणप्रधानानि एव। कः पुनः लक्षणलक्ष्ययोः विशेषणविशेष्ययोः वा विशेषः ? उच्यते सजातीयेभ्यः एव निवर्तकानि विशेषणानि विशेष्यस्य, लक्षणं तु सर्वतः एव, यथा अवकाशप्रदात्राकाशमिति। लक्षणार्थञ्च वाक्यम् इति अवोचाम" इति।

जगदिदं ब्रह्मणः एव विवर्तरूपम्। जगतः अभिन्ननिमित्तोपादानकारणं ब्रह्म। यथा घटकारणं भवति मृत्तिका, मृत्तिका च अचेतनस्वभावा भवति। तथैव जगत्कारणं ब्रह्म अपि मृत्तिकावत् अचेतनस्वभावं भवति इति आशङ्कायां सत्याम् उच्यते ज्ञानस्वरूपं ब्रह्म इति। चैतनस्वरूपं ब्रह्म। तैत्तिरीयोपनिषदः ब्रह्मानन्दवल्ल्यां भगवता शङ्कराचार्येण निगद्यते "कारणस्य च कारकत्वम्, वस्तुत्वात् मृद्वदचिद्रूपता प्राप्ता, अतः इदमुच्यते- ज्ञानं ब्रह्म इति। ज्ञानं ज्ञप्तिरवबोधः, भावसाधनो ज्ञानशब्दः, न तु ज्ञानकर्तृ, ब्रह्मविशेषणत्वात् सत्यानन्ताभ्यां सह।" इति। तृतीयं लक्षणप्रधानं विशेषणं भवति अनन्तम्। त्रिविधम् आनन्त्यं सम्भवति। देशतः कालतः वस्तुतः च। यथा आकाशः देशतः अनन्तः। किन्तु कालेन वस्तुना च आकाशः अनन्तः न भवति। कारणं हि आकाशः जन्यः भवति। सर्वे जन्यपदार्थाः कालेन वस्तुना च परिच्छिन्नाः। ब्रह्म अकार्यं वस्तु। अतः न कालेन ब्रह्म परिच्छिद्यते। वस्तुनापि अनन्तं ब्रह्म। कारणं हि सर्वेभ्यः वस्तुभ्यः अपृथक् ब्रह्म। यत् वस्तु अन्यवस्तुभ्यः भिद्यते चेत् तत् वस्तु अन्यवस्तुनः अन्तः अर्थात् निवृत्तिकारकं भवति। वस्तुषु भेदः तिष्ठति चेदेव एकवस्तुविषयकबुद्धिः अन्यवस्तुभ्यः निवृत्ता भवति। सर्ववस्त्वनन्यत्वात् एव वस्तुना अपि अनन्तं ब्रह्म। तैत्तिरीयोपनिषदः ब्रह्मानन्दवल्ल्यां भगवता शङ्कराचार्येण कथ्यते "तद्यथा देशतः अनन्तः आकाशः, न हि देशतः तस्य परिच्छेदोऽस्ति। न तु कालतश्च आनन्त्यं वस्तुतश्चाकाशस्य। कस्मात् ? कार्यत्वात्। नैवं ब्रह्मणः आकाशवत् कालतोऽपि अन्तवत्त्वम्, अकार्यत्वात्। कार्यं हि वस्तु कालेन परिच्छिद्यते, अकार्यं च ब्रह्म। तस्मात् कालतोऽस्ति आनन्त्यम्। तथा वस्तुतः। कथं पुनः वस्तुतः आनन्त्यम् ? सर्वानन्यत्वात्।" इति। पुनः च ब्रह्म स्वप्रकाशस्वरूपं भवति। ब्रह्मणः एव प्रकाशेन सर्वं प्रकाश्यते। सूर्यचन्द्रादयः अपि तस्य एव प्रकाशेन प्रकाशमानाः भवन्ति। अतः एव मुण्डकोपनिषदि निगद्यते "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति"[२/२/११] इति। भगवता चित्सुखिना तत्त्वप्रदीपिकायां स्वप्रकाशलक्षणमुच्यते "अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वम्" इति।

आचार्योक्तं लक्षणं स्वीक्रियते चेत् भाविभूतघटादिषु नित्यानुमेयधर्मादिषु च अतिव्याप्तिः। तदा उच्यते एवं न भवति। अनुमानागमाभ्याम् एते घटाः धर्माः च वेद्याः भवन्ति। अतः घटादिषु वेद्यत्वम् अस्ति। अतः केवलं अवेद्यत्वमात्रं लक्षणं क्रियते चेदलमिति पूर्वपक्षी। अधुना सिद्धान्ती कथयति अत्र वेद्यत्वं हि फलव्याप्यत्वम्। अवेद्यत्वं हि फलव्याप्यत्वरूपवेद्यत्वाभावः। विषयावच्छिन्नम् अभिव्यक्तं चैतन्यं फलम्। धर्मादिषु फलव्याप्यत्वं नास्ति। अतीन्द्रियाः धर्मादयः। अतः धर्मादिषु इन्द्रियसन्निकर्षाभावात् विषयावच्छिन्नरूपं फलं नास्ति। फलव्याप्यत्वाभावः धर्मादिषु अस्ति। अतः अवेद्यत्वं धर्मादिषु विद्यते। एवम् अवेद्यत्वमात्रं लक्षणं क्रियते चेत् धर्मादिषु अतिव्याप्तिः। अतः अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वम् इति सम्पूर्णं लक्षणं वक्तव्यम्। इन्द्रियद्वारा अन्तःकरणं विषयदेशं प्रति गत्वा विषयाकारेण यदा परिणमते तदा अन्तःकरणपरिणामविशेषरूपविषयः वेद्यः भवति। धर्मस्तु अतीन्द्रियः। अन्तःकरणपरिणामविशेषः धर्मस्य न सम्भवति। अतः धर्मः न वेद्यः। ननु धर्मादिषु फलव्याप्यत्वं नास्ति चेदपि योगीनां कृते धर्माः प्रत्यक्षाः भवन्ति खलु इति चेन्न, योगीनां सकाशे धर्माः वेद्याः न भवन्ति। ननु योगिनः यदि धर्मान् न प्रत्यक्षीकुर्वन्ति तर्हि ते सर्वज्ञाः कथम् ? तदा कथ्यते योगीनां सर्वज्ञत्वे सर्वद्रष्टृत्वं प्रयोजकं नास्ति। इन्द्रियैः दर्शनश्रवणमननयोग्यानां पदार्थानाम् एव प्रत्यक्षत्वे योगीनां सामर्थ्यं विद्यते, न तु दर्शनश्रवणमननायोग्यपदार्थानां प्रत्यक्षत्वे। इन्द्रियैः दर्शनश्रवणमननयोग्यानां पदार्थानाम् एव प्रत्यक्षत्वे योगीनां सामर्थ्यविद्यमानात् ते योगिनः सर्वज्ञाः इत्युच्यते। कुमारिलभट्टैः श्लोकवार्तिके निगदितं "यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्। दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता॥" इति। प्रत्येकम् इन्द्रियं स्वस्वविषयान् प्रत्यक्षीकर्तुं समर्थमस्ति। किन्तु इन्द्रियाणां स्वविषयान् उल्लङ्घ्य अन्येन्द्रियविषयान् प्रत्यक्षीकर्तुं सामर्थ्यं नास्ति। यथा चक्षुः रूपं परित्यज्य शब्दं साक्षात्कर्तुं न शक्नोति। अधुना पूर्वपक्षी कथयति यत् अज्ञानान्तःकरणेच्छादिषु फलव्याप्यत्वाभावात् अर्थात् वेद्यत्वाभावात् अवेद्यत्वम् अस्ति इति कारणात् अस्य लक्षणस्य अज्ञानादिषु अतिव्याप्तिः। पुनः अहम् अज्ञः इत्येवम् अपरोक्षव्यवहारोऽपि अस्ति। एवम् आशङ्कायां सत्यां समाधानम् उच्यते अज्ञानादिषु अवेद्यत्वम् अस्ति चेदपि अपरोक्षव्यवहारयोग्यत्वं नास्ति। कारणं हि अज्ञानादिकं ब्रह्मणि कल्पितं भवति। ब्रह्मणः अपरोक्षप्रतीतिर्भवति। अतः तदपरोक्षप्रतीत्याभासः अज्ञानादिषु पतति, न तु अज्ञानादीनां साक्षात् अपरोक्षप्रतीतिः भवति। "यत्साक्षादपरोक्षाद्ब्रह्म" इति बृहदारण्यकोपनिषद्गता श्रुतिरत्र मानम्। ननु अज्ञानादिषु अपरोक्षशब्दस्य व्यवहारः सम्भवति खलु। अतः व्यवहारवशात् अज्ञानादीनां कल्पितम् अपरोक्षव्यवहारयोग्यत्वमस्ति इति स्वीक्रियताम्। तदा सिद्धान्ती कथयति भ्रमकाले शुक्तौ रजतव्यवहारः भवति चेदपि शुक्तौ रजतव्यवहारयोग्यता नास्ति। तथैव अज्ञानादिषु अपरोक्षशब्दव्यवहारे सत्यपि अपरोक्षव्यवहारयोग्यत्वं नास्ति। अपरोक्षव्यवहारयोग्यत्वं घटादिषु वर्तते। किन्तु अवेद्यत्वं घटादिषु नास्ति। अतः घटपटादिव्यावृत्त्यर्थम् अवेद्यत्वम् इति विशेषणं देयम्। केचन पूर्वपक्षिणः कथयन्ति यत् ब्रह्मणः अवेद्यत्वात् कथम् अपरोक्षव्यवहारयोग्यत्वमिति संशये सति उच्यते अवेद्यत्वात् ब्रह्मणः अपरोक्षव्यवहारविषयत्वाभावः इत्येवमत्र अनिष्टप्रसक्तिरुच्यते भवद्भिः पूर्वपक्षिभिः ? उत व्यवहारविषयत्वात् एव ब्रह्मणः वेद्यत्वानुमानं क्रियते ? आदौ अनिष्टप्रसक्तिः वक्तुं न शक्यते। कारणं हि नैयायिकानां मते आपाद्यापादकयोः अप्रसिद्धत्वात्। अत्र आपादकः वेद्यत्वाभावः, आपाद्यः

अपरोक्षव्यवहारविषयत्वाभावः। नैयायिकानां मते वेद्यत्वम् अपरोक्षव्यवहारविषयत्वं च केवलान्वयिनः धर्मो भवति। अतः तयोः वेद्यत्वापरोक्षव्यवहारविषयत्वयोः अभावः कुत्रापि प्रसिद्धः नास्ति। अतः केनापि कोऽपि आपाद्यः न भवति। अतः "अवेद्यत्वे सति अपरोक्षव्यवहाययोग्यत्वम्" इति लक्षणं साधु एव। सत्यज्ञानानन्दादयः ब्रह्मणः धर्माः न भवन्ति। सत्यज्ञानादयः ब्रह्मणः स्वरूपं भवति चेत्ते धर्मिणः भवन्ति। धर्मी कदापि धर्मः लक्षणं च न भवति। कारणं हि असाधारणधर्मः लक्षणं भवति। अतः सत्यज्ञानादिकं कथं ब्रह्मणः स्वरूपलक्षणम् इति प्रश्ने सति उच्यते वेदान्तपरिभाषाकारेण धर्मराजाध्वरीन्द्रेण "स्वस्यैव स्वापेक्षया धर्मिधर्मभावकल्पनया लक्ष्यलक्षणत्वसम्भवात्" इति। यदि वस्तुनः स्वरूपं स्वमपेक्ष्य भिन्नं भवति तर्हि स्वरूपे धर्मधर्मिभावः लक्ष्यलक्षणभावः वा कल्पयितुं शक्यः। यद्ब्रह्म तदेव सत्यज्ञानानन्दस्वरूपम्। तेषां परस्परं लेशतः अपि भेदः नास्ति। सत्यं यदि चिद्भिन्नं भवेत् तर्हि जडं स्यात्। चिदपि सत्यतः भिन्नं भवेत् चेत् चित् मिथ्या स्यात्। ब्रह्मणि कथिते सत्यज्ञानादीनामपि ग्रहणं भवति। यद्यपि सत्यज्ञानादिषु बिन्दुमात्रेणापि भेदलेशः नास्ति तथापि चिदाकारान्तःकरणवृत्तौ अचिद्व्यावृत्ताकारः यदा आरूढः तदा सत्यज्ञानादीनां भेदः कल्प्यते। अतः एव पद्मपादाचार्येण पञ्चपादिकायां निगदितं यत् "आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः। अपृथकत्वेऽपि चैतन्यात् पृथगिव अवभासन्ते॥" इति।

## १८.३ ब्रह्मणि प्रमाणानपेक्षत्वम्

सर्वे लौकिकाः वैदिकाः च प्रमाणप्रमेयव्यवहाराः आत्मानात्मनोः इतरेतराध्यासं पुरस्कृत्य एव भवन्ति। अध्यासः हि स्मृतिरूपः परत्र पूर्वदृष्टावभासः। अध्यासः द्विविधः। अर्थाध्यासः ज्ञानाध्यासश्चेति। अर्थाध्यासपक्षे स्मृतिरूप इत्यस्य अर्थस्तावत् स्मर्यते इति स्मृतिरर्थात् यदेव स्मर्यते तदेव स्मृतिः। अस्मिन् अर्थे स्मृ इत्यस्मात्परं कर्मवाच्ये क्तिन्-प्रत्ययं कृत्वा स्मृतिशब्दः निष्पन्नः। एवं स्मृतिशब्दस्य स्मर्यमाणं वस्तु इत्यर्थः। परत्रशब्दस्य अन्यस्मिन् अधिकरणे इत्यर्थः। अर्थात् यस्मिन् अधिकरणे यन्न तिष्ठति तादृशे अधिकरणे इत्यर्थः। अव इति उपसर्गपूर्वकं भास्-धातोः कर्मवाच्ये अच्-प्रत्यये कृते सति अवभासशब्दः निष्पन्नः। अर्थात् यत् प्रकाशितं भवति तदेव अवभासः। पूर्वदर्शनात् अवभासः पूर्वदृष्टावभासः इत्येवं पञ्चमीतत्पुरुषसमासे कृते सति अर्थः भवति यत्पूर्वजन्यसंस्कारवशात् यत्प्रकाशितं भवति तदेव पूर्वदृष्टावभास इति। अर्थाध्यासपक्षे समग्रस्य अध्सासलक्षणस्य अर्थस्तावत् अन्यस्मिन् अधिकरणेऽर्थात् रज्ज्वादौ, स्मर्यमाणव्यवहारिकसर्पादिपदार्थ इव पूर्वजन्यसंस्कारवशात् यत्प्रातिभासिकसर्पादि प्रकाशितं भवति तदेव अर्थाध्यासः। ज्ञानाध्यासपक्षे स्मृतिरूपपदस्य स्मरणमेव स्मृतिरित्यर्थः। अस्मिन् अर्थे भाववाच्ये क्तिन्-प्रत्ययं कृत्वा स्मृतिरिति पदं निष्पन्नम्। स्मृतिरूपपदस्य स्मरणज्ञानस्य सदृशं ज्ञानमित्यर्थः। ज्ञानाध्यासपक्षे समग्रस्य अध्यासलक्षणस्य अर्थस्तावत् अन्यस्मिन् अधिकरणे स्मृतिरूपज्ञानस्य सदृशं यज्ज्ञानं पूर्वदर्शनात् उत्पद्यते तदेव ज्ञानाध्यासः। परत्र इति पदम् अधिष्ठानं सत्यमिति सूचयति। आरोप्यवस्तुनः पूर्वज्ञानमध्यासोपयोगि भवति, न तु वर्तमानवस्तुसत्ता इति दृष्टपदेन सूच्यते। परत्र पूर्वदृष्टावभासः इत्येवं लक्षणं क्रियते चेत् "सेयं गौः", "सोऽयं देवदत्तः" चेत्यादिप्रत्यभिज्ञायामतिव्याप्तिः। एतदतिव्याप्तिवारणाय स्मृतिरूपः इति पदं देयम्। स्मृतौ वस्तु

असन्निहितं भवति। किन्तु प्रत्यभिज्ञायां वस्तु सन्निहितं भवति। अध्यासः मिथ्याज्ञाननिमित्तः भवति। मिथ्याज्ञानम् अध्यासं प्रति कारणम्। अध्यासस्य फलं लोकव्यवहारः। लोकव्यवहारं प्रति कारणम् अध्यासः। अत एव भगवत्पादैः शङ्कराचार्यैरध्यासभाष्ये निगदितं यत् "एवम् अनादिरनन्तः नैसर्गिक अध्यासः मिथ्याप्रत्ययरूपः कर्तृत्वभोक्तृत्वप्रवर्तकः सर्वलोकप्रत्यक्षः" इति।अध्यासस्य अनाद्यविद्याकत्वात् अनादित्वम्। ज्ञानं विना अध्यासः न नश्यति इत्यत अध्यासस्य आनन्त्यम्। एवं लक्षणमध्यासं पण्डिताः अविद्या इति मन्यन्ते। अध्यस्तपदार्थनिषेधेन अधिष्ठानरूपवस्तुस्वरूपावधारणं विद्याम् आहुः। प्रत्यक्षादीनि सर्वाणि प्रमाणानि अविद्यावद्विषयानि भवन्ति। प्रमाणानाम् अविद्यावद्विषयत्वं प्रत्यक्षसिद्धमेव। देहेन्द्रियादिषु अहंममाभिमानरहितस्य पुरुषस्य प्रमातृत्वं नास्ति। प्रमातृत्वानुपपत्तौ सत्यां प्रमाणानाम् अपि प्रवृत्त्यनुपपत्तिः। शुद्धात्मनि प्रमातृत्वप्रमेयत्वादयः न सन्ति। अविद्याम् एव आश्रित्य प्रमातृत्वप्रमेयत्वादिव्यवहाराः सम्भवन्ति। अतः निर्विशेषे निराकारे विशुद्धे च ब्रह्मणि प्रमाणानाम् अपेक्षा नास्ति। अतः एव अध्यासभाष्ये शङ्कराचार्येण निगद्यते "कथं पुनः अविद्यावद्विषयानि प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च इति। उच्यते देहेन्द्रियादिषु अहंममाभिमानरहितस्य प्रमातृत्वानुपपत्तौ प्रमाणप्रवृत्त्यनुपपत्तेः। न हि इन्द्रियाणि अनुपादाय प्रत्यक्षादिव्यवहारः सम्भवति। न च अधिष्ठानमन्तरेण इन्द्रियाणां व्यवहारः सम्भवति। न च अनध्यस्तात्मभावेन देहेन कश्चित् व्याप्रियते। न च एतस्मिन् सर्वस्मिन् असति असङ्गस्य आत्मनः प्रमातृत्वमुपपद्यते। न च प्रमातृत्वमन्तरेण प्रमाणप्रवृत्तिरस्ति। तस्मात् अविद्यावद्विषयाणि एव प्रत्यक्षादीनि प्रमाणानि शास्त्राणि च " इति। अत्र भगवत्पादानामेवमाशयः देहेन्द्रियादिषु अहंममाभिमानरहितः यः पुरुषोऽस्ति, तादृशस्य पुरुषस्य "अहं कर्ता, अहं ज्ञाता, अहं भोक्ता"इत्येवं प्रमातृत्वमपि न विद्यते। प्रमातृत्वं यस्मिन् पुरुषे नास्ति, तादृशस्य पुरुषस्य यानि इन्द्रियाणि सन्ति, तेषामिन्द्रियाणां स्वस्वविषयग्रहणे प्रवृत्तिरपि न भवति। इन्द्रियाणां प्रवृत्तिः न भवति चेत् प्रत्यक्षादिव्यवहारा अपि न सम्भवन्ति। अधिष्ठानं देहं विना इन्द्रियाणां व्यवहारः न सम्भवति। यस्मिन् देहे कर्तृत्वभोक्तृत्वाद्यध्यस्तात्मभावो वर्तते, तस्य देहस्य सर्वस्मिन् व्यापारे प्रवृत्तिः भवति। यस्मिन् देहे आत्मभाव अध्यस्तः नास्ति तेन देहेन कश्चिदपि न व्याप्रियते। आत्मानात्मनोः ज्ञानसम्पन्नस्य शास्त्रादौ च पारदर्शिनः भ्रमज्ञानशून्यस्य प्रमाणप्रमेयव्यवहारः दृष्टः। अतः प्रमाणप्रमेयव्यवहारः न केवलमविद्यायुक्तपुरुषस्य सम्भवति इत्याशङ्कायाः निवारणार्थं भगवत्पादैः शङ्कराचार्यैरध्यासभाष्ये उक्तं यत् "पश्वादिभिश्च अविशेषात्" इति। शब्दादिभिः सह श्रोत्रादीनां सम्बन्धे सति शब्दादिविज्ञानं प्रतिकूलं भवति चेत्ततः पश्वादयः पलायन्ते, शब्दादिविज्ञानम् अनुकूलं भवति चेत्प्रवर्तन्ते। यथा दण्डोद्यतकरं पुरुषम् अभिमुखं प्राप्य "मां हन्तुमयमिच्छति" इति चिन्तयित्वा पलायन्ते। पुनः हरिततृणपूर्णपाणिम् अभिमुखमुपलभ्य तं प्रति अभिमुखीभवन्ति। तथैव व्युत्पन्नचित्ता अपि पुरुषाः क्रूरदृष्टीन् बलवतः दण्डोद्यतकरान् पुरुषान् दृष्ट्वा पलायन्ते। पुनश्च तद्विपरीतान् प्रति प्रवर्तन्ते। शास्त्रीयव्यवहारे कर्मानुष्ठानकारी आत्मनः परलोकसम्बन्धं ज्ञात्वा एव प्रवर्तते। आत्मज्ञानस्य कर्मानुष्ठाने उपयोग एव नास्ति। आत्मज्ञाने प्राप्ते सति कर्मणि अधिकार एव न सम्भवति। आत्मज्ञानात् पूर्वं प्रवर्तमानं शास्त्रम् अविद्यायुक्तं पुरुषमाश्रयति, न तु आत्मज्ञानात्परम्। शास्त्रीयकर्माधिकारे वेदान्तवेद्यं क्षुधादिरहितं ब्राह्मणक्षत्रियादिजातिभेदशून्यम् असंसारि आत्मतत्त्वं न अपेक्षते। परमार्थत आत्मा षड्भावविकाररहितः।

जायते अस्ति वर्धते विपरिणमते अपक्षीयते विनश्यति चेति षड्भविकाराः भवन्ति। श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन उच्यते "न जायते म्रियते वा कदाचिन्नायं भूत्वाऽभविता वा न भूयः। अजो नित्यः शाश्वतोऽयं पुराणो, न हन्यते हन्यमाने शरीरे॥"[२/२०] इति। अस्य श्लोकस्य अर्थस्तावत् आत्मा कदापि न उत्पद्यते। आत्मा कदापि न म्रियतेऽर्थात् आत्मनि विनाशलक्षणा विक्रिया नास्ति एव। आत्मा भवनक्रियामनुभूय पश्चात् अभावं प्राप्स्यति इति कदापि न सम्भवति। अर्थात् यः भुत्वा परं तिष्ठति स म्रियते इत्युच्यते लोके। किन्तु आत्मा कदापि न म्रियते इति कारणात् आत्मा नित्यः भवति। पुनः यः अभूत्वा परं भवति स जायते इति उच्यते लोके। किन्तु आत्मा कदापि न जायते। अपक्षयलक्षणा विक्रिया आत्मनि नास्ति। कारणं हि आत्मा स्वरूपतः निरवयवः निर्गुणश्च। निर्गुणत्वात् एव आत्मनः गुणक्षयेण अपक्षयः न सम्भवति। अत एव भगवत्पादैः शङ्कराचार्यैः निगद्यते "शाश्वत इति अपक्षयलक्षणा विक्रिया प्रतिषिध्यते शश्वद्भवः शाश्वतः। न अपक्षीयते स्वरूपेण, निरवयवत्वात्, निर्गुणत्वात् च नापि गुणक्षयेण अपक्षयः" इति। य अवयवसंयोगेन उपचीयते स वर्धते इति अभिनवः कथ्यते। आत्मा निरवयवत्वात् पुरा अपि नव एव अर्थात् आत्मा न वर्धते। शरीरे विपरिणम्यमाने अपि आत्मा कदापि न विपरिणमते। अर्थात् सर्वप्रकारविक्रियारहित आत्मा इति वाक्यार्थः। श्रुत्यादिषु अपि एवमेव श्रूयते। कठोपनिषदि उच्यते "न जायते म्रियते वा विपश्चित् नायं कुतश्चिन्न बभूव कश्चित्। अजो नित्यः शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥"[१/२/१८] इति। अपि च परब्रह्मणः निर्गुणत्वविषये श्वेताश्वतरोपनिषदि निगद्यते "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च"[६/११] इति। अस्याः श्रुतेराशयस्तावत् परब्रह्म सर्वेषु भूतेषु अनुस्यूततया विद्यमानमस्ति। स एव सर्वं कर्म कारयति। साक्षिरूपेण सर्वत्र स विद्यमानस्तिष्ठति। अविद्याजन्याः गुणा अपि तम् आत्मानं न स्पृशन्ति, निर्गुणस्वरूपत्वात्। सर्वेषामधिष्ठानभूतं तद् ब्रह्म एव। स एव परमात्मा सर्वेषां चेतयिता भवति। पुनरपि श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन कथ्यते "सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्। असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च॥"[१३/१४] इति। सर्वेषां जडानाम् इन्द्रियाणां गुणव्यापारैः सङ्कल्पाध्यवसायश्रवणवचनादिभिः ज्ञेयं ब्रह्म अवभासते। स्वरूपतः तद्ब्रह्म सर्वेन्द्रियविवर्जितम् अर्थात् सर्वकरणरहितम्। यद्यपि सर्वेन्द्रियैः तद्विषयकगुणैः च असंश्लिष्टं ब्रह्म। तथापि सर्वदृश्यानाम् आस्पदं गुणभोक्तृ च तद् ब्रह्म। श्रीमद्भगवद्गीतायाः क्षेत्रक्षेत्रज्ञाध्याये उच्यते "अनादित्वान्निर्गुणत्वात् परमात्माऽयमव्ययः। शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते॥"[१३/३१] इति। परमात्मा अनादिः भवति। अनादेः भाव अनादित्वम्। परमात्मन आदिः कारणं न विद्यतेऽतः परमात्मा अनादिर्भवति। परमात्मनोऽनादित्वविषये पञ्चदश्याः चित्रदीपप्रकरणे निगदितं "जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा। अविद्या तच्चितोर्योगः षडस्माकम् अनादयः॥" इति। यस्य आदिः कारणं विद्यते तत् स्वेन आत्मना व्येति। अयं परमात्मा अनादित्वात् एव निरवयवः। यत् सगुणं भवति तत् गुणव्ययात् व्येति। सत्त्वरजस्तमोगुणरहितत्वात् परमात्मा न व्येति। अत एव परमात्मा अव्ययः। शरीरेषु परमात्मन उपलब्धिर्भवति इति कारणात् परमात्मा यद्यपि शरीरस्थ कथ्यते तथापि कार्याकरणात् तत्फलेन परमात्मा नैव लिप्यते। अस्मिन् श्लोकभाष्ये भगवत्पादैः शङ्कराचार्यैः निगद्यते यत् "तथा 'निर्गुणत्वात्' सगुणो हि गुणव्ययात् व्येति। अयं तु निर्गुणत्वात् न व्येति इति 'परमात्मा अयम् अव्ययो' न अस्य व्ययो

विद्यते इति अव्ययः। यत एवम् अतः 'शरीरस्थोऽपि' शरीरेषु आत्मनः उपलब्धिर्भवति इति शरीरस्थ उच्यते तथापि 'न करोति'। तदकरणात् एव तत्फलेन 'न लिप्यते'" इति। तस्मिन् ज्ञानस्वरूपे आत्मनि प्रमाणानपेक्षत्वं वर्तते। अतः एव श्रीमद्भगवद्गीताभाष्ये शङ्कराचार्यैरुच्यते "सिद्धे हि आत्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणा न भवति"[२/१८] इति भाष्यवाक्यात् आत्मनि प्रमाणापेक्षा नास्ति। किन्तु आत्मज्ञाने सति सर्वभूतेषु आत्मानमेव पश्यति खलु इत्येवं प्रश्ने सति उच्यते सर्वमिदं ब्रह्मैव। तादृश्याम् अवस्थायाम् ब्रह्मविदात्मानमेव प्रत्यक्षीकुर्वन्ति। अतस्तस्यामवस्थायां प्रत्यक्षप्रमाणं तत्रास्ति। "यत्साक्षादपरोक्षाद्ब्रह्म"[३/४/१] इति बृहदारण्यकोपनिषद्गता श्रुतिः मानम्।

## पाठगतप्रश्नाः

१. ब्रह्मणः स्वरूपलक्षणविषयिणी श्रुतिः का ?

२. ब्रह्मणः आनन्दस्वरूपत्वे श्रुतिः का ?

३. ब्रह्मणि प्रमाणानपेक्षत्वविषये शङ्कराचार्येण किमुक्तम् ?

४. शास्त्रज्ञैरपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषणं न कर्तव्यमित्यत्र शङ्कराचार्योक्तं वाक्यं किम् ?

५. अविद्यायाः त्रिगुणात्मकत्वे का श्रुतिः प्रमाणम् ?

६. ब्रह्मणः स्वप्रकाशत्वे का श्रुतिः मानम् ?

७. अनादीनां विषये विद्यारण्यस्वामिना किमुक्तम् ?

८. परमात्मनः निर्गुत्वप्रतिपादिनी श्रुतिः का ?

९. परमात्मनः निर्गुत्वप्रतिपादिनी स्मृतिः का ?

१०. लक्षणविशेषणयोः भेदं दर्शयतु ?

११. अध्यासः कः ?

१२. अध्यासलक्षणे स्मृतिरूपपदस्य अनुपादाने कुत्र अतिव्याप्तिः ?

१३. सर्वाणि शास्त्राणि प्रमाणानि च किं नातिवर्तन्ते ?

१४. पण्डिताः कीदृशीं विद्याम् आहु ?

१५. अध्यासस्य कथम् आनन्त्यत्वम् ?

१६. अध्यासस्य फलं किम् ?

१७. ज्ञानाध्यासपक्षे समग्रस्य अध्यासलक्षणस्य अर्थः कः ?

१८. अर्थाध्यासपक्षे समग्रस्य अध्यासलक्षणस्य अर्थः कः ?

१९. आत्मनः धर्मविषये पद्मपादाचार्येण किमुक्तम् ?

## पाठसारः

आत्मा एव इदं सर्वम्। किन्तु सर्वत्र वयम् आत्मानं द्रष्टुं न शक्नुमः। कारणं हि अस्मासु अविद्या वर्तते। सा अविद्या त्रिगुणात्मिका भवति। श्वेताश्वतरोपनिषदि उच्यते "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥"[४/५] इति। सा अविद्या अस्माभिः परित्यक्तव्या। तस्याः अविद्यायाः परित्यागाय ब्रह्मज्ञानम् आवश्यकम्। ब्रह्मज्ञानप्राप्त्यर्थं गुरोः सकाशं गमनीयम्। कारणं हि गुरुः अज्ञानस्य नाशकः भवति।शास्त्रपारदर्शिनः अपि स्वबुद्धिबलेन आत्मज्ञानस्य अन्वेषणं न कुर्युः। अतः एव मुण्डकोपनिषदि भगवता शङ्कराचार्येण निगदितं "शास्त्रज्ञोऽपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषणं न कुर्यात् इति एतद्गुरुमेव अवधारणफलमिति"[१/२/१२] इति। अस्मिन् देहे स्थित्वा एव अस्माभिः जन्म वशीकर्तव्यम्। अस्मिन् देहे स्थित्वा ये जन्म जितवन्तः तेषाम् अन्तःकरणं सर्वभूतेषु ब्रह्मणि निश्चलीभूतं विद्यते। अर्थात् ते ब्रह्मणि एव स्थिताः भवन्ति। ते तदा आत्मना आत्मनि आत्मानम् अनुभवन्ति। तस्यैव स्वयंप्रकाशस्वरूपस्य ब्रह्मणः प्रकाशेन सर्वे वयं प्रकाशवन्तः। "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥"[२/२/११] इति मुण्डकोपनिषद्गता श्रुतिस्तत्र मानम्। पुनश्च जीवब्रह्मणोः अविद्याकल्पितभेदे सति अपि परमार्थतः अभेदे एव सर्वेषां वेदान्तानां तात्पर्यम्।

## अधिगतविषयाः

- सत्यं ज्ञानम् अनन्तम् आनन्दं च इत्यादिकं ब्रह्मणः स्वरूपलक्षणम्।
- जगतः अभिन्ननिमित्तोपादानकारणं ब्रह्म।
- "अवेद्यत्वे सति अपरोक्षव्यवहारयोग्यत्वम्" इति स्वप्रकाशलक्षणम्।
- जीवब्रह्मणोः भेदोऽविद्यया कल्पितो वर्तते।
- ज्ञानस्वरूपे आत्मनि प्रमाणानपेक्षत्वम्।
- निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं च निर्गुणब्रह्मणः स्वरूपम्।
- सर्वत्र सर्वदा एव ब्रह्म विराजमानं वर्तते।
- सत्यं ज्ञानम् अनन्तं च इति ब्रह्मणः एतानि विशेषणानि लक्षणार्थानि, न विशेषणप्रधानानि।
- अध्यासः हि स्मृतिरूपः परत्र पूर्वदृष्टावभासः।
- सर्वाणि शास्त्राणि प्रमाणानि च अविद्यावद्विषयत्वं नातिवर्तन्ते।

## पाठान्तप्रश्नाः

१. ब्रह्मणि प्रमाणानाम् अपेक्षा अस्ति न वा इति विचार्यताम् ?

२. कुतः गुरोः सकाशं मुमुक्षिभिः गमनीयम् ?

३. ब्रह्मणः स्वप्रकाशत्वं हि किम् ?

४. का हि स्मृतिः ?

५. का प्रत्यभिज्ञा ?

६. किम् अन्तरेण इन्द्रियाणां प्रवृत्तिः न सम्भवति ?

७. लक्षणविशेषणयोः भेदः कः ?

८. निर्गुणब्रह्मणि प्रत्यक्षादिप्रमाणानां कथम् अनपेक्षत्वमुच्यते इत्येतत् आलोच्यताम् ?

९. भगवत्पाच्छङ्कराचार्योक्तदिशा ब्रह्मणः निर्गुणत्वं प्रतिपाद्यताम् ?

१०. ब्रह्मशब्दार्थः निगद्यताम् ?

११. वेद्यत्वं किम् ?

१२. ब्रह्मणः स्वरूपलक्षणं वर्णयतु ?

१३. अध्यासस्वरूपं वर्णयतु ?

१४. अध्यासं प्रति किं कारणम् ?

१५. ब्रह्मणः धर्माः के भवन्ति ?

१६. अध्यासस्य कथम् आनन्त्यत्वम् ?

१७. तत्त्वप्रदीपिकादिशा स्वप्रकाशत्वम् आलोच्यताम् ?

१८. अर्थाध्यासं वर्णयतु ?

१९. अध्यासस्य कथमनादित्वम् ?

२०. पश्वादीनां शास्त्रपारदर्शिनः च समानः प्रमाणप्रमेयव्यवहार इति आलोच्यताम् ?

## पाठगतप्रश्नानामुत्तराणि।

१. तैत्तिरीयोपनिषदः ब्रह्मानन्दवल्ल्यां निगद्यते "ब्रह्मविदाप्नोति परम्। तदेषाभ्युक्ता। सत्यं ज्ञानम् अनन्तं ब्रह्म। यो वेद निहितं गुहायां परमे व्योमन्। सोऽश्नुते सर्वान् कामान् सह। ब्रह्मणा विपश्चितेति।"[२/१/१] इति।

२. तैत्तिरीयोपनिषदि उच्यते "आनन्दो ब्रह्मेति व्यजानात्। आनन्दाद्ध्येव खलु इमानि भूतानि जायन्ते। आनन्देन जातानि जीवन्ति। आनन्दं प्रयन्ति अभिसंविशन्ति।" इति।

३. श्रीमद्भगवद्गीताभाष्ये शङ्कराचार्यैः कथ्यते "सिद्धे हि आत्मनि प्रमातरि प्रमित्सोः प्रमाणान्वेषणा न भवति"[२/१८] इति।

४. मुण्डकोपनिषदि भगवता शङ्कराचार्येण निगदितं "शास्त्रज्ञोऽपि स्वातन्त्र्येण ब्रह्मज्ञानान्वेषणं न कुर्यात् इति एतद्गरुमेव अवधारणफलमिति"[१/२/१२] इति।

५. श्वेताश्वतरोपनिषदि उच्यते "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।अजो

ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥"[४/५] इति।

६. मुण्डकोपनिषदि निगद्यते "न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति"[२/२/११] इति।

७. पञ्चदश्याः चित्रदीपप्रकरणे निगदितं "जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा। अविद्या तच्चितोर्योगः षडस्माकम् अनादयः॥" इति।

८. परब्रह्मणः निर्गुणत्वविषये श्वेताश्वतरोपनिषदि निगद्यते "एको देवः सर्वभूतेषु गूढः सर्वव्यापी सर्वभूतान्तरात्मा। कर्माध्यक्षः सर्वभूताधिवासः साक्षी चेता केवलो निर्गुणश्च"[६/११] इति।

९. श्रीमद्भगवद्गीतायाः क्षेत्रक्षेत्रज्ञाध्याये उच्यते "अनादित्वान्निर्गुणत्वात् परमात्माऽयमव्ययः। शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते॥"[१३/३१] इति।

१०. विशेषणानि सजातीयेभ्यः एव व्यावर्तकानि भवन्ति। किन्तु लक्षणानि सजातीयविजातीयादिभ्यः सर्वेभ्यः व्यावर्तकानि भवन्ति।

११. अध्यासः हि स्मृतिरूपः परत्र पूर्वदृष्टावभासः।

१२. अध्यासलक्षणे स्मृतिरूपपदस्य अनुपादाने सति "सेयं गौः", "सोऽयं देवदत्तः" चेत्यादिप्रत्यभिज्ञायामतिव्याप्तिः।

१३. सर्वाणि शास्त्राणि प्रमाणानि च अविद्यावद्विषयत्वं नातिवर्तन्ते।

१४. अध्यस्तपदार्थनिषेधेन अधिष्ठानरूपवस्तुस्वरूपावधारणं विद्याम् आहुः पण्डिताः।

१५. ज्ञानं विना ध्वसाभावात् अध्यासस्य आनन्त्यत्वम्।

१६. लोकव्यवहार एव अध्यासस्य फलम्।

१७. ज्ञानाध्यासपक्षे समग्रस्य अध्यासलक्षणस्य अर्थस्तावत् अन्यस्मिन् अधिकरणे स्मृतिरूपज्ञानस्य सदृशं यज्ज्ञानं पूर्वदर्शनात् उत्पद्यते तदेव ज्ञानाध्यासः।

१८. अर्थाध्यासपक्षे समग्रस्य अध्सासलक्षणस्य अर्थस्तावत् अन्यस्मिन् अधिकरणेऽर्थात् रज्ज्वादौ, स्मर्यमाणव्यवहारिकसर्पादिपदार्थ इव पूर्वजन्यसंस्कारवशात् यत्प्रातिभासिकसर्पादि प्रकाशितं भवति तदेव अर्थाध्यासः।

१९. पद्मपादाचार्येण पञ्चपादिकायां निगदितं यत् "आनन्दो विषयानुभवो नित्यत्वं चेति सन्ति धर्माः। अपृथकत्वेऽपि चैतन्यात् पृथगिव अवभासन्ते॥" इति।

॥ इति अष्टादशः पाठः ॥

# १९

# सगुणं ब्रह्म

## प्रस्तावना

सर्वेषु वेदान्तवाक्येषु नित्यशुद्धबुद्धमुक्तसत्यस्वभावं ब्रह्म एव प्रतिपाद्यते। ब्रह्मणि एव सर्वेषां वेदान्तवाक्यानां तात्पर्यम्। सत्यं ज्ञानम् अनन्तं ब्रह्म एकमेवाद्वयम्। तथापि उपाधिकृतः भेदः कल्प्यते न तु वास्तविकः। वेदान्तवाक्येभ्यः द्विरूपं ब्रह्म अवगम्यते। सगुणं निर्गुणं च ब्रह्म। सगुणं ब्रह्म नामरूपोपाधिभेदविशिष्टं भवति। सगुणं ब्रह्म एव जगत्सृजति। तस्मिन् ब्रह्मणि सत्यसङ्कल्पत्वसत्यकामत्वादयः गुणाः सन्ति इति श्रुत्यादिषु स्पष्टमेव निगदितम्। पूर्वपाठे निर्गुणं ब्रह्म आलोचितम्। अस्मिन् पाठे सगुणं ब्रह्म आलोच्यविषयः।

## उद्देश्यानि

इमं पाठं पठित्वा भवान्-

- ब्रह्मणि कीदृशं कर्तृत्वम् अस्ति इति ज्ञातुं शक्नुयात्।
- सर्वेषां वेदान्तानां कुत्र तात्पर्यम् इति वक्तुं शक्ष्यति।
- तटस्थलक्षणं हि किम् इति अवगच्छेत्।
- ब्रह्मणः तटस्थलक्षणविषये उपनिषदि किमुक्तम् इति जानीयात्।
- बिम्बप्रतिबिम्बवाददिशा ईश्वरस्वरूपं किम् इति वक्तुं शक्ष्यति।
- ब्रह्मणः तटस्थलक्षणं किम् इति ज्ञातुं शक्नुयात्।
- अवच्छेदवाददिशा ईश्वरस्वरूपं किम् इति अवगच्छेत्।
- ब्रह्मणः तटस्थलक्षणविषयिणी श्रुतिः का इति वक्तुं शक्नुयात्।
- ब्रह्मणः तटस्थलक्षणविषयिणी स्मृतिः का इति ज्ञातुं शक्नुयात्।

## १९.१ सगुणब्रह्मस्वरूपम्

### १९.१.१ ब्रह्मणः तटस्थलक्षणम्

यस्य लक्षणं क्रियते तत् लक्ष्यम्। लक्ष्यस्य यदसाधारणधर्मः तदेव लक्षणम्। लक्ष्यस्य यावत्स्थितिकालः तावत्कालं लक्ष्ये न स्थित्वा यत् लक्ष्यस्य व्यावर्तकं भवति तदेव तटस्थलक्षणम्।

उदाहरणं यथा- गन्धवत्वं पृथिव्याः तटस्थलक्षणम्। अत्र लक्ष्या पृथिवी। पृथिव्याः परमाणुरपि पृथिवी। अतः परमाणुरपि लक्ष्यः भवति। पृथिव्याः परमाणुः नित्यः चिरं च तिष्ठति। किन्तु गन्धः चिरं न तिष्ठति। जन्यः भाववस्तुरूपः गन्धः महाप्रलयकाले न तिष्ठति। नैयायिकानां मते उत्पत्तिकाले घटादिषु गन्धः न तिष्ठति। अतः गन्धवत्वं पृथिव्याः तटस्थलक्षणम्। एवमेव जगज्जन्मादिकारणं ब्रह्मणः तटस्थलक्षणम्। जगज्जन्मादिकारणं ब्रह्म इत्यत्र श्रुतिः मानम्। तैत्तिरीयोपनिषदः भृगुवल्ल्यां उच्यते "भृगुर्वै वारुणिः। वरुणं पितरम् उपससार। अधीहि भगवो ब्रह्मेति। तस्मै एतत्प्रोवाच। अन्नं प्राणः चक्षुः श्रोत्रं मनो वाचम् इति। तं होवाच। यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व तद्ब्रह्मेति"[३/१] इति। अस्याः श्रुतेः अर्थस्तावत् पुत्रः भृगुः पितुः वरुणस्य सकाशम् आगत्य प्रोक्तवान् यत् ब्रह्मविद्याम् अध्यापय इति। पिता वरुणः विध्यनुसारेण ब्रह्मज्ञानस्य उपायभूतम् अन्नं प्राणं चक्षुः श्रोत्रं मनः वाचं च उपदिष्टवान्। पुनरपि उक्तवान् यत् यस्मात् कारणभूतात् ब्रह्मादिस्थावरान्तानि भूतानि उत्पद्यन्ते, उत्पन्नानि च येन वस्तुना स्थितिं लभन्ते, ध्वंसोन्मुखानि भवन्ति, यत्र च प्रलीयन्ते तत् जन्मस्थितिलयनिदानं ब्रह्म वस्तु विशेषेण ज्ञातुम् इच्छ। एतत् श्रुत्वा भृगुः ब्रह्मोपलब्धिसाधनत्वेन तपः कृतवान्। जगज्जन्मादिकारणम् इत्यत्र जगत्पदेन अशेषं कार्यजातं विवक्षितम्। मायायामपि जगत्कारणत्वम् अस्ति खलु इति आशङ्का न कर्तव्या। कारणं हि अत्र कारणत्वम् अर्थात् कर्तृत्वम्। माया जडा भवति। जडायां मायायां कर्तृत्वं न सम्भवति। वेदान्तपरिभाषायां धर्मराजाध्वरीन्द्रेण निगद्यते "प्रकृते ब्रह्मणि च जगज्जन्मादिकारणत्वम्। अत्र जगत्पदेन कार्यजातं विवक्षितम्। कारणत्वं च कर्तृत्वमतोऽविद्यादौ नातिव्याप्तिः" (धर्मराजाध्वरीन्द्रः। २०१०। वेदान्तपरिभाषा। श्री सीतीराम-शास्त्री-मुसलगावकरः। *Chowkhamba Vidya Bhavan, Baranasi*। पृष्ठाङ्कः-३२९) इति। कार्यं प्रति यानि उपादानकारणानि सन्ति, तेषां कारणानाम् अपरोक्षज्ञानं यस्मिन् विद्यते, पुनः कार्यं कर्तुम् इच्छा कार्यकरणानुकूलप्रयन्तः च यस्मिन् विद्यते स कर्ता भवति। एतत् त्रयं परमेश्वरे अस्ति। वेदान्तपरिभाषाकारेण धर्मराजाध्वरीन्द्रेण उच्यते "कर्तृत्वं च तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्" इति। "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतत् ब्रह्म नाम रूपमन्नं च जायते॥"[१/१/९] इति मुण्डकोपनिषद्गता श्रुतिः परमेश्वरस्य अपरोक्षज्ञानसद्भावे प्रमाणम्। परमेश्वरः सामान्येन सर्वं जानाति इत्यतः सर्वज्ञः। स विशेषेण सर्वं वेत्ति इत्यतः सर्ववित्। तस्य ईश्वरस्य सर्वज्ञतारूपं ज्ञानविकारं तपः भवति। तस्मात् ब्रह्मणः हिरण्यगर्भाख्यं कार्यब्रह्म नाम रूपम् अन्नं च उत्पद्यते। परमेश्वरस्य कार्यकरणानुकूलप्रयत्नसद्भावे तैत्तिरीयोपनिषद्गता श्रुतिः तावत् "सः अकामयत। बहु स्याम् प्रजायेयेति। स तपः अतप्यत। स तपस्तप्त्वा इदं सर्वम् असृजत। यदिदं किञ्च। तत्सृष्ट्वा। तदेवानुप्राविशत्।"[२/६] इति। स परमात्मा ऐच्छत् यत् अहं प्रभूतं भवेयम्, उत्पन्नो भवेयम्। अनन्तरं परमात्मा सृष्टेः उपयोगिनं सङ्कल्पं कृतवान्। स तपः कृत्वा चराचरम् इदं सर्वम् उत्पादितवान्। तत्रैव च प्रविष्टवान्। तत्र अनुप्रविश्य मूर्त्तम् आकृतिविशिष्टम्, अमूर्त्तम् आकृतिरहितं च इत्यादिकमभवत्। ब्रह्मणः जगज्जन्मादिकारणत्वे "जन्माद्यस्य यतः"[१/१/२] इति बादरायणविरचितं ब्रह्मसूत्रमपि मानम्। अत्र यतः इति पदेन कारणस्य ब्रह्मणः निर्देशः कृतः वर्तते। अस्य इति पदेन प्रत्यक्षादिसन्निधापितस्य जगतः अयं निर्देशः क्रियते। नाम्ना रूपेण च अभिव्यक्तं जगदिदम्।

नाम रूपं च जगतः अंशद्वयम्। वाक्यसुधाकारेण उक्तम् अस्ति "अस्ति भाति प्रियं रूपं नाम चेति अंशपञ्चकम्। आद्यं त्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्॥" इति। "जन्माद्यस्य यतः" इत्येतत् सूत्रं ब्रह्मसूत्रस्य समन्वयाधिकरणगतजन्माद्यधिकरणे पठ्यते। "भृगुर्वै वारुणिः। वरुणं पितरम् उपससार। अधीहि भगवो ब्रह्मेति। तस्मै एतत्प्रोवाच। अन्नं प्राणः चक्षुः श्रोत्रं मनो वाचम् इति। तं होवाच। यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व तद्ब्रह्मेति"[३/१] इति श्रुतिवाक्यम् अस्य अधिकरणस्य विषयः। जन्म उत्पत्तिः आदिः अस्य इति तद्गुणसंविज्ञानबहुव्रीहिसमासः। बहुव्रीहिसमासे अन्यपदार्थस्य प्राधान्यं भवति। समासघटकपदार्थाः च विशेषणानि भवन्ति। यत्र विशेषणैः साकं विशेष्यरूपान्यपदार्थस्य अपि ग्रहणं भवति तत्र तद्गुणसंविज्ञानबहुव्रीहिसमासः ज्ञेयः। यथा पीताम्बरं पश्य इत्यत्र पीताम्बरविशेषणाभ्यां विशेष्यरूपस्य पुरुषस्य ग्रहणं भवति। एवमेव जन्म आदिः यस्य इत्यत्र जन्म विशेषणम्। विशेष्यौ स्थितिलयौ भवतः। अस्मिन् सूत्रे विशेषणेन जन्मना साकं स्थितिलययोरपि ग्रहणं भवति। अतोऽत्र तद्गुणसंविज्ञानबहुव्रीहिसमासः। अत्र जन्मनः आदित्वं श्रुत्यनुसारि। तैत्तिरीयोनिषद्गता श्रुतिस्तावत् " यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व तद्ब्रह्मेति"[३/१] इति। अपि च जन्मनः आदित्वं वस्तुवृत्तापेक्षम्। जन्मना सत्ता लब्धा चेदेव तस्य लब्धसत्ताकस्य धर्मिणः स्थितिः प्रलयः च सम्भवति। अनेन सूत्रेण किं लिलक्षयिषितमिति चेत् भगवत्पादैः शङ्कराचार्यैः निगद्यते "भृगुर्वै वारुणिः। वरुणं पितरम् उपससार। अधीहि भगवो ब्रह्मेति।" इति उपक्रम्य आह " यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व तद्ब्रह्मेति"[३/१] इति। तस्य च निर्णयवाक्यम् - "आनन्दात् हि एव खलु इमाणि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्ति अभिसंविशन्ति इति"[३/६]। अन्यानि अपि एवं जातीयकानि वाक्यानि नित्यशुद्धबुद्धमुक्तस्वभावसर्वज्ञस्वरूपकारणविषयाणि उदाहर्त्तव्यानि" इति। अत्र भगवत्पादानामेवमेव आशयः यत् यस्मात् सर्वमिदमुत्पन्नं तत् आनन्दस्वरूपं ब्रह्मैव इति। अनेककर्तृभिः भोक्तृभिः च संयुक्तमस्ति जगत्। येषां क्रियाणां फलानां च व्यवस्थितदेशकालनिमित्तानि सन्ति, तेषां क्रियाफलानाम् आश्रयभूतं जगत्। मनसा अचिन्त्यरचनारूपं जगत्। एतादृशस्य जगतः उत्पत्तिः स्थितिः प्रलयः च सर्वज्ञात् परमेश्वरात् एव भवति। अतः एव भगवता शङ्कराचार्येण "जन्माद्यस्य यतः"[१/१/२] इति अस्मिन् ब्रह्मसूत्रभाष्ये कथ्यते "अस्य जगतः नामरूपाभ्यां व्याकृतस्य अनेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसापि अचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं यतः सर्वज्ञात् सर्वशक्तेः कारणात् भवति, तत् ब्रह्म इति वाक्यशेषः" इति। अन्तिमे ब्रह्मणः नव तटस्थलक्षणानि प्राप्यन्ते। तानि भवन्ति-

१) जगज्जन्मानुकूलापरोक्षज्ञानवत्त्वम्

२) जगत्स्थित्यनुकूलापरोक्षज्ञानवत्त्वम्

३) जगल्लयानुकूलापरोक्षज्ञानवत्त्वम्

४) जगज्जन्मानुकूलचिकीर्षावत्त्वम्

५) जगत्स्थित्यनुकूलचिकीर्षावत्त्वम्

६) जगल्लयानुकूलचिकीर्षावत्त्वम्

७) जगज्जन्मानुकूलप्रयत्नवत्त्वम्

८) जगत्स्थित्यनुकूलप्रयत्नवत्त्वम्

९) जगल्लयानुकूलप्रयत्नवत्त्वम्

ब्रह्मणः जगज्जन्मादिकारणत्वप्रदर्शनेन सर्वज्ञत्वं दर्शितम्। तस्य ब्रह्मणः सर्वज्ञत्वं "शास्त्रयोनित्वात्"[१/१/३] इत्यस्मिन् ब्रह्मसूत्रे दृढीकृतं वर्तते। अस्य शास्त्रयोनित्वाधिकरणस्य वर्णकद्वयं विद्यते। सूत्रस्य एकप्रकारतात्पर्यार्थवर्णना यस्मिन् भाष्यांशे विद्यते तदेव वर्णकमिति उच्यते। प्रथमे वर्णके "अस्य महतो भूतस्य निःश्वसितमेव एतत् यत् ऋग्वेदः"[२/४/१०] इति बृहदारण्यकोपनिषद्गतं श्रुतिवाक्यं विषयः। शास्त्रस्य ऋग्वेदादेः, योनिः कारणम्, तस्य भावः, तत्त्वं शास्त्रयोनित्वम्, तस्मात् शास्त्रयोनित्वात् अर्थात् वेदकर्तृकत्वात्, ब्रह्म सर्वज्ञम्। "पुराणन्यायमीमांसाधर्मशास्त्राणि शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतिषाणि षडङ्गानि" इति दशविद्यास्थानानि वेदार्थज्ञानहेतवः भवन्ति। एतैः वेदार्थज्ञानहेतुभिरुपकृतस्य ऋग्वेदादेः शास्त्रस्य कारणं ब्रह्म। अत एव भगवत्पादैः शङ्कराचार्यैः निगद्यते "महतः ऋग्वेदादेः शास्त्रस्य अनेकविद्यास्थानोपबृंहितस्य प्रदीपवत् सर्वार्थवद्योतिनः सर्वज्ञकल्पस्य योनिः कारणं ब्रह्म" इति। यथा प्रदीपः विद्यमानं वस्तु प्रकाशयति तथैव ऋग्वेदादीनि शास्त्राणि सर्वम् अर्थं प्रकाशयति। एतच्च शास्त्रं सर्वज्ञसदृशं भवति। एतादृशस्य सर्वज्ञसदृशस्य शास्त्रस्य सर्वज्ञात् एव सम्भवोऽस्ति, न ततोऽन्यस्माम् कस्मांश्चित्। अत एव भगवत्पादैः शङ्कराचार्यैः कथ्यते "न हि ईदृशस्य शास्त्रस्य ऋग्वेदादिलक्षणस्य सर्वज्ञगुणान्वितस्य सर्वज्ञात् अन्यतः सम्भवोऽस्ति" इति। यानि अनेकार्थप्रतिपादकानि शास्त्राणि यस्मात् पुरुषविशेषात् उत्पन्नानि, स पुरुषः तेभ्यः शास्त्रेभ्योऽपि अधिकतरविज्ञानवान् इति प्रसिद्धं लोके। पुरुषस्य यथा प्रयत्नं विना एव निःश्वासादिकार्यं चलति तथैव अप्रयत्नेन लीलान्यायेन सर्वज्ञानाकरस्य ऋग्वेदादेः यस्मात् महतः भूतात् योनेः सम्भवः तत् ब्रह्म इति ज्ञेयम्। अत एव ब्रह्मणः सर्वज्ञत्वं सर्वशक्तिमत्त्वं च । द्वितीये वर्णके "तं तु औपनिषदं पुरुषं पृच्छामि"[३/९/२६] इति बृहदारण्यकोपनिषद्गतं श्रुतिवाक्यं विषयः। शास्त्रम् ऋग्वेदादि, योनिः प्रमाणं यस्य, तत् शास्त्रयोनिः, तत्त्वं शास्त्रयोनित्वम्, तस्मात् शास्त्रयोनित्वात् अर्थात् वेदैकप्रमाणकत्वात् इति सूत्रस्य पदशः अर्थः। भाष्यरत्नप्रभाकारेण अस्मिन् प्रसङ्गालोचनावसरे उक्तं यत् "यस्य निःश्वसितं वेदाः सर्वार्थज्ञानशक्तयः। श्रीरामं सर्ववेत्तारं वेदवेद्यमहं भजे" (तदेव पुस्तकम्। पृष्ठाङ्कः- ११६) इति। ब्रह्म वेदैकप्रमाणेन एव वेद्यम्। व्यापित्वं नित्यत्वं सर्वज्ञत्वं सर्वशक्तिमत्त्वं सर्वात्मकत्वं च समस्तजगत्कारणस्य ब्रह्मणः धर्माः भवन्ति। "मनोमयः प्राणशरीरः भारूपः सत्यसङ्कल्पः आकाशात्मा सर्वकर्मा सर्वकामः सर्वगन्धः सर्वरसः सर्वमिदमभ्यात्तोऽवाक्यनादरः"[३/१४/२] इत्यस्यां छान्दोग्योपनिषद्गतश्रुतौ मनोमयत्वादिगुणकः शारीर उपास्यत्वेन उपदिश्यते आहोस्वित् परमात्मा उपदिश्यते इति संशये सति उच्यते परमात्मा एव उपदिश्यते। कारणं हि सर्वेषु वेदान्तवाक्येषु प्रसिद्धस्य जगत्कारणस्य ब्रह्मण एव उपदेशः निगदितः वर्तते। यथा छान्दोग्योपनिषदि निगद्यते "सर्वं खल्विदं ब्रह्म तज्जलान् इति शान्तः उपासीत। अथ खलु क्रतुमयः पुरुषः, यथाक्रतुरस्मिन् लोके पुरुषः भवति, तथा

इतः प्रेत्य भवति, स क्रतुं कुर्वीत"[३/१४/१] इति। "विवक्षितगुणोपपत्तेश्च"[१/२/२] इत्यस्मिन् ब्रह्मसूत्रे ब्रह्मणः सगुणत्वं स्पष्टं प्रतिपादितम्। अस्य सूत्रस्य अर्थस्तावत् वक्तुम् इष्टाः विवक्षिताः, विवक्षिताश्च ते गुणाश्च इति विवक्षितगुणाः, ब्रह्मणि एव तेषां गुणानामुपपत्तेः ब्रह्मैव उपास्यं भवति, न तु जीवः। सत्यसङ्कल्पसत्यकामादयः गुणाः सगुणब्रह्मणि एव सम्भवन्ति। सगुणब्रह्मविषयिण्यः श्रुतयः स्मृतयः च वर्तन्ते। श्वेताश्वतरोपनिषदि उच्यते "त्वं स्त्री त्वं पुमानसि, त्वं कुमार उत वा कुमारी। त्वं जीर्णो दण्डेन वञ्चसि, त्वं जातो भवसि विश्वतोमुखः"[४/३] इति। श्रीमद्भगवद्गीतायामपि कथ्यते "सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति"[१३/१३] इति। भगवत्पादैः शङ्कराचार्यैः समन्वयाध्याये विराजमाने "विवक्षितगुणोपपत्तेश्च"[१/२/२] इत्यस्मिन् ब्रह्मसूत्रभाष्ये निगद्यते "'अप्राणः हि अमनाः शुभ्रः'[मुण्डकोपनिषत्, ३/१४/१] इत्यादिश्रुतिः शुद्धब्रह्मविषया, इयं तु 'मनोमयः प्राणशरीरः' इति सगुणब्रह्मविषया इति विशेषः" (तदेव पुस्तकम्। पृष्ठाङ्कः-४१६) इति। ""

अज्ञानं सदसद्भ्याम् अनिर्वचनीयं सत्त्वरजस्तमोगुणात्मकं ज्ञानविरोधि भावरूपं च भवति। अज्ञानस्य त्रिगुणात्मकत्वसद्भावे श्रुतिः मानम्। श्वेताश्वतरोपनिषदि निगद्यते "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥"[४/५] इति। रजसः सत्त्वस्य च अंशतः सम्पन्नात् तमोगुणप्रधानात् विक्षेपशक्तियुक्तात् अज्ञानोपहितचैतन्यात् आकाशः, आकाशाद्वायुः, वायोरग्निः, अग्नेः आपः, अद्भ्यः पृथिवी उत्पद्यते। तैत्तिरीयोपनिषदि उच्यते "तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः, आकाशाद्वायुः"इत्यादि। आकाशादिषु स्वकारणगुणानुरूपमुत्तरोत्तरं सत्त्वरजस्तमसामपि उत्पत्तिः भवति। आकाशः वायुः अग्निः आपः पृथिवी चेति पञ्च सूक्ष्मभूतानि। एतानि सूक्ष्मभूतानि तन्मात्राणि कथ्यन्ते। अर्थात् क्रमशः शब्दस्पर्शरूपरसगन्धमात्राणि सूक्ष्मभूतानि अपञ्चकृतानि भवन्ति। सूक्ष्मभूतेभ्यः सूक्षशरीराणि जायन्ते। तानि सूक्ष्मशरीराणि सप्तदशावयवयुक्तानि भवन्ति। त्रोत्रं त्वक् चक्षुः जिह्वा घ्राणं चेति ज्ञानेन्द्रियाणि। वाक् पाणिः पादः पायुः उपस्थः चेति कर्मेन्द्रियाणि। प्राणः अपानः व्यानः उदानः समानः चेति प्राणाः। निश्चयात्मिका बुद्धिः। सङ्कल्पविकल्पात्मकं मनः। एते सप्तदशावयवाः। आकाशादीनां सात्त्विकांशेभ्यः पृथक्तया पृथक्तया क्रमेण ज्ञानेन्द्रियाणि उत्पद्यन्ते। आकाशादीनां मिलितेभ्यः सात्त्विकांशेभ्यः बुद्धिः मनः च उत्पद्यते। आकाशादीनां रजोऽंशेभ्यः पृथक्तया पृथक्तया कर्मेन्द्रियाणि उत्पद्यन्ते। आकाशादीनां मिलितेभ्यः रजोऽंशेभ्यः पञ्च प्राणाः उत्पद्यन्ते। तमोगुणप्रधानैः अपञ्चीकृतभूतैः पञ्चीकृतानि भूतानि जायन्ते। अपञ्चीकृतसूक्ष्मभूतैः लिङ्गशरीरमुत्पद्यते। लिङ्गशरीरस्य अपरं नाम सूक्ष्मशरीरम्। एतत् लिङ्गशरीरम् उपर्युक्तसप्तदशावयवयुक्तानि भवन्ति। मैत्रेयोपनिषदि उक्तं "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम्। अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनम्॥" इति। पञ्चीकृतभूतेभ्यः भुर्भूवस्स्वर्महर्जनस्तपःसत्यनामकानाम् उपरि उपरि विद्यमानानां लोकानाम्, अतलवितलसुतलरसातलमहातलतलातलपातालनामकानाम् अधः विद्यमानानां लोकानाम्, ब्रह्माण्डस्य, जरायुजाण्डजोद्भिज्जस्वेदजाख्यानां चतुर्विधानां स्थूलशरीराणाम्, स्थूलशरीरभोग्यान्नपानादीनां च उत्पत्तिः भवति। एवं क्रमेण सृष्टिः जायते। कारणसूक्ष्मस्थूलशरीराणि त्रीणि सन्ति। समष्टिकारणशरीराज्ञानोपहितं चैतन्यं सर्वज्ञः ईश्वरः। व्यष्टिकारणशरीराज्ञानोपहितं चैतन्यं प्राज्ञः।

समष्टिसूक्ष्मशरीराज्ञानोपहितं चैतन्यं हिरण्यगर्भः। व्यष्टिसूक्ष्मशरीराज्ञानोपहितं चैतन्यं तैजसः। समष्टिस्थूलशरीराज्ञानोपहितं चैतन्यं विराड्। व्यष्टिस्थूलशरीराज्ञानोपहितं चैतन्यं विश्वः। स्थूलशरीरोत्पत्तौ कार्यब्रह्मणः हिरण्यगर्भस्य साक्षात्कर्तृत्वम्। इतराशेषप्रपञ्चोत्पत्तौ हिरण्यगर्भादिभिः ईश्वरस्य परम्परया कर्तृत्वम्। अतः एव छान्दोग्योपनिषदि निगद्यते "हन्ताहम् इमाः तिस्रः देवताः अनेन जीवेनात्मना अनुप्रविश्य नामरूपे व्याकरवाणि"[६/३/२] इति। हिरण्यगर्भः एव प्रथमः जीवः। अत्र श्रुतयः भवन्ति "स वै शरीरी प्रथमः स वै पुरुषः उच्यते। आदिकर्ता स भूतानां ब्रह्माग्रे सरवर्तत"[यजुर्वेदः-१३/४] इति। येन क्रमेण सृष्टिः भवति तद्विपरीतक्रमेण भूतानां भौतिकानां च लयः भवति। पृथिव्याः अप्सु, अपां तेजसि, तेजसः वायौ, वायोः आकाशः, आकाशस्य जीवगताहङ्कारे, जीवगताहङ्कारस्य कार्यब्रह्महिरण्यगर्भाहङ्कारे लयः भवति। हिरण्यगर्भाहङ्कारस्य अविद्यायां लयः भवति। एवं प्रलयक्रमसद्भावे विष्णुपुराणं मानम्। विष्णुपुराणे गद्यते "जगत्प्रतिष्ठा देवर्षे ! पृथिव्यप्सु प्रलीयते। तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते॥ वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते। अव्यक्तं पुरुषे ब्रह्मन् ! निष्कलं संप्रलीयते॥" इति एवं ब्रह्मणः तटस्थलक्षणम् उक्तम्।

## १९.१.२ बिम्बप्रतिबिम्बवादेन ईश्वरस्वरूप्||

द्विविधं ब्रह्म अवगम्यते। सगुणं निर्गुणं च ब्रह्म। सगुणं ब्रह्म नामरूपविकारभेदोपाधिविशिष्टं भवति। निर्गुणं ब्रह्म सर्वोपाधिविवर्जितं तिष्ठति। अतः एव शङ्कराचार्येण ब्रह्मसूत्रशाङ्करभाष्ये (आनन्दमयाधिकरणे) उक्तमस्ति "अतः परस्य ग्रन्थस्य किम् उत्थानम् इति ? उच्यते द्विरूपं हि ब्रह्म अधिगम्यते। नामरूपविकारभेदोपाधिविशिष्टम्, तद्विपरीतं च सर्वोपाधिविवर्जितम्।" इति। ब्रह्मणः द्विरूपत्वे सहस्रशः श्रुतयः प्रमाणानि भवन्ति। "यत्र हि द्वैतम् इव भवति, तदितरः इतरं पश्यति", "यत्र तु अस्य सर्वम् आत्मैव अभूत्, तत् केन कं पश्येत्"[बृहदारण्यकोपनिषत्-४/५/१५], "यत्र न अन्यत् पश्यति, न अन्यत् शृणोति, न अन्यत् विजानाति, स भूमा, अथ यत्र अन्यत् पश्यति, अन्यत् शृणोति, अन्यत् विजानाति, तदल्पम्, यः वै भूमा तत् अमृतम्, अथ यदल्पम्, तन्मर्त्यम्"[छान्दोग्योपनिषत्-७/२४/१], "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्। अमृतस्य परं सेतुं दग्धेन्धनमिवानलम्॥"[श्वेताश्वतरोपनिषत्] च इत्याद्याः श्रुतयः विद्याविद्याविषयभेदेन ब्रह्मणः द्विरूपत्वं कथयन्ति। एकमेवाज्ञानं जीवेश्वरयोः उपाधिरूपेण प्रदर्शितम्। विष्णुपुराणे उच्यते "विभेदजनकेऽज्ञाने नाशम् आत्यन्तिकं गते। आत्मनो ब्रह्मणो भेदमसन्तं कः करिष्यति॥" इति। जीवः प्रतिबिम्बस्थानीयः। सगुणं ब्रह्म अर्थात् ईश्वरः बिम्बस्थानीयः। बिम्बप्रतिबिम्बरूपेण जीवेश्वरौ स्वीक्रियेते चेत् ईश्वरस्य स्वातन्त्र्यं जीवस्य च पारतन्त्र्यं युक्तियुक्तं भवति। कश्च पुरुषः यथा जले स्वस्य प्रतिबिम्बं दृष्ट्वा प्रतिबिम्बमेवाहम् इति मन्यते। तथैव ईश्वरः अपि स्वप्रतिबिम्बरूपजीवगतक्रियां स्वस्य मन्यते। अतः एव कल्पतरुकारेण उक्तं "प्रतिबिम्बगताः पश्यन्नृजुवक्रादिविक्रियाः। पुमान् क्रीडेत् यथा ब्रह्म तथा जीवस्थविक्रिया॥" इति। सूर्यः सर्वत्र आलोकं प्रसारयति। आलोकस्य विशेषप्रकाशस्थानं यथा दर्पणः तथा अज्ञाने प्रतिबिम्बतजीवस्य विशेषाभिव्यक्तिस्थानम् अज्ञानपरिणामविशेषम् अन्तःकरणम्। केवलेन अन्तःकरणेन अज्ञानोपाधिपरित्यागः न सम्भवति। कारणं हि केवलेन अन्तःकरणोपाधिना परिच्छिन्नं

चैतन्यं जीवः इति स्वीक्रियते चेत् योगीनां कायव्यूहाधिष्ठानत्वासम्भवः। मायायां चैतन्यप्रतिबिम्बः ईश्वरः। सा च माया अनादिर्भवति। पञ्चदश्याः चित्रदीपप्रकरणे निगदितं "जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा। अविद्या तच्चितोर्योगः षडस्माकम् अनादयः॥" इति। सा माया सदसद्भ्याम् अनिर्वाच्या भवति। ब्रह्मज्ञाने सति सा माया नश्यति इत्यतः सा माया न सदिति। मायायाः अपरोक्षप्रतिभासरूपः संसारः दृश्यते इत्यतः सा न असदिति। सिद्धान्तलेशसङ्ग्रहे निगद्यते "अथ कः ईश्वरः को वा जीव ? अत्र उक्तं प्रकटार्थविवरणे अनादिरनिर्वाच्या भूतप्रकृतिः चिन्मात्रसम्बन्धिनी माया तस्यां चित्प्रतिबिम्बः ईश्वरः" इति। पञ्चदश्याः तत्त्वविवेकप्रकरणे मायाविद्ययोः भेदं परिकल्प्य मायायां चित्प्रतिबिम्बः ईश्वरः निगदितः। विशुद्धसत्त्वप्रधाना माया। मलिनसत्त्वप्रधाना अविद्या। तादृश्याम् अविद्यायां चित्प्रतिबिम्बः जीवः। पञ्चदश्याः तत्त्वविवेकप्रकरणे कथ्यते "सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते। मायाबिम्बो वशीकृत्य तां स्यात्सर्वज्ञः ईश्वरः॥ अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा। सा कारणशरीरं स्यात्प्राज्ञस्तत्राभिमानवान्॥"[१/१६, १७] इति। सिद्धान्तलेशसङ्ग्रहे उच्यते "तत्त्वविवेके तु त्रिगुणात्मिकायाः मूलप्रकृतेः जीवेशावभासेन करोति माया च अविद्या स्वयमेव भवति इति श्रुतिसिद्धौ द्वौ रूपभेदौ रजस्तमोऽनभिभूतशुद्धसत्त्वप्रधाना माया, तदभिभूतमलिनसत्त्वप्रधाना अविद्या इति मायाविद्याभेदं परिकल्प्य मायाप्रतिबिम्ब ईश्वरोऽविद्याप्रतिबिम्बो जीवः इत्युक्तम्" इति। "कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः" इति श्रुतिम् आश्रित्य संक्षेपशारीरककारेण सर्वज्ञात्ममुनिना उच्यते यत् अविद्यायां चित्प्रतिबिम्बः ईश्वरः। पुनः अन्तःकरणे चित्प्रतिबिम्बः जीवःइति। वस्तुतस्तु जीवेश्वरयोरभेद एव। जीवेश्वरयोः भेद अविद्यया कल्पित उपाधिकृतः च। अत एव भगवत्पादैः शङ्कराचार्यैः ब्रह्मसूत्रगतसमन्वयाध्यायस्य द्वितीयपादगतान्तर्याम्यधिकरणे "शारीरश्चोभयेऽपि हि भेदेनैनमधीयते"[१/२/२०] निगद्यते- "अत्रोच्यते अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्त अयं शारीरान्तर्यामिणोः भेदव्यपदेशः, न पारमार्थिकः। एकः हि प्रत्यगात्मा भवति, न द्वौ प्रत्यगात्मानौ सम्भवतः। एकस्यैव तु भेदव्यवहारः उपाधिकृतः यथा घटाकाशः महाकाश इति" इति।

## १९.१.३ अवच्छेदवादेन ईश्वरस्वरूप्|

अपरे केचन कथयन्ति यत् यः पदार्थः रूपेण उपहितः नास्ति, तस्य प्रतिबिम्बः कदापि न सम्भवति। यथा नीरूपस्य आकाशस्य प्रतिबिम्बः कदापि न सम्भवति। तथैव सर्वोपाधिविवर्जितस्य निर्विशेषस्य ब्रह्मणः अपि प्रतिबिम्बः न सम्भवति। मायाविद्ययोः भेदः नास्ति। माया अविद्या एव इति मत्वा केचन कथयन्ति माया एका एव। मायायाः एकत्वे श्रुतयः भवन्ति "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्"[श्वेताश्वतरोपनिषत्-४/१०], "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः। अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥"[४/५] च इत्याद्याः। तत्र स्मृतिर्भवति-"तरति अविद्यां विततां हृदि यस्मिन्निवेशिते। योगी मायाममेयाय तस्मै विद्यात्मने नमः॥" इति। मायया उपहितं चैतन्यम् ईश्वरसाक्षि भवति। मायया अवच्छिन्नं चैतन्यम् ईश्वरः। अतः एव वेदान्तपरिभाषायां धर्मराजाध्वरीन्द्रेण उच्यते "ततश्च तदुपहितं चैतन्यम् ईश्वरसाक्षि। तच्चानादि, तदुपाधेर्मायायाः अनादित्वात्। मायावच्छिन्नं चैतन्यं परमेश्वरः। मायायाः विशेषणत्वे ईश्वरत्वम्, उपाधित्वे

साक्षित्वमिति ईश्वरत्वसाक्षित्वयोर्भेदः, न तु धर्मिणोरीश्वरसाक्षिणोर्भेदः" इति। अतः मायावच्छिन्नं चैतन्यम् ईश्वरः। अन्तःकरणावच्छिन्नं चैतन्यं जीवः।

## पाठगतप्रश्नाः

१. मायाविद्ययोरेकत्वे काः श्रुतयः प्रमाणानि भवन्ति ?
२. ब्रह्मणः ततस्थलक्षणविषयिणी श्रुतिः का ?
३. जगत्प्रति यानि उपादानकारणानि सन्ति, ईश्वरस्य तदुपादानकारणापरोक्षज्ञानसद्भावे का श्रुतिः प्रमाणम् ?
४. परमेश्वरस्य कार्यकरणानुकूलप्रयत्नसद्भावे का श्रुतिः मानम् ?
५. जन्मनः आदित्वे का श्रुतिः प्रमाणम् ?
६. जगद्रुपत्वविषये वाक्यसुधाकारेण किमुक्तम् ?
७. "जन्माद्यस्य यतः" इति बादरायणविरचिते ब्रह्मसूत्रे कथं तद्गुणसंविज्ञानबहुब्रीहिसमासं दर्शयतु ?
८. "जन्माद्यस्य यतः" इति बादरायणविरचितस्य ब्रह्मसूत्रस्य निर्णयवाक्यं किम् ?
९. शास्त्रयोनित्वाधिकरणस्य विषयवाक्यं किम् ?
१०. वर्णकं हि किम् ?
११. ब्रह्मणः सगुणत्वप्रतिपादिनी एका श्रुतिरुदाह्रियताम् ?
१२. ब्रह्मणः सगुणत्वप्रतिपादिनी एका स्मृतिरुदाह्रियताम् ?
१३. मायाविद्ययोरेकत्वप्रतिपादिनी स्मृतिः का ?
१४. मायाविद्ययोः भेदविषये विद्यारण्यस्वामिना किमुक्तम् ?
१५. षड् अनादयः के भवन्ति ?
१६. प्रलयक्रमसद्भावे विष्णुपुराणे किमुक्तम् ?
१७. ब्रह्मणः द्विरुपत्वे काः श्रुतयः प्रमाणानि भवन्ति ?
१८. जीवेश्वरयोरभेदविषये भगवत्पादैः शङ्कराचार्यैः किमुक्तम् ?
१९. दशविद्यास्थानानि कानि ?

## पाठसारः

परमानन्दावाप्तिरेव सर्वेषां वेदान्तानां मुख्यं प्रयोजनम्। ये मन्दमतयः सन्ति, तेषां परमानन्दप्राप्त्यर्थं सोपानं तावत्सगुणब्रह्मोपासनम्। नामरूपविकारभेदोपाधिविशिष्टं सगुणं ब्रह्म भवति।

निर्गुणब्रह्मप्राप्त्यर्थमादौ सगुणब्रह्म उपास्यम्। सगुणं ब्रह्म एव जगत् सृजति। सगुणे ब्रह्मणि जगज्जन्मादिकारणत्वं विद्यते। सगुणब्रह्मोपासनेन चित्तशुद्धिः भवति। चित्तशुद्धेरपरं नाम सत्त्वशुद्धिः। सत्त्वशुद्धिद्वारा ते परमानन्दम् आत्मानं प्राप्नुवन्ति। वयं सर्वे आत्मस्वरूपाः। किन्तु अज्ञानवशात् वयम् आत्मानं न जानीमः। अज्ञाननाशाय अस्माभिः कर्म कर्तव्यम्। उपासनमपि कर्मैव। अन्तिमे शुभम् अशुभं चोभयमपि त्यक्तव्यम्। अत एव श्रीमद्भगवद्गीतायाम् उच्यते "सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज। अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥"[१८/६६] इति। अत्र धर्मशब्देन अधर्म अपि गृह्यते। कारणं हि अत्र नैष्कर्म्यं विवक्षितम्। अर्थात् सर्वं शुभाशुभं कर्म परित्यज्यम्। निर्गतं कर्म यस्मात् तत् निष्कर्म, निष्कर्मणः भावः नैष्कर्म्यम्। शुद्धात्मा एव अज्ञानोत्थितसर्वकर्मरहितः भवति। मुण्डकोपनिषदि उच्यते "भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः। क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे॥"[२/२/९] इति। अस्याः श्रुतेराशयस्तावत् शुद्धात्मनः प्राप्तौ सत्यां अविद्याग्रन्थिः सर्वसंशयाः च नश्यन्ति। अपि च सर्वकर्माणि क्षीयन्ते।

## अधिगतविषयाः

- "जन्माद्यस्य यतः" इति बादरायणविरचिते ब्रह्मसूत्रे सगुणं ब्रह्म वाच्यं भवति।
- जगज्जन्मादिकारणत्वं ब्रह्मणः तटस्थलक्षणम्।
- सगुणं ब्रह्म नामरूपविकारभेदोपाधिविशिष्टं भवति।
- अज्ञानं सदसद्भ्याम् अनिर्वचनीयं सत्त्वरजस्तमोगुणात्मकं ज्ञानविरोधि भावरूपं च भवति।
- लक्ष्यस्य यावत्स्थितिकालः तावत्कालं लक्ष्ये न स्थित्वा यत् लक्ष्यस्य व्यावर्तकं भवति तदेव तटस्थलक्षणम्।
- कर्तृत्वं हि तत्तदुपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम् इति।
- ब्रह्मणः नव तटस्थलक्षणानि प्राप्यन्ते।
- ब्रह्मणः सर्वज्ञत्वं "शास्त्रयोनित्वात्"[१/१/३] इत्यस्मिन् ब्रह्मसूत्रे दृढीकृतं वर्तते।
- सत्यसङ्कल्पसत्यकामादयः गुणाः सगुणब्रह्मणि एव सम्भवन्ति।
- अनादिरनिर्वाच्या भूतप्रकृतिः चिन्मात्रसम्बन्धिनी माया तस्यां चित्प्रतिबिम्बः ईश्वरः।
- कार्योपाधिरयं जीवः कारणोपाधिरीश्वर इत्येवं जीवेश्वरयोः भेदः।

## पाठान्तप्रश्नाः

१. अवच्छेदवाददिशा ईश्वरस्वरूपम् आलोचयत ?

२. "जन्माद्यस्य यतः" इत्यत्र कथं समासः प्रदर्शितः ?

३. जीवेश्वरयोः कीदृशः भेदः वर्तते ?

४. माया हि का ?

५. गुणत्रयं किम्?

६. कति अनादयः सन्ति ?

७. बिम्बप्रतिबिम्बवाददिशा परमेश्वरस्वरूपमालोचय ?

८. पृथिवी कुत्र प्रलीयते ?

९. तेजः कुत्र प्रलीयते ?

१०. श्रुत्यादिषु कथं ब्रह्मणः सगुणत्वं प्रतिपादितम् ?

११. का हि अविद्या ?

१२. जीवः हि किम् ?

१३. कति विद्यास्थानानि सन्ति, के च ते ?

१४. प्रलयक्रमः विष्णुपुराणानुसारेण आलोच्यताम् ?

१५. ब्रह्मणः तटस्थलक्षणम् आलोचयतु ?

## पाठगतप्रश्नानामुत्तराणि।

१. मायायाः एकत्वे श्रुतयः भवन्ति यत् "मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्"[श्वेताश्वतरोपनिषत्-४/०], "अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः॥"[४/५] च इत्याद्याः।

२. तैत्तिरीयोपनिषदः भृगुवल्ल्यां उच्यते "भृगुर्वै वारुणिः। वरुणं पितरम् उपससार। अधीहि भगवो ब्रह्मेति। तस्मै एतत्प्रोवाच। अन्नं प्राणः चक्षुः श्रोत्रं मनो वाचम् इति। तं होवाच। यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व तद्ब्रह्मेति"[३/] इति तटस्थलक्षणविषयिणी श्रुतिः।

३. "यः सर्वज्ञः सर्वविद्यस्य ज्ञानमयं तपः। तस्मादेतत् ब्रह्म नाम रूपमन्नं च जायते॥"[//९] इति मुण्डकोपनिषद्गता श्रुतिः परमेश्वरस्य अपरोक्षज्ञानसद्भावे प्रमाणम्।

४. परमेश्वरस्य कार्यकरणानुकूलप्रयत्नसद्भावे तैत्तिरीयोपनिषद्गता श्रुतिः तावत् "सः अकामयत। बहु स्याम् प्रजायेयेति। स तपः अतप्यत। स तपस्तप्त्वा इदं सर्वम् असृजत। यदिदं किञ्च। तत्सृष्ट्वा। तदेवानुप्राविशत्।"[२/६] इति।

५. "भृगुर्वै वारुणिः। वरुणं पितरम् उपससार। अधीहि भगवो ब्रह्मेति। तस्मै एतत्प्रोवाच। अन्नं प्राणः चक्षुः श्रोत्रं मनो वाचम् इति। तं होवाच। यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व तद्ब्रह्मेति"[३/] इति तैत्तिरीयोनिषद्गता श्रुतिः प्रमाणम्।

६. वाक्यसुधाकारेण उक्तम् अस्ति "अस्ति भाति प्रियं रूपं नाम चेति अंशपञ्चकम्। आद्यं त्रयं



ब्रह्मरूपं जगद्रूपं ततो द्वयम्॥" इति।

७. जन्म उत्पत्तिः आदिः अस्य इति तद्गुणसंविज्ञानबहुब्रीहिसमासः। यत्र विशेषणैः साकं विशेष्यरूपान्यपदार्थस्य अपि ग्रहणं भवति तत्र तद्गुणसंविज्ञानबहुब्रीहिसमासः। अस्मिन् सूत्रे विशेषणेन जन्मना साकं स्थितिलययोरपि ग्रहणं भवति।

८. अस्य सूत्रस्य निर्णयवाक्यम्- "आनन्दात् हि एव खलु इमाणि भूतानि जायन्ते, आनन्देन जातानि जीवन्ति, आनन्दं प्रयन्ति अभिसंविशन्ति इति"[३/६] इति।

९. अस्मिन् अधिकरणे वर्णकद्वयं विद्यते। प्रथमे वर्णके "अस्य महतो भूतस्य निःश्वसितमेव एतत् यत् ऋग्वेदः"[२/४/०] इति बृहदारण्यकोपनिषद्गतं श्रुतिवाक्यं विषयः। द्वितीये वर्णके "तं तु औपनिषदं पुरुषं पृच्छामि"[३/९/२६] इति बृहदारण्यकोपनिषद्गतं श्रुतिवाक्यं विषयः।

१०. सूत्रस्य एकप्रकारतात्पर्यार्थवर्णना यस्मिन् भाष्यांशे विद्यते तदेव वर्णकमिति उच्यते।

११. ) श्वेताश्वतरोपनिषदि उच्यते "त्वं स्त्री त्वं पुमानसि, त्वं कुमार उत वा कुमारी। त्वं जीर्णो दण्डेन वञ्चसि, त्वं जातो भवसि विश्वतोमुखः"[४/३] इति।

१२. श्रीमद्भगवद्गीतायामपि कथ्यते "सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति"[३/३] इति।

१३. तत्र स्मृतिर्भवति-"तरति अविद्यां विततां हृदि यस्मिन्निवेशिते। योगी मायाममेयाय तस्मै विद्यात्मने नमः॥" इति।

१४. पञ्चदश्याः तत्त्वविवेकप्रकरणे कथ्यते "सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते। मायाबिम्बो वशीकृत्य तां स्यात्सर्वज्ञः ईश्वरः॥ अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा। सा कारणशरीरं स्यात्प्राज्ञस्तत्राभिमानवान्॥"[/६, ७] इति।

१५. पञ्चदश्याः चित्रदीपप्रकरणे निगदितं "जीव ईशो विशुद्धा चित्तथा जीवेशयोर्भिदा। अविद्या तच्चितोर्योगः षडस्माकम् अनादयः॥" इति।

१६. विष्णुपुराणे गद्यते "जगत्प्रतिष्ठा देवर्षे ! पृथिव्यप्सु प्रलीयते। तेजस्यापः प्रलीयन्ते तेजो वायौ प्रलीयते॥ वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते। अव्यक्तं पुरुषे ब्रह्मन् ! निष्कलं संप्रलीयते॥" इति।

१७. "यत्र हि द्वैतम् इव भवति, तदितरः इतरं पश्यति", "यत्र तु अस्य सर्वम् आत्मैव अभूत्, तत् केन कं पश्येत्"[बृहदारण्यकोपनिषत्-४/५/५], "यत्र न अन्यत् पश्यति, न अन्यत् शृणोति, न अन्यत् विजानाति, स भूमा, अथ यत्र अन्यत् पश्यति, अन्यत् शृणोति, अन्यत् विजानाति, तपल्पम्, यः वै भूमा तत् अमृतम्, अथ यदल्पम्, तन्मत्त्यम्"[छान्दोग्योपनिषत्-७/२४/], "निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्। अमृतस्य परं सेतुं दग्धेन्धनमिवानलम्॥"[श्वेताश्वतरोपनिषत्] च इत्याद्याः श्रुतयः विद्याविद्याविषयभेदेन ब्रह्मणः द्विरूपत्वं कथयन्ति।

१८. भगवत्पादैः निगद्यते- "अत्रोच्यते अविद्याप्रत्युपस्थापितकार्यकरणोपाधिनिमित्त अयं शारीरान्तर्यामिणोः भेदव्यपदेशः, न पारमार्थिकः। एकः हि प्रत्यगात्मा भवति, न द्वौ प्रत्यगात्मानौ

सम्भवतः। एकस्यैव तु भेदव्यवहारः उपाधिकृतः यथा घटाकाशः महाकाश इति" इति।

१९. "पुराणन्यायमीमांसाधर्मशास्त्राणि शिक्षाकल्पव्याकरणनिरुक्तच्छन्दोज्योतिषाणि षडङ्गानि" इति दशविद्यास्थानानि भवन्ति।

॥ इति नवदशः पाठः ॥

# २०

# अज्ञानम्

## प्रस्तावना

बृहदारण्यकोपनिषदि "आत्मा वा अरे द्रष्टव्यः श्रोतव्यः मन्तव्यः"(४-५-६) इति श्रूयते। आत्मविषयकं श्रवणं, मननं, निदिध्यासनं च कर्तव्यम् इति तस्य वाक्यस्य अर्थः। श्रवणमनननिदिध्यासनानि आत्मज्ञानलाभाय साधनानि भवन्ति। इदं श्रवणादिकम् आत्मज्ञानम् उद्दिश्य एव क्रियते। एवमेव "सोऽन्वेष्टव्यः स विजिज्ञासितव्यः" (छा.उ.८।७।१) इत्यादिवेदान्तवाक्येषु आत्मज्ञानम् उद्दिश्य श्रवणादिकम् उपदिश्यते। श्रवणादिभिः साधनैः अज्ञानस्य निवृत्तिः जायते, तेन स्वप्रकाशं नित्यम् आत्मस्वरूपं स्वस्वरूपेण भासते। अतः आत्मज्ञानम् इत्यस्य वस्तुतः अर्थो भवति - अज्ञाननिवृत्तिरेव। यथा मेघेन आच्छादितः सूर्यः स्वप्रकाशः अपि अस्माकं स्पष्टतया न भासते, मेघे अपसारिते स्वरूपेण प्रतिभाति। तथैव स्वप्रकाशः अपि आत्मा मेघरूपाज्ञानवशात् अस्माकं गोचरः न भवति। तस्मात् आत्मस्वरूपज्ञानाय अज्ञानस्य आच्छादनम् अपसारणीयम्। तस्माद् किं तावद् अज्ञानं, किं वा तस्य स्वरूपमित्यादयः विषयाः आत्मतत्त्वज्ञानाय नितराम् ज्ञातव्याः।

## उद्देश्यानि

भवान् इमं पाठं पठित्वा अधोनिर्दिष्टान् पाठविषयान् अवगच्छेत्।

- अज्ञानस्य स्वरूपम् लक्षणम् च।
- अज्ञानलक्षणे प्रयुक्तानां पदानाम् अर्थविवरणम्।
- अज्ञाननिरूपणाय प्रमाणानाम् उपयोगः।
- प्रत्यक्षप्रमाणेन अज्ञाननिरूपणम्।
- श्रुतिप्रमाणेन अज्ञाननिरूपणम्।
- अज्ञानस्य शक्तिद्वयम्।

## २०.१ अज्ञानस्य लक्षणम्

**अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।** (गीता) इति गीतावचनाद् ज्ञायते यत् ज्ञानम् अज्ञानेन आवृतम् अस्ति। न केवलं तावद्। ज्ञानस्य आवरणकारणात् अज्ञानवशात् जन्तुः प्राणी मुह्यति, मोहग्रस्तो भवति, विवेकहीनो भवति, श्रेयःप्रेयसोः पार्थक्यं नावगच्छति। अतः निषिद्धे काम्ये वा कर्मणि प्रवर्तते। तेन तस्य कर्मणः फलोदयो भवति। फलभोगाय पुनः पुनः जन्म ग्रहीतव्यम् आपतति इति क्रमेण

संसरति जीवः। अतः संसारी इति कथ्यते। अज्ञानम् आत्मनः शुद्धज्ञानस्वभावम् आवृणोति इति अधीतम्। एतेन ज्ञायते वेदान्तदर्शने अज्ञानमेव बन्धकारणम् इति। अतः साधकः मोक्षार्थम् अज्ञानरूपं बन्धं निवर्तयेत्। तदर्थं किम् अज्ञानमिति ज्ञातव्यम्। लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिः इति नैयायिकसमवाये अस्ति प्रसिद्धिः। तस्मात् अज्ञानस्य लक्षणं किम्, तत् आत्मानं कथं बध्नाति - इत्यादयः विषयाः ज्ञातव्याः। अज्ञानस्य लक्षणं निगदितं वेदान्तसारकारेण सदानन्दयोगीन्द्रेण – **"अज्ञानं तु सदसद्भ्याम् अनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति"** इति। लक्षणे प्रोक्तानां सर्वेषां पदानाम् अर्थविस्तरः क्रियते।

## २०.१.१ अज्ञानस्य त्रिगुणात्मकत्वम्।

जगतः उपादानकारणम् हि अज्ञानम्। तत् त्रिगुणात्मकम् इति सांख्याः योगिनः वेदान्तिनश्च मन्यन्ते। त्रयाणां गुणानां समाहारः त्रिगुणं, त्रिगुणमेव आत्मा स्वरूपं यस्य तत् त्रिगुणात्मकमिति विग्रहः। सत्वं रजः तमश्चेति त्रयः गुणाः। जगतः उपादानकारणम् अज्ञानं त्रिगुणात्मकम् इत्यत्र वेदः स्वयं प्रमाणम्। तथाह्याम्नायते श्वेताश्वतरोपनिषदि -

**अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।**
**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः।।**(श्वे.उ.४/५)

इह "लोहितकृष्णशुक्लशब्देन"सत्त्वादिगुणत्रयमेव अभिधीयते। मायाकार्याणां त्रिगुणात्मकत्वं बोध्यते इह "सरूपाः" इति पदेन। अन्यत्रापि यथा–"**दैवात्मशक्तिं स्वगुणैर्निगूढाम्"** इति।

**दैवी ह्येषा गुणमयी मम माया दुरत्यया।**
**मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।। इति। (गीता ७/१४)**

एवञ्च सत्त्वरजस्तमोगुणात्मकमिदमज्ञानं सर्वमिदं जगत् नियमयति। इयं प्रकृतिर्हि त्रिगुणात्मिका। तथाहि -

**सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः।**
**निबध्नन्ति महाबाहो देहे देहिनमव्ययम्।। इति। (गीता.१४/५)**

सत्त्वगुणस्य लक्षणम्-

**तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम्।**
**सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ।। इति। (गीता १४/६)**

सोपाधिकं वैषयिकं सुखं वा वृत्त्यात्मकमनित्यं ज्ञानं वा सत्त्वगुणस्य विषयः। इच्छादिविषयधर्मं विषयिणि चिदात्मनि आपादयति। विषयधर्मं विषयिणि आरोप्य व्यवहरति अहं सुखी इत्यादि। तत्र भाष्यं यथा-"सुखी अहम् इति विषयभूतस्य सुखस्य विषयिणि आत्मनि संश्लेषापादनं मृषा एव सुखे सञ्जनम् इति। सा एषा अविद्या। ...अविद्यया एव स्वकीयधर्मभूतया विषयविषयि-अविवेकलक्षणया अस्वात्मभूते सुखे सञ्जयतीव सक्तमिव करोति असुखिनं सुखिनमिव" इति।

रजोगुणस्य लक्षणम्-

**रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम्।**

**तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम्।। इति। (गीता.१४/७)**

तृष्णा अप्राप्ताभिलाषः, आसङ्गः प्राप्ते विषये मनसः प्रीतिलक्षणः संश्लेषः इति।

तमोगुणस्य लक्षणम्-

**तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम्।**

**प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत।। इति। (गीता.१४/८)**

गुणानां कार्यम्-

**सत्त्वात्सञ्जायते ज्ञानं रजसो लोभ एव च।**

**प्रमादमोहौ तमसो भवतोऽज्ञानमेव च।। इति। (गीता.१४/१७)**

## २०.१.२ अज्ञानस्य अनिर्वचनीयत्वम्।

निर्वचनम् इत्यस्यार्थो हि शब्देन प्रकाशनम्। यथा कम्बुग्रीवादिमतः जलाहरणपात्रस्य निर्वचनम् किम्। घटः इति। अर्थात् घटशब्देन तत् पात्रम् अभिधीयते। घटः इति पदम्। तादृशम् पात्रम् अर्थः। अतः तादृशपात्रस्य निर्वचनम् अस्ति। अतः पात्रं निर्वचनीयम् अस्ति। अस्माकं व्यवहारे यानि पदानि सन्ति, शास्त्रेषु वा शास्त्रकारैः पारिभाषिकपदानि पुरस्कृतानि स्युः। तथाविधेन केनचित् शब्देन कस्यापि अर्थस्य प्रकटनम् एव निर्वचनम्। यदा कोऽपि अर्थः/ वस्तु अनिर्वचनीम् अस्ति इति कथ्यते तदा तस्यार्थो हि यद् तस्य अर्थस्य प्रकटनाय पदं नास्ति। केनापि प्रसिद्धपदेन अथवा प्रसिद्धार्थे यानि पदानि प्रयुज्यन्ते तादृशेन पदेन अभिधानं / व्यपदेशः न भवति। यथा मानवेषु काचिद् व्यक्तिः पुरुषः इति निर्वक्तुं शक्यम्। काचिद् व्यक्तिः स्त्री इति निर्वक्तुं शक्यम्। परन्तु या व्यक्तिः न पुरुषः न वा स्त्री, तस्याः निर्वचनम् कथम् कर्तव्यम्। पुरुषपदेन तस्याः निरूपणं / निर्वचनम् न सम्भवति। स्त्रीपदेन निरूपणं न सम्भवति। अतः स्त्रीपुरुषपदाभ्याम् अनिर्वचनीया / अव्यपदेश्या / अनभिधेया सा व्यक्तिः। सा च व्यक्तिः स्त्रीपुरुषोभयात्मिका इति निर्वक्तुं शक्यते वा। अर्थात् पुंस्त्वम् अपि स्त्रीत्वम् अपि तस्या अस्ति वा। यदि स्यात् तर्हि स्त्रीपुरुषोभयात्मिका सा व्यक्तिः। यदि कस्मिंश्चिद् वृक्षे आम्राणि अपि सन्ति बदराणि अपि सन्ति तर्हि स वृक्षः आम्रबदरोभयात्मकः इति वक्तुं शक्यम्। तद्वत् सैषा व्यक्तिः स्त्रीपुरुषोभयात्मिका वा। यदि न तर्हि किंस्वरूपा। अतः कथञ्चित् क्लीब इति तृतीयम् पदम् निर्माय व्यपदेशः क्रियते।

अज्ञानम् अनिर्वचनीयमिति वेदान्तस्य सिद्धान्तः। अनिर्वचनीयं हि सद्रूपेण असद्रूपेण वा निरूपयितुम् अशक्यम् इति। यथा लोके घटपटादिकं वस्तु सद्रूपेण अनुभूयते इत्यतः घटादिवस्तु सदिति निरूप्यते। किन्तु "खपुष्पम्" असद्रूपेण अनूभूतम्। अतः तत् असदिति आख्यायते। तथा अज्ञानमपि सद्रूपेण असद्रूपेण वा निरूपयितुं न शक्यते। अतः अज्ञानम् अनिर्वचनीयमिति कथ्यते।

अत्रेदं विचारणीयम्- **किं हि सत्?, किम् असत्?** इति। यत् त्रिषु अपि कालेषु केनापि न बाध्यते तत् सत्। तथाहि उच्यते यत् कालत्रयाबाध्यत्वं हि सत्त्वमिति। यद्यपि अज्ञानं लौकिकेन केनचित् उपायेन न बाध्यते, तथापि परममङ्गलेन ब्रह्मसाक्षात्कारेण ज्ञानेन तु अवश्यमेव निवर्तते। अज्ञानं सच्चेत्

ब्रह्मज्ञानेन न बाध्येत। किन्तु अज्ञानं ज्ञानेन बाध्यते इत्यतः अज्ञानं सद्रूपेण निरूपयितुं न शक्यते। ब्रह्मज्ञानेन बाध्यमानत्वात् न सत्त्वेन व्याख्यातुं शक्यम्।

**किम् असत्?** यत् त्रिषु अपि कालेषु न प्रतीयते तत् असत्। यथा कदाचिदपि 'खपुष्पं' केनापि न दृष्टम्। यः कालत्रये अपि प्रतीतिविषयः (ज्ञानविषयः) न भवति सः असत्पदार्थः(शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः इति योगसूत्रदिशा।)। नापि असत् अज्ञानम्। अज्ञानस्य असत्त्वे प्रत्यक्षविषयत्वमेव न स्यात्। किन्तु "ब्रह्म न जानामि अहमज्ञः" इत्येवं प्रत्यक्षेण अज्ञानमनुभूयते। तेन प्रतीतिविषयत्वात् अज्ञानं न असत्।

**अज्ञानस्य असत्त्वे जगदुपादानकारणत्वानुपपत्तिः**। अज्ञानस्य असत्त्वे जगदुपादानकारणत्वं नोपपद्येत।

**नापि सदसदुभयात्मकम् अज्ञानम्** - सत्त्वासत्त्वयोरुभयोः एकत्र विरोधात्। सत्वेन असत्त्वेन सदसद्भ्यां च निर्वक्तुम् अशक्यत्वादेव अनिर्वचनीयत्वम् अज्ञानस्य।

वस्तुतः इदम् अज्ञानं ब्रह्मणः न भिन्नं वर्तते। ब्रह्मणः भिन्नस्य सर्वस्यापि मिथ्यात्वप्रतिपादनात्।

नाप्यभिन्ना चैतन्यजडयोरैक्यायोगात्।

भिन्नाभिन्ना - एकत्रैव विरुद्धधर्मयोरसम्भवात्।

तदुक्तं शङ्कराचार्यैः विवेकचूडामणौ -

**सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो।**
**साङ्गाप्यनङ्गाप्युभयात्मिका नो महाद्भुताऽनिर्वचनीयरूपा।। इति।**

## २०.१.३ अज्ञानस्य भावरूपत्वम्

जगदुपादानत्वेन प्रतिपादितम् इदमज्ञानं भावरूपम् उत अभावरूपमिति विचारणीयम्। न्यायदर्शने अज्ञानशब्देन अविद्याशब्देन च ज्ञानाभाव एव वर्ण्यते। किन्तु वेदान्ते भावात्मकमेव अज्ञानस्वरूपं प्रत्यक्षादिप्रमाणैः संसाध्यते। अज्ञानस्य भावरूपत्वे यथा प्रत्यक्षं प्रमाणम्, तथा श्रुतिस्मृतयः अपि प्रमाणम्।

अज्ञानस्य भावरूपत्वे साक्षिवेद्यत्वेन प्रत्यक्षमेव प्रमाणम्। "अहमज्ञः, अहं न जानामि" इति प्रत्यक्षात्मकानुभवः अज्ञानस्य भावरूपत्वं प्रमापयति। तत्र "अहमज्ञः" इत्यस्य अज्ञानवान् अहम् इत्यर्थः। तच्च अनुभूतम् अज्ञानम् अभावातिरिक्तं भावरूपमेव न तु अभावरूपम्। अद्वैतवेदान्तमते अभावः अनुपलब्धिप्रमाणगम्यः न तु प्रत्यक्षप्रमाणविषयः। अज्ञानस्य प्रत्यक्षविषयत्वस्वीकारात् अज्ञानं न अभावरूपम्।

**"नीहारेण प्रावृताः", "अनृतेन हि प्रत्यूढाः"** इत्यादिश्रुतयः अज्ञानस्य भावरूपत्वे प्रमाणम्।

इह अनृतशब्देन अज्ञानमभिधीयते। अज्ञानेन प्रत्यूढाः तिरोहिताः इत्यर्थः। स्वरूपतिरोधानं तु जीवानां अभावात्मकाज्ञानेन न सम्भवति। भावात्मकस्वरूपत्वे सति अज्ञानस्य आत्मस्वरूपतिरोधानं युज्यते।

**नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः।**
**अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः।(५/१४)**
**नाहं प्रकाशः सर्वस्य योगमायासमावृतः। (७/२५)**

इत्यादिस्मृतिरपि आत्मस्वरूपम् अज्ञानेनावृतम् आच्छादितमिति ज्ञापयति। अज्ञानस्य अभावरूपत्वे अभावात्मकाज्ञानेन ब्रह्मस्वरूपावरकत्वं नोपपद्यते। श्रुतिस्मृतिप्रमाणबलात् ब्रह्मस्वरूपावरकत्वेन भावरूपमेवाज्ञानम् अभ्युपेयम्।

यद्यपि अज्ञानम् अविद्येति पदश्रवणकालोत्तरं ज्ञानाभाव एव अज्ञानं, विद्याया अभाव एव अविद्येति प्रतीयते। तथापि "नाभावात् भावोत्पत्तिरिति" न्यायेन रागद्वेषास्मितादीनाम् अविद्याकार्याणां अभावादुत्पत्तिरिति नाङ्गीक्रियते वेदान्तिभिः। सत्कारणवादिभिः वेदान्तिभिः न कस्यचित्पदार्थस्य अहैतुकी उत्पत्तिः अङ्गीक्रियते। सर्वं कार्यं खलु सकारणम्। न किंचित्कार्यम् आकस्मिकमिति वेदान्तसिद्धान्तः। अत एव अनुभूयमानरागद्वेषादीनां भावरूपमज्ञानमिति कारणं कल्प्यते। तदुक्तं संक्षेपशारीरके श्रीमता सर्वज्ञात्ममुनिना-

"न अभावतास्य घटते वरणात्मकत्वात्, न अभावमावरणमाहुः अभावशौण्डाः।

अज्ञानमावरणमाह च वासुदेवः, तद्भावरूपमिति तेन वयं प्रतीमः।।"

एवञ्च चैतन्यावरकत्वेन अज्ञानस्य भावरूपत्वमिष्यते। वस्तुतस्तु भावरूपमित्यनेन अभावविलक्षणत्वमेव प्रतिपाद्यमिति अद्वैतसिद्धिकारस्य मतम्।

एवञ्च जडरूपस्य अज्ञानस्य साक्षिणा एव अवभासः। साक्षिचैतन्येन ज्ञानस्वरूपेण अज्ञानं प्रकाश्यते। साक्षिचैतन्यविषयत्वात् अनुभवविषयत्वाच्च अज्ञानं भावरूपमिति वेदान्तसिद्धान्तः।

## २०.१.४ अज्ञानस्य ज्ञानविरोधित्वम्

अद्वैतसिद्धान्तानुसारं जगदुपादानभूताज्ञानस्य जन्ममरणदुःखनिदानस्य ब्रह्मज्ञानेन नाशो भवति। तत्राज्ञानस्य ज्ञानविरोधित्वमेव स्वभावः। यथा इदं रजतम् इति भ्रान्तिस्थले इदमंशत्वेन शुक्तिज्ञाने सति भ्रमोपादानमज्ञानं विनश्यति, तथा विशुद्धब्रह्मज्ञानेन अज्ञानं स्वकार्येण सह आत्यन्तिकरूपेण विनिवर्तते। किं हि ज्ञानविरोधित्वमित्युक्तौ **प्रमाणासहिष्णुत्वमेव ज्ञानविरोधित्वम्**। तदुक्तं सुरेश्वराचार्यैः -

**अविद्याया अविद्यात्वे इदमेव तु लक्षणम्।**
**यत्प्रमाणासहिष्णुत्वमन्यथा वस्तु सा भवेत्।।(बृहदारण्यकवार्तिकम् १८१)**

प्रमाणेन परीक्ष्यमाणायां सा अविद्या स्वकार्येण सह बाध्यते। सूर्योदयसमकाले एव अन्धकारनाशो भवति तद्वत् ज्ञानोदयसमकाले एव अविद्यानिवृत्तिः, सा च क्वापि विचारं वा प्रमाणपरीक्षां वा न सहते इत्यनुभवसिद्धं सर्वेषाम्। एवञ्च प्रमाणासहिष्णुत्वमेव अज्ञानस्य ज्ञानविरोधित्वम्। अविद्यायाः ज्ञाननिवर्त्यत्वे श्रुतिस्मृतयः एव प्रमाणम्। श्रुतिस्तावत् - **"तमेव विदित्वा अतिमृत्युमेति नान्यः पन्था विद्यते अयनाय"** इति, "तरति शोकमात्मवित्" (छा. उ. ७/१/३) इति,

स्मृतिरपि -

**ज्ञानेन तु तदज्ञानं येषां नाशितमात्मनः।**
**तेषामादित्यवद् ज्ञानं प्रकाशयति तत्परम्।। इति। (गीता.५/१६)**

### २०.१.५ अज्ञानस्य अनादित्वम्।

जगतः परिणाम्युपादानम् अज्ञानं अनादिरूपामिति वेदान्तराद्धान्तः। अत एव अनाद्युपादानं ज्ञाननिवर्त्यम् अज्ञानमिति वदन्ति। अज्ञानस्य अनादित्वे श्वेताश्वतरीयमन्त्रः प्रमाणत्वेन उदाहर्तुमुचितम्।

यथा -

**अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः।**
**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः।। (श्वे.उ.४/५)**

इह **'अजाशब्देन'** न जायते इति निर्वचनेन अजाशब्दस्य अनादिरूपाज्ञाने तात्पर्यमिति शास्त्रविदो वदन्ति। पुनश्च, सांप्रदायिकवचनमपि तत्रप्रमाणम्-

**जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा।**
**अविद्या तच्चितोर्योगः षडस्माकमनादयः।।**

अनादिरूपस्यापि अस्याज्ञानस्य ज्ञाननिवर्त्यत्वमेवाङ्गीकृतम्, न तु तस्य नित्यत्वम्। ब्रह्मसाक्षात्कारपर्यन्तं सा माया अबाधिता सती अनुवर्तते इति विवेकः।

## २०.२ अज्ञानस्य उपपादने प्रमाणानि।

प्रमाणं विना लोके न किमपि वस्तु साधयितुं शक्यते। **"मानाधीना मेयसिद्धिः"** इत्यस्ति शास्त्रमर्यादा। प्रमां प्रति असाधारणं कारणं प्रमाणं भवति। अनादि, भावरूपमिति अज्ञानं पूर्वत्र लक्षितम्। अधुना अज्ञाने प्रमाणानि विचार्यन्ते। वेदान्तशास्त्रे बहुभिः प्रमाणैः अज्ञानं निरूप्यते।

अज्ञानस्य उपपादने **"साक्षिणः अनुभवः"** एव परमप्रमाणम्। "अहमज्ञः, अहं न जानामि" इति अपरोक्षानुभूतिः भावरूपम् अज्ञानं प्रमापयति। अन्तःकरणोपाधिकः चेतनः साक्षी इत्युच्यते। एवञ्च जीवसाक्षिणः "अहमज्ञः" इति अपरोक्षानुभूतिरेव प्रमाणं भवति।

सुप्तोत्थितस्य पुरुषस्य **"न किञ्चिदवेदिषम्"** इति परामर्शः अपि अविद्योपपादने प्रमाणम्।

तथाहि कश्चित् पुरुषः गाढनिद्रायाः उत्थाय वदति "अहं सुखम् अनुभूतवान् किन्तु **न किञ्चित् ज्ञातम्"** इति। सुषुप्तौ भावरूपम् अज्ञानं अनुभूतम्। अत एव सुषुप्तितः उत्थितस्य **"न किञ्चित् ज्ञातम्"** इति परामर्शः सम्भवति। **"न किञ्चित् ज्ञातम्"** इति परामर्शे अज्ञानमेव विषयः। **"न किञ्चित् ज्ञातम्"** इत्यत्र ज्ञानस्य अभावः न विषयः। यतः गाढनिद्रायां(सुषुप्तौ) ज्ञानाभावः न विषयीक्रियते।

तदुक्तं पञ्चदश्यां-

**सुप्तोत्थितस्य सौषुप्ततमो बोधो भवेत् स्मृतिः।**
**सा चावबुद्धविषया अवबुद्धं तत्तदा तमः।। इति।**

गाढनिद्रायाः उत्थितस्य सुषुप्तिविषयिणी या स्मृतिः सा अज्ञानस्य उपपादने प्रमाणम् इत्यर्थः।

### २०.२.१ अज्ञानं कार्यानुमेयम्

माया (अज्ञानं) परमात्मनः शक्तिः। परमात्मा मायाम् आश्रित्य इदं जगत् सृजति। या शक्तिः सा शक्तिकार्यात् अनुमेया भवति। यथा दण्डदीपे विद्युत् अस्तीति दीपप्रकाशेन अनुमीयते। तथा सत्त्वरजस्तमोगुणात्मिका माया, कार्यमुखेन अनुमीयते। मायाशक्तिस्वरूपं वर्णितं भगवता शङ्कराचार्येण यथा-

**अव्यक्तनारी परमेशशक्तिः अनाद्यविद्या त्रिगुणात्मिका या।**
**कार्यानुमेया सुधियैव माया यया जगत् सर्वमिदं प्रसूयते।**

## २०.३ अज्ञानस्य जगत्कारणत्वविचारः।

अज्ञानं हि जगत्कारणम्। अज्ञानसम्बन्धादेव ब्रह्म जगतः उपादानं निमित्तं च कारणं भवति। तत्र श्रुतिः यथा-

**यथोर्णनाभिः सृजते गृह्णते च, यथा पृथिव्यामोषधयः सम्भवन्ति।**

**यथा सतः पुरुषात् केशलोमानि तथाऽक्षरात् सम्भवतीह विश्वम्।** (मु.उ १/१/७) इति। अयं च विषयः प्रथमपाठे अधिगतः। अधुना माया (अज्ञानम्) अपि जगत्कारणं भवति वा न वेति विचारणीयम्। तत्रापि अज्ञानं प्रपञ्चं प्रति उपादानं वा निमित्तकारणं वा इति परीक्षणीयम्। सर्वेषु कार्येषु स्वकारणस्य गुणविशेषाः अनुभूयन्ते। यथा मृत्तिकायाः उत्पन्ने घटे मृत्तिकायाः गुणाः प्रतीयन्ते। तन्तुभ्यः उत्पन्ने पटे तन्तुगुणाः लक्ष्यन्ते। तथैव इदं जगत् स्वकारणानुरूपं स्यात्। कार्यकारणयोः समानस्वभावः भवति। कदापि कार्यं स्वकारणात् अत्यन्तं विरुद्धस्वभावं न भवेत्। किन्तु इदं जगत् जडत्वेन आभाति। जगति रागद्वेषमोहादयः गुणाः अनुभूयन्ते। अस्मिन् अनित्यत्वादयः हेयगुणाः (क्षुद्रगुणाः) वर्तन्ते। जगत्कारणं ब्रह्म चेतनं, निर्गुणं च वर्तते। जगति अनुभूयमानाः जडत्व-अनित्यत्वादयः न ब्रह्मगुणाः। तस्मात् ब्रह्मभिन्नं जडम्, त्रिगुणात्मकं च अज्ञानं जगतः उपादानकारणमिति अङ्गीकरणीयम् (ब्रह्म जगतः उपादानं निमित्तकारणं च भवति किन्तु अज्ञानमपि उपादानकारणमिति विशेषः।)।

तदुक्तं वेदान्तसंप्रदाये -

**अस्ति भाति प्रियं रूपं नाम चेत्यंशपंचकम्।**
**आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम्।। इति।**

**"अस्ति भाति प्रियम्"** इति त्रिभिः "सत्-चित्-आनन्दः" ब्रह्मस्वभावः प्रदर्शितः। नाम रूपं चेति जगत्कारणस्य अज्ञानस्य स्वभावः निरूपितः। यथा कार्ये जगति सच्चिदानन्दः ब्रह्मधर्मः अनुभूयते। तथैव नामरूपं, रागद्वेषादयः, जडत्व-अनित्यत्वादयः धर्माः अपि अनुभूयन्ते। सर्वदा सत्वरजःस्तमोगुणान्वितमेव इदं जगत्कार्यम् अनुभूयते। कार्ये अनुभूयमानानां धर्माणाम् उपादानकारणानुगतिः एव वक्तव्या। अतश्च ब्रह्म माया (अज्ञानम्) चेति उभयं जगतः उपादानकारणमिति वेदान्तसिद्धान्तः।

तत्र मायायाः जगदुपादानम् इत्यत्र श्रुतिप्रमाणम्।

यथा - **"इन्द्रो मायाभिः पुरुरूप ईयते" (ऋ.सं-९/४७/१८)** इति।

यथा- **"अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां "स्वरूपाः"** (श्वे.उ.४/५) इति।

तत्र अज्ञानं जगतः सृष्टौ परिणामि-उपादानकारणमिति उच्यते। यथा मृत्तिका घटाकारेण परिणमते। तथा अज्ञानं स्थूलप्रपञ्चाकारेण परिणमते।

अज्ञानं च परिणाम्युपादानम्। **परिणामो हि उपादानसमसत्ताककार्यापत्तिः।** यस्य कार्यस्य सत्ता उपादानकारणसमा, तत्कार्यम् उपादानसमसत्ताकम् इत्युच्यते। (.वेदान्तदर्शने सत्तात्रयं निरूपितं यथा पारमार्थिकसत्ता, व्यावहारिकसत्ता, प्रातिभासिकसत्ता चेति।) ततः कार्यस्य उपादानसमसत्ताकः अन्यथाभावः एव परिणामः। मायायाः व्यावहारिकी सत्ता भवति। एवञ्च कार्य-कारणयोः समसत्तायाम् अन्यथाभावः भवति। प्रपञ्चस्य अज्ञानोपादानकारणसलक्षणः अन्यथाभावः। एवञ्च अज्ञानं जगतः सृष्टौ परिणामि-उपादानकारणमिति वेदान्ततात्पर्यम्।

## २०.४ अज्ञानभेदविचारः(एकजीववाद-नानाजीववादाश्रयेण)

वेदान्तशास्त्रे अज्ञानस्य भेदविचारः बहुभिः प्रकारैः विहितः। तद्यथा-

### २०.४.१ समष्टि-व्यष्टिबुध्या अज्ञानम् एकम् अनेकं चेति।

इदम् अज्ञानं समष्टि-व्यष्टिबुध्या एकम् अनेकं चेति व्यवह्रियते। समष्टिबुद्धिः हि बहूनाम् अवयवानां समूहबुद्धिः (एकत्वबुद्धिः)। यथा बहूनां वृक्षाणां समूहाभिप्रायेण वनमिति।

तस्यैव समूहस्य प्रत्येकम् अवयवदृष्टिः व्यष्टिबुद्धिः इति कथ्यते। यथा वनस्य व्यष्टिबुध्या (नानात्वबुध्या) वृक्षाः इति व्यवहारो भवति। अतः एकत्वबुध्या समूहव्यवहारो भवति।

अतः जीवगतानाम् अज्ञानानां समूहबुध्या **अज्ञानम् एकमेव। तत्र "अजामेकां लोहितशुक्लकृष्णाम्" इति** प्रमाणम् (.यथा–"यथा वृक्षाणां समष्ट्यभिप्रायेण वनमिति एकत्वव्यपदेशः, यथा वा जलानां समष्टि–अभिप्रायेण जलाशय इति, तथा नानात्वेन प्रतिभासमानां जीवगत–अज्ञानानां समष्टि–अभिप्रायेण तदेकत्वव्यपदेशः" *(वेदान्तसारः)* इति।)। इदमज्ञानम् उत्कृष्टस्य परब्रह्मणः उपाधित्वेन शुद्धसत्त्वप्रधानमिति कथ्यते। एवञ्च समष्ट्यज्ञानोपाधिकं चैतन्यमेव ईश्वरः, अन्तर्यामी इत्युच्यते। **"यः सर्वज्ञः सर्ववित्"** इति श्रुतिप्रमाणं भवति।

वयं सर्वेऽपि मनुष्याः इति एकत्वव्यवहारः समष्टि-अभिप्रायेण भवति। किन्तु तत्रैव व्यष्टि-अभिप्रायेण अस्मासु रामः, कृष्णः इति भेदव्यवहारो भवति।



एवमेव एकत्वेन प्रतिभासमानम् अज्ञानं व्यष्ट्यभिप्रायेण अनेकम् इति निरूप्यते। (."यथा वनस्य व्यष्टि–अभिप्रायेण वृक्षाः इति अनेकत्वव्यपदेशः,यथा वा जलाशयस्य व्यष्ट्यभिप्रायेण जलानि इति, तथा अज्ञानस्य व्यष्ट्यभिप्रायेण तदनेकत्वव्यपदेशः" *(वेदान्तसारः)* इति।

अज्ञानम् अनेकम् इत्यत्र श्रुतिप्रमाणं यथा- "इन्द्रो मायाभिः पुरुरूप ईयते"(ऋ.सं-९/४७/१८) इति। इन्द्रः परमेश्वरः मायाभिः बहुरूपेण प्रकाशते। इदमज्ञानं जीवोपाधितया मलिनसत्वप्रधानम् इति व्यवह्रियते।

एवञ्च समष्टि-व्यष्टिबुध्या अज्ञानम् एकम् अनेकं चेति वेदान्तसिद्धान्तः।

अज्ञानम् माया-अविद्या चेति द्विधा निरूप्यते। पञ्चदश्यां प्रोक्तं यथा-

**तमोरजस्सत्त्वगुणा प्रकृतिः द्विविधा च सा।**
**सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते।**
**मायाबिम्बो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः।**
**अविद्यावशगस्त्वन्यः तद्वैचित्र्यादनेकधा।। इति।**

## २०.४.२ जीव-ईश्वरोपाधिदृष्ट्या

### १. अज्ञानं मायाविद्याभेदेन द्विविधम्– गुणत्रयाधारेण विभागः

शुद्धसत्त्वप्रधानम् अज्ञानं माया इत्युच्यते। मलिनसत्त्वप्रधानम् अज्ञानम् अविद्येत्युच्यते।

अत्र किं हि शुद्धसत्त्वम्? रजस्तमोभ्याम् अतिरस्कृतं सत्त्वं शुद्धसत्त्वमित्युच्यते।

रजस्तमोभ्याम् अभिभूतं सत्त्वं मलिनसत्त्वमिति व्यपदेशः।

अयं च भेदः अज्ञानस्य श्रुत्या एव प्रदर्शितः यथा-

"जीवेशौ आभासेन करोति माया चाविद्या च स्वयमेव भवति" - (नृ.उ.९-३) इति।

**अज्ञानम्- शक्तिभेदेन**

**अज्ञानम्**

**ज्ञानशक्तिः**

रजस्तमोभ्यामनभिभूतं सत्त्वं ज्ञानम्

"सत्त्वात् संजायते ज्ञानम्" इति गीतावचनाच्च।

**क्रियाशक्तिः**

सत्वेन अनभिभूते रजस्तमसी क्रियाशक्तिः

**आवरणशक्तिः**

रजसत्त्वाभ्याम् अनभिभूतं तमः

("कृष्णं तमः आवरणात्मकत्वात्" भाष्यवचनाच्च)

"नास्ति न भासते" इति व्यवहारहेतुः

**विक्षेपशक्तिः**

तमःसत्त्वाभ्याम् अनभिभूतं रजः

("रजसो लोभ एव च" इति गीताप्रामाण्यात्)

आकाशादिप्रपंचोत्पत्तिहेतुः

(विक्षेपशक्तिः लिंगादिब्रह्माण्डान्तं जगत् सृजेत्)



| **आवरणशक्तिप्रधाना अविद्या** | **ज्ञानशक्तिप्रधाना, विक्षेपशक्तिप्रधाना च माया** |
|---|---|
| अविद्योपहितं चैतन्यं जीवः स एव प्राज्ञः | मायोपहितं चैतन्यमीश्वरः, अन्तर्यामी |
| त्वंपदवाच्यार्थः | तत्पदवाच्यार्थः |

भगवता शङ्कराचार्येण प्रोक्तं - **"अविद्यायाः तामसत्वात्। तामसो हि प्रत्ययः आवरणात्मकत्वाद् अविद्या, विपरीतग्राहकः संशयोपस्थापको वा अग्रहणात्मको वा। विवेकप्रकाशभावे तदभावात्।"**(गीता.१३.२)

यदा इदमेव सत्त्वं निरतिशयसुखविषयं ब्रह्मज्ञानविषयं च भवति तदा बन्धरूपः सत्त्वगुणः मोक्षोपयोगी भवति। अत एव भगवती देवात्मशक्तिः पुरुषस्य बन्धमोक्षप्रयोजिका। तथाहि गीतं भगवता -

**दैवी ह्येषा गुणमयी मम माया दुरत्यया।**
**मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।। (गीता ७/१४)**

मायायाः आत्मशक्तिरूपत्वं दुर्गासप्तशत्यामपि प्रोक्तम् - "देव्या यया ततमिदं जगदात्मशक्त्या" इति।

## २०.५ जीवाश्रिता ब्रह्मविषयिणी माया - भामतीपक्षः

भामतीकारस्य मतानुसारं मायायाः आश्रयः जीव एव न तु ब्रह्म। जीवाश्रिता माया ब्रह्म विषयीकरोतीति मण्डनमिश्रवाचस्पतिमिश्रादीनां मतम्।

**१)** "अहमज्ञः ब्रह्म न जानामि" इति प्रत्यक्षप्रमाणेन जीवस्यैवाज्ञानाश्रयत्वं प्रतीयते। अहमज्ञः इत्यत्र साक्षादेव जीवस्य अज्ञानाश्रयत्वं गम्यते तत्र यदि शुद्धचैतन्यस्यैव अज्ञानाश्रयत्वं स्यात् तर्हि सर्वेषामेव युगपद् अयमनुभवो भवेत्। न तु तथा अनुभवो भवति। "अहमज्ञः" इत्यत्र अहंकारोपहितत्वप्रतीत्या देहेन्द्रियादिसंघातोपाधिक एव जीवः प्रतीयते, तस्यैव अज्ञानाश्रयत्वमुचितम्।

शुद्धे ब्रह्मणि अज्ञानाश्रयत्वं न युज्यते - स्वप्रकाशस्वभावे शुद्धे ब्रह्मणि तद्विपरीतस्वभावस्य अज्ञानस्य आश्रयत्वमेव नोपपद्यते तमःप्रकाशवद् विरुद्धस्वभावत्वात्।

**२)** भगवतः भाष्यकारस्यापि वाक्यमपि प्रमाणम् अविद्यायाः जीवाश्रयत्वे। भगवद्गीतायाः त्रयोदशाध्याये द्वितीयश्लोकभाष्ये प्रोक्तं - **"सा अविद्या कस्य? यस्य दृश्यते तस्यैव। दृश्यते चेद् अविद्या तद्वन्तमपि पश्यसि। न च तद्वति उपलभ्यमाने सा कस्य इति प्रश्नो युक्तः। न हि गोमति उपलभ्यमाने गावः कस्य इति प्रश्नः अर्थवान् भवेत्।"** इति। (गीता.१३.२)

ब्रह्मविषयिणी जीवाश्रितैवाविद्या न ब्रह्माश्रिता। तदुक्तं ब्रह्मसिद्धौ - **"कस्याविद्येति जीवानामिति ब्रूमः"**।

भामत्यामपि प्रोक्तं - **"नाविद्या ब्रह्माश्रया किन्तु जीवे सा तु अनिर्वचनीया"**।

आक्षेपसमाधानम् -

जीवस्य अविद्याश्रयत्वे अन्योन्याश्रयदोषो भवतीति विवरणानुयायिनाम् आक्षेपः। यतः अज्ञाननिमित्तमेव जीवत्वविभागः, जीवविभागे सति अज्ञानसंज्ञा इति अन्योन्याश्रयदोषम् उद्भावयन्ति। तत्समाहितं यथा जीवस्य अज्ञानस्य चोभयोः अनादित्वात् नान्योन्याश्रयता। भामत्यां प्रोक्तं यथा **"कार्यकारण-अविद्याद्वयाधारः अहंकारास्पदं संसारी सर्वानर्थसंभारभाजनं जीवात्मा इतरेतराध्यासोपादानः तदुपादानश्चाध्यासः इत्यनादित्वात् बीजांकुरवद् नेतरेतराश्रयत्वम्"**।

यत्र तु मायायाः ब्रह्माश्रितत्वेन श्रुतौ श्रूयते "मायिनं तु महेश्वरम्" तत्र निमित्तत्वेन विषयत्वेन एव ब्रह्माश्रयत्वं न तु आधारतया। तदुक्तं भामत्यां " जीवाधिकरणा अपि अविद्या निमित्ततया विषयतया चेश्वरमाश्रयते इति ईश्वराश्रया इत्युच्यते न तु आधारतया"।

सा च अविद्या जीवाश्रिता प्रतिजीवं नाना इत्यतः बन्धमोक्षव्यवस्थापि उपपद्यते। यस्याविद्याश्रयत्वं तस्य बन्धः यस्य अविद्या नष्टा तस्य मोक्षो भवतीति संक्षेपः।

एवंच भामतीसंप्रदायानुसारं ब्रह्मविषयिणी जीवाश्रिता माया इति सिद्धान्तः।

## २०.६ शुद्धब्रह्माश्रिता ब्रह्मविषयिणी माया-विवरणपक्षः

अविद्या जीवेश्वरविभागरहितं शुद्धं ब्रह्म एव आश्रयते, शुद्धमेव ब्रह्म विषयीकरोति।

**"नन्वविद्या किं सम्बन्धिनी भेदनिमित्तम्? ...इहापि चित्स्वरूपसम्बन्ध्यज्ञानं तत्र जीवब्रह्मव्यवहारभेदं प्रवर्तयति**। ( विवरणवाक्यम्)

शुद्धं ब्रह्म एव अज्ञानस्याश्रयः चेद् **"अहमज्ञः"** इति अनुभवविरोधः स्यात्। अस्मिन्ननुभवे अहंपदवाच्यः जीव एव अज्ञानाश्रयत्वेन प्रतीयते।

तत्रेदं समाधानम् -

**आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।**
**पूर्वसिद्धतमसो हि पश्चिमो नाश्रयो भवति नापि गोचरः।।**

अयमर्थः - पूर्वसिद्धस्य अज्ञानस्य पश्चात्सिद्धजीवो नाश्रयो, नापि विषयः। जीवविभागनिमित्तमेव अज्ञानम्। जीवात्मनः पूर्वम् अज्ञानस्य निराश्रयत्वप्रसंगः।

विवरणानुयायिनः मायायाः ब्रह्माश्रितत्वे **श्रुतिस्मृतिभाष्यमेव प्रमाणम्** इति वदन्ति।

**१) मायां तु प्रकृतिं विद्यात् मायिनं तु महेश्वरम्।**

**२) मयाध्यक्षेण प्रकृतिः सूयते सचराचरम्** (गी.९/१०)**, मम माया दुरत्यया** (गी.७/१४) इति।

**३) "अविद्यात्मिका हि बीजशक्तिः अव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी महासुप्तिः यस्यां स्वरूपप्रतिबोधरहिताः शेरते संसारिणो जीवाः"** (ब्र.भा.१/४/३) इति।

आक्षेपसमाधानम् -

मायायाः शुद्धब्रह्माश्रयत्वे अयं प्रश्नः समुत्थापितः भास्कररामानुजीयैः अस्मदीयैश्च कैश्चित्।

तद्यथा - ब्रह्मविपरीतस्वभाववती माया स्वप्रकाशब्रह्मणि कथमाश्रिता, तमःप्रकाशवद् विरुद्धस्वभावयोः मायाब्रह्मणोः कथं सम्बन्धः? इति। शुद्धं ब्रह्म कथम् अज्ञानाश्रयः तस्य स्वयंज्योतिःस्वभावत्वात्।

**तत्र समाधानं** यथा - **शुद्धं चैतन्यं न अज्ञानविरोधि, न वा अज्ञानतिरस्कारोपयोगि किन्तु वृत्तिप्रतिबिम्बितमेव चैतन्यं अज्ञानविरोधि**। वृत्तिप्रतिबिम्बितचैतन्यं नाज्ञानाश्रयः। यच्च अज्ञानाश्रयः शुद्धं ब्रह्म तन्न अज्ञानविरोधि। यथा शुद्धस्य सुवर्णस्य न हारभावनोपयोगिता तथा शुद्धं चिन्मात्रं अविद्यायाः निवृत्तौ न उपयोगि।

तदुक्तम् **अद्वैतसिद्धौ - "अज्ञानविरोधि ज्ञानं हि न चैतन्यमात्रं किन्तु वृत्तिप्रतिबिम्बितं तच्च नाविद्याश्रयः, यच्चाविद्याश्रयः तच्च नाज्ञानविरोधि"**

अत्र सिद्धान्तस्य स्वारस्यं वार्तिककाराः सुरेश्वराचार्याः उद्घाटयन्ति यथा -

**"तृणादेर्भासिकाप्येषा सूर्यदीप्तिस्तृणं दहेत्।**
**सूर्यकान्तमुपारुह्य न्यायोऽयं योज्यतां धिया।।**

यथा सूर्यप्रकाशः तृणादेः भासकः सूर्यकान्तमणिसंबन्धवशात् तृणादेः नाशकोऽपि तथा शुद्धचैतन्यं स्वतः अविद्यायाः तत्कार्याणां भासकं, तदेव शुद्धचैतन्यं वृत्तिप्रतिबिम्बितं सत् अविद्यादीनां नाशकमपि भवति।

**शुद्धचैतन्यमात्रं अविद्यासाधकं, तत्प्रकाशकं च भवति न तु तद् बाधकम्**।

"कण्टकेनैव कण्टक्मुक्तिवत्" वेदान्तिभिः आविद्यकपदार्थेन एव अविद्यानिवृत्तिः इष्यते। तत्र संप्रदायप्रसिद्धदृष्टान्तः **परशुदृष्टान्तः**।

वृक्षस्य च्छेदनार्थं तस्यैव वृक्षस्य दण्डमादाय परशुना सह संयोज्य स एव वृक्षः खण्ड्यते। तथैव समाधौ या साक्षात्कारात्मिका ब्रह्मविषयिणी अखण्डाकारकवृत्तिः तया अविद्यानिवृत्तिः, तस्याः अपि साक्षात्कारात्मकवृत्तेः आविद्यकत्वात् अविद्यया सह निवृत्तिः इति वेदान्तराधान्तः।

## पाठागतप्रश्नाः-१

१. किम् उद्दिश्य श्रवणादिकम् उपदिश्यते ?
२. केन अज्ञानं नश्यति?
३. आत्मा सर्वदा किंस्वरूपा भवति?
४. परमात्मा केन साहाय्येन जगत् सृजति?
५. अज्ञानस्य पर्यायशब्दाः के?
६. जगतः उपादानकारणं किम्?
७. अज्ञानस्य त्रयः गुणाः के भवन्ति?

८. किं हि सत्?

९. किं हि असत्?

१०. अद्वैतवेदान्तदिशा अभावस्य प्रत्यक्षत्वं केन सिध्यति?

११. अद्वैतवेदान्ते अज्ञानस्य भावरूपत्वं वा अभावरूपत्वं वा स्वीक्रियते?

१२. ज्ञानविरोधित्वं वै किम्?

१३. परिणामो वै किम्?

१४. अज्ञानम् एकम् अनेकं वा?

१५. किं वै शुद्धसत्वम्?

१६. अज्ञानस्य शक्तिद्वयं किम्?

१७. कः जीव?

१८. कः ईश्वरः?

१९. भामतीपक्षे मायायाः आश्रयः कः?

२०. विवरणनये मायायाः आश्रयः कः?

## पाठसारः

एतावता च इदं साधितं भवति यत् अज्ञानं वै किञ्चित् अस्ति। तत् प्रकाशरूपमात्मानं सूर्यं प्रकृष्टप्रकाशं मेघः इव आच्छाद्य तिष्ठति। तस्य स्वरूपे वादिनां यद्यपि विप्रतिपत्तिः तथापि विचारे कृते भावरूपत्वमभावभिन्नत्वमेव वा तस्य सिध्यति। तस्य च अस्ति लक्षणं द्वित्रिरूपम्।

अतः लक्षणेन सम्भावितत्वात् भवति प्रमाणगवेषणा तत्र। प्रमाणं च तत्र प्रत्यक्ष-अनुमान-आगम-अर्थापत्तिरूपं चतुर्विधमसद्व्यावृत्तिं सम्पादयति। यथालक्षणं स्वरूपं तु साक्षिणा एव सिध्यति।

आश्रयः च अस्य चैतन्यमेव। तच्च शुद्धं वा जीवरूपं वा इति भवति विचारः यद्यपि तथापि सर्वेषां मते चैतन्यस्य एव आश्रयत्वमविवादम्। जीवश्रिता अविद्या इति पक्षे अपि अविद्यकल्पितस्य जीवस्य आश्रयत्वमविद्यायाः अपि आश्रयत्वं नापादयति अपि तु चैतन्यस्य एव। अतः सर्वेषां एव परीक्षकाणामविद्यायाः चैतन्याश्रितत्वमविरुद्धमस्ति। विषयः अपि च अस्य चैतन्यमेव। आवरणरूपस्य विषयत्वस्य तदतिरिक्ते असम्भवात्।

न च इदं सत्वेन असत्वेन सदसत्वेन वा निरूपयितुं शक्यम्। अतः अनिर्वचनीयमिति व्यवह्रियते। अनिर्वचनीयत्वे च अस्य सन्ति प्रमाणानि प्रत्यक्ष-अनुमान-अर्थापत्ति-आगमरूपाणि चत्वारि। अतः अनिर्वचनीयता अस्य प्रमाणसिद्धा भवति।

तच्च इदं सर्वस्यापि प्रपञ्चस्य परिणममानतया उपादानम्। ईश्वरस्य शुद्धस्य चैतन्यस्य वा विवर्तोपादानत्वसम्पादकत्वम्। स्वयञ्च दुःखजनकत्वात् दुःखरूपमिति अनर्थः उच्यते। तस्यास्य अनर्थरूपस्य निवृत्तिः सम्पादनीया भवति। सा च निवृत्तिः बहुविधा बहुभिः आचार्यैः प्रतिपादिता अस्ति। तेषां च सर्वेषामेकत्र सम्प्रतिपत्तिः यत् अस्य अनर्थहेतोः निवृत्तिः उपपद्यते एव निवर्तकं च तत्वज्ञानं वेदान्तवाक्यजनितं साक्षात्कारात्मकमेव इति च।

ततश्च तत्वज्ञानेन अस्य निवृत्तौ सत्यां नित्यशुद्धबुद्धमुक्तस्वाभावः चैतन्यैकरसः परिपूर्णानन्दस्वरूपः स्वप्रकाशः कण्ठगतविस्मृतज्ञानप्राप्तचामीकरवत् आविर्भवति। ततश्च मोक्षः सिध्यति इति शम्।

## किमधिगतम्

१. अज्ञानस्य परिचयः प्रपञ्चितः पाठे अस्मिन्। अमुं पाठं पठित्वा अज्ञानस्य मुख्यं स्वरूपं जडत्वमेव भवतीति ज्ञातम्। जडत्वं वै अज्ञानत्वं वा अनात्मत्वं वा।

२. "लक्षणप्रमाणाभ्यां वस्तुसिद्धिः" इति नियमेन अज्ञानस्य लक्षणं "सदसद्भ्याम् अनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति" ज्ञातम्।

३. सत्वरजस्तमांसि इति त्रयः अज्ञानस्य गुणाः। सत्वरजस्तमसां गुणवैषम्यमेव सृष्टिहेतुः एवं जगतः उपादानकारणं स्वयम् अज्ञानं भवतीति ज्ञातम्।

४. सद्रूपेण वा असद्रूपेण वा अज्ञानं किमिति निरूपयितुम् अशक्यत्वात् अज्ञानम् अनिर्वचनीयमिति अवगतं भवति छात्रेण।

५. अज्ञानस्य भावरूपत्वे साक्षिवेद्यत्वेन प्रत्यक्षमेव प्रमाणम्। अहमज्ञः इति प्रत्यक्षात्मकानुभवः भावरूपमज्ञानम् आवेदयतीति अधिगतम् पाठेनानेन।

६. अज्ञानस्य ज्ञानविरोधित्वं च प्रमाणासहिष्णुत्वमिति अवगतम्।

७. जगतः परिमाण्युपादानकारणम् अज्ञानं भवति अनादिरूपमिति वेदान्तनयः इति बुद्धौ प्रत्यारूढं ज्ञातमनेन पाठपठनेन।

८. अज्ञानस्य उपपादनायां साक्षिणः अनुभवः एव परमप्रमाणमिति ज्ञातम्। सुप्तोत्थितस्य पुरुषस्य न किञ्चिदवेदिषमिति परामर्शः अपि अविद्योपपादनायां प्रमाणम्।

९. अज्ञानसम्बन्धादेव ब्रह्म जगत् सृजति इति ज्ञातम्।

१०. एकजीवनानाजीववादाश्रयेण अज्ञानभेदः ज्ञातः।

११. भामतीनये अज्ञानस्य आश्रयः जीवः विवरणनये च ब्रह्म तत्र च उभयोः प्रयुक्तयुक्तयः कथमिति विचारः सदृष्टान्तं ज्ञातः।

## पाठान्तप्रश्नाः

१. अज्ञानस्य स्वरूपं व्याख्यात।

२. अज्ञानस्य लक्षणं व्याख्यात।

३. अज्ञानं त्रिगुणात्मकमिति व्याख्यात।

४. अज्ञानं भावरूपमिति व्याख्यात।

५. अज्ञानस्य ज्ञानविरोधित्वं व्याख्यात।

६. अज्ञानस्य जगत्कारणत्वं व्याख्यात।

७. अज्ञानस्य उपपादनाय प्रमाणानि कथम् उपादीयन्ते व्याख्यात।

८. अज्ञानभेदविचारः एकजीवबहुजीववादाश्रयेण व्याख्यात।

९. जीवाश्रिता ब्रह्मविषयिणी माया - भामतीपक्षः इति व्याख्यात।

१०. शुद्धब्रह्माश्रिता ब्रह्मविषयिणी माया-विवरणपक्षः इति व्याख्यात।

## पाठगतप्रश्नानाम् उत्तराणि

१. आत्मज्ञानम् उद्दिश्य श्रवणादिकम् उपदिश्यते।

२. आत्माज्ञानेन अज्ञानं नश्यति।

३. आत्मा सर्वादा शुद्धज्ञानस्वरूपा भवति।

४. परमात्मा अविद्यासाहाय्येन जगत् सृजति।

५. अविद्या, माया, प्रकृतिः,प्रधानं स्वाभावः, मूलप्रकृतिः, अजा इत्यादयः अज्ञआनस्य पर्यायशब्दाः।

६. अज्ञानं जगतः उपादानकारणम्।

७. सत्वं रजः तमः च इति त्रयः गुणाः।

८. यत् त्रिषु अपि कालेषु केनापि न बाध्यते तत् सत्।

९. यत् त्रिषु अपि कालेषु न प्रतीयते तत् असत्।

१०. अनुपलब्धिप्रमाणेन अभावस्य प्रत्यक्षत्वं सिध्यति।

११. भावरूपत्वमेव स्वीक्रियते।

१२. प्रमाणासहिष्णुत्वमेव ज्ञानाविरोधित्वम्।

१३. उपादानसमसत्ताककार्यापत्तिः परिणामः इति।

१४. समष्टिव्यष्टिभेदेन अज्ञानम् एकम् अनेकम् इति वेदान्तसिद्धान्तः।

१५. रजस्तमोभ्याम् अतिरस्कृतं सत्वं शुद्धसत्त्वमित्युच्यते।

१६. आवरणशक्तिः विक्षेपशक्तिश्चेति।

१७. अविद्योपहितं चैतन्यं जीवः स एव प्राज्ञः।

१८. मायोपहितं चैतन्यम् ईश्वरः स एव अन्तर्यामी।

१९. जीवः।

२०. ब्रह्म।

॥ इति विंशः पाठः ॥

# २१

# जीवः

## प्रस्तावना

तत्त्वज्ञानसाधनं शास्त्रं दर्शनम्। तत्त्वम् अत्र ब्रह्म। दर्शनशास्त्रे ब्रह्मसाक्षात्कारः एव दर्शनम् इति उच्यते। यथा- आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः इति वृहादारण्यकोपनिषदि उक्तम् (२/४/४)। यस्मिन् शास्त्रे ब्रह्म ईश्वरः जीवः जगत् मोक्ष इत्येवं विषयाणाः आलोच्यन्ते तत् दर्शनशास्त्रम् इत्युच्यते। अत एव दर्शनस्य पारिभाषिकः अर्थः दृश्यते यथार्थरूपतया ज्ञायते अलौकिकार्थो येन तत् दर्शनं न तु चाक्षुषदर्शनं ज्ञानं वा। अद्वैतवेदान्ते जीवब्रह्मणोः ऐक्यं प्रतिपाद्यते। ब्रह्मैव जीवः नापरः। जीवः नित्यः अस्मिन् अद्वैतवेदान्तदर्शने। जीवस्य तत्त्वनिरूपणाय त्रयः पक्षाः आलम्बिताः। प्रतिबिम्बवादः अवच्छेदवादः आभासवादश्च। प्रतिबिम्बवादः श्रीपद्मपादाचार्यानुयायिनाम् अवच्छेदवादः श्रीवाचस्पतिमिश्रानुयायिनाम् आभासवादश्च सुरेश्वराचार्यानुयायिनाम्। तेन अविद्यायाः कार्यम् अन्तःकरणं तत्र प्रतिबिम्बः जीवः अन्तःकरणावच्छिन्नं चैतन्यं जीवः चैतन्यस्य आभासः वा जीवः इत्युच्यते।

## उद्देश्यानि

अमुम् पाठं पठित्वा भवान्-

- अद्वैतवेदान्तदर्शने जीवः कः इति ज्ञातुं शक्ष्यति।
- जीवब्रह्मणोः ऐक्यं कथं बोद्धुं पारयेत्।
- जीवेश्वरयोः पार्थक्यं किम् इति अवगच्छेत्।
- जीवः नित्यः अनित्यः वा विचारयितुं शक्नुयात्।
- जीवस्य विश्वतैजसप्राज्ञसंज्ञा कथं भवति इति जानीयात्।
- जीवः विभुः अणुः वा इति ज्ञास्यति।
- जीवः कर्ता भोक्ता प्रमाता वा इति ज्ञास्यति।
- जीवस्य कर्तृत्वादिकं कीदृशम् इति जानीयात्।
- जीवस्य जन्ममरणे मुख्ये वा गौणे वा इति ज्ञातुं शक्ष्यति।
- जीवविषये प्रतिबिम्बवादः, अवच्छेदवादः आभासवादः च ज्ञाताः भवन्ति।
- एकजीववादं अनेकजीववादं च ज्ञातुं प्रभवति।
- जीवेश्वरयोः कः सम्बन्धः इति ज्ञास्यति।

## २१.१ पाठविस्तरः

कः जीवः इति विचार्यते। तत्र प्रतिबिम्बवादः अवच्छेतवादः आभासवादः इति त्रयः पक्षाः सम्भवन्ति जीवस्य स्वरूपविचारे। प्रथमं तावत् प्रकाटार्थकाराणां मते अनादिः अनिर्वाच्या भावरूपा भूतप्रकृतिः माया। तस्याः एव मायायाः परिच्छिन्ना अनन्तपरिच्छेदा आवरणविक्षेपशक्तिमन्तः अविद्या इति पदेन उच्यन्ते। आवरणशक्तिः विक्षेपशक्तिः इति मायायाः शक्तिद्वयम्। रजस्तमभ्याम् अनभिभूतं तमः आवरणशक्तिः, यथा स्वस्य अज्ञानेन आवृतायां रज्वां सर्पस्य सम्भावना। विक्षिपति विविधं सत्स्वरूपं विपरीतं प्रपञ्चभावम् आपादयति इति विक्षेपशक्तिःयथा अज्ञानेन आच्छादितं चैतन्यं विविधरूपेण प्रदर्शनम् एव विक्षेपः। मायायाः या शक्तिः ब्रह्मचैतन्यम् आवृणोति अर्थात् ब्रह्म नास्ति ब्रह्म न प्रकाशस्वरूपम् इति या बुद्धिः उत्पन्ना भवति सा आवरणशक्तिः। शुद्धब्रह्म जगतः कर्ता स्रष्टा इति बुद्धेः उत्पादिका शक्तिः विक्षेपशक्तिः। मायाविद्ययोः भेदः नास्ति। तत्र मायायां शुद्धचैतन्यसम्बन्धिन्यां शुद्धचित्प्रतिबिम्बः ईश्वरः। मायाप्रदेशेषु परिच्छिन्नेषु अविद्यादिपदेन प्रतिपाद्येषु शुद्धचित्प्रतिबिम्बः जीवः इति। प्रदेशः परिच्छिन्नः अतः जीवानां परिच्छेदः। माया अनादिरूपा अनित्या। अतः विभागः तस्याः न शक्यः। तस्याः मायायाः तु आवरणविक्षेपरूपेण शक्तिद्वयम् अनन्तम् इति तस्याः शक्तिसमन्विताः विभागाः परिच्छिन्नाः प्रदेशाः इति उच्यते। मायाविद्याविषये केषाञ्चन मतं मायारूपा अविद्यारूपा च मूलप्रकृतिः भवति। सत्त्वरजस्तमांसि इति त्रयः गुणाः। रजस्तमोभ्याम् अनभिभूता शुद्धासत्त्वप्रधाना माया तदनभिभूतसत्त्वप्रधाना अविद्या। आवरणशक्तिविक्षेपशक्तिः तु उभयत्र समाना। तत्र मायायां चित्प्रतिबिम्बः ईश्वरः, अविद्यायां चित्प्रतिबिम्बः जीवः इति। मायाख्यायाः कमधेनोः वत्सौ जीवेश्वरौ उभौ। समष्टिव्यष्टिभेदेन अज्ञानं द्विविधं कल्पितम्। व्यष्टिरूपाज्ञानं निकृष्टोपाधितया मलिनसत्त्वप्रधाना भवति। एतद्-व्यष्टिरूपाज्ञानोपहितं चैतन्यं जीवः। मलिसत्त्वप्रधानात् जीवः अल्पज्ञः, अनीश्वरः प्राज्ञः इति उच्यते। व्यष्टिरूपोपाधिः मलिनसत्त्वप्रधानः तथा च एकस्य अज्ञानस्य अवभासकःजीवः अतः स प्राज्ञपदवाच्यः। प्रायेण अज्ञः प्राज्ञः अल्पज्ञः इति । प्रकर्षेण अज्ञः नितान्तः अज्ञः ईश्वरापेक्षया इति प्राज्ञः। विश्वतैजसापेक्षया प्रकृष्टं जानातीति प्रज्ञः प्रज्ञः एव प्राज्ञः प्रकृष्टज्ञाता। अथवा आत्मस्वरूपप्राप्तिः प्रज्ञा सा प्रज्ञा यस्य अस्ति स प्राज्ञः। जीवः प्राज्ञादिभेदेन त्रिविधः। जाग्रदवस्थाभिमानी जीवः विश्वः, स्वप्नावस्थाभिमानी जीवः तैजसः, एवं च सुषुप्त्यवस्थाभिमानी जीवः प्राज्ञः। जाग्रदवस्थायां स्थूलसूक्ष्मकारणरूपत्रिविधशरीरं जीवस्य उपाधिः भवति। उप समीपवर्तिनि पदार्थे आदधाति स्वकीयं धर्मम् इति उपाधिः। स्वप्नावस्थायां स्थूलशरीरं न तिष्ठति। सूक्षम् अपञ्चीकृतं कारणशरीरं विद्यते तस्यां दशायाम्। सुषुप्तौ अविद्यारूपं कारणशरीरं विद्यमानं तिष्ठति। सुषुप्तिदशा एव जीवस्य परमं विश्रामस्य स्थानम्। सकलात् देहादिव्यापारात् निवृत्तः सन् जीवः स्वमपीतः भवति। अत्र तावत् श्रुतिः **यत्रैत्पुरुषः स्वपिति नाम सता सौम्य तदा सम्पन्नो भवति इति छान्दोग्योपनिषदि उक्तम्(६/८/१)।** सुषुप्तिं विहाय अन्यत्र जाग्रत्स्वप्नयोः जीवस्य स्वात्मप्राप्तिः, आत्मनि विश्रामः वा ब्रह्मविद्धिः न स्वीक्रियते। साधारणतया पञ्चभूतैः निर्मितः एवञ्च मनोबुद्धिसमन्वितः स्थूलसूक्ष्मशरीरे आत्मबुद्धिः वै जीवभावः। आत्मा एवं जीवभावेन शरीरे वर्तते। पशुः यथा रज्जुबद्धः सन् एकस्मात् स्थानात् स्थानान्तरे नीयते तथैव जीवः अपि वासनया बद्धः सन् शरीरात् शरीरान्तरं प्राप्नोति, विहगवत् देहरूपपिञ्जरे अवतिष्ठते च।



## २१.२ प्रतिबिम्बवादः-

विवरणकारमतानुयायिनः तु जीवस्य विचारे प्रतिबिम्बवादं स्वीकुर्वन्ति। विवरणकाराः अत्र कथयन्ति स्वतन्त्रतादिगुणस्वरूपः ईश्वरः चैतन्यं बिम्बस्थानीयम् परतन्त्रतादिगुणैः विशिष्टः अविद्यायां चिदाभासः जीवः इति। अर्थात् ईश्वरः बिम्बरूपः जीवः प्रतिबिम्बरूपः। अयमेव प्रतिबिम्बवादः।

संक्षेपशारीरके तु कार्योपाधिरयं जीवः कारणोपाधिः ईश्वरः इति श्रुतेः। अविद्यायां चित्प्रतिबिम्बः ईश्वरः। अविद्यायाः कार्येषु अन्तःकरणेषु चित्प्रतिबिम्बः जीवः इति। एकस्मिन् उपाधौ कार्यकारणाम् आपन्ने कारणे प्रतिबिम्बः ईश्वरः कार्ये प्रतिबिम्बः जीवः इति। एवम् एतेषु पक्षेषु बिम्बस्थानीयं शुद्धचैतन्यम् इति त्रिविधं चैतन्यम् उक्तं भवति शुद्धम् ईश्वरः जीवः च इति।

पञ्चदश्यां चित्रदीपे श्रीविद्यारण्यस्वामिना विशेषः उक्तः। शुद्धम् ईश्वरः जीवः इति त्रैविध्यं विहाय चातुर्विध्यम् आह चैतन्यस्य यथा एकस्य एव आकाशस्य घटाकाशः जलाकाशः मेघाकाशः महाकाशः इति चत्वारः भेदाः, तथैव एकस्यैव शुद्धचैतन्यस्य कूटस्थस्य जीवचैतन्यमीश्वरचैतन्यं शुद्धचैतन्यम् इति चत्वारः भेदाः। तथा हि-

**कूटस्थो ब्रह्म जीवेशावित्येवं चिच्चतुर्विधा।**
**घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा॥**
**घटावच्छिन्नखे नीरं यत्तत्र प्रतिबिम्बितः।**
**साभ्रनक्षत्र आकाशो जलाकाश उदीर्यते॥**
**महाकाशस्य मध्ये यन्मेघमण्डलमीक्ष्यते।**
**प्रतिबिम्बतया तत्र मेघाकाशः जले स्थितः॥**

घटेन अवच्छिन्नः आकाशः घटाकाशः। घटाश्रिते जले प्रतिबिम्बितः साभ्रनक्षत्रः जलाकाशः। अनवच्छिन्नः आकाशः महाकाशः। महाकाशवर्त्तिनि मेघमण्डले स्थितेषु जलेषु तुषाराकारेषु वृष्टेः कार्यानुमेयेषु जलेषु प्रतिबिम्बितः आकाशः मेघाकाशः। तथैव स्थूलसूक्ष्मदेहद्वयेन अवच्छिन्नं चैतन्यं घटाकाशस्थानीयं कूटस्थं निर्विकारम्। तत्र स्थूलदेहद्वयस्य अधिष्ठानभूते देहद्वयावच्छिन्ने कूटस्थे कल्पिते अन्तःकरणे प्रतिबिम्बितं चैतन्यं जलाकाशस्थानीयं संसारी जीवः। अनवच्छिन्नं चैतन्यं शुद्धं महाकासस्थानीयम्। अवच्छिन्ने शुद्धे चैतन्ये स्थिता माया। तत्र मायायां स्थिता याः सर्वप्राणिनां धीवासनाः, तासु प्रतिबिम्बितं चैतन्यं मेघाकाशस्थानीयम् ईश्वरः इति चैतन्यस्य चातुर्विध्यं प्राहुः। एवं जीवस्य प्रतिबिम्बपक्षः दर्शितः।

## २१.३ अवच्छेदवादः-

श्रीवाचस्पतिमिश्रस्य अनुयायिनः प्रतिबिम्बवादं निरस्य अवच्छेदवादं प्रतिपादयन्ति। तथा अन्तःकरणावच्छिन्नः जीवः। कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः इति श्रुतेः। यस्य पदार्थस्य रूपं नास्ति तस्य कथं प्रतिबिम्बसम्भवः। चैतन्यस्य रूपरहितस्य प्रतिबिम्बः न युक्तः। रूपवतः रूपवति एव प्रतिबिम्बः दृश्यते। लोके रूपवतः एव चन्द्रादेः रूपवति जलादौ प्रतिबिम्बः दृश्यते। रूपरहितस्य वायोः

क्वचित् स न दृश्यते। नीरवयवस्य आकाशस्य जलादौ प्रतिबिम्बदर्शनं भ्रमादेव भवति। तत्र सूर्यादिप्रकाशस्य एव प्रतिबिम्बात् आकाशप्रतिबिम्बः तन्निमित्तभ्रमः एव।

ननु यथा बहिः नीलं नभः साभ्रग्रहनक्षत्रयुक्तं नभः विशालं नभः इति गगनं यथा अनुभूयते तथा सरोवरादिजले अपि समानः अनुभवः लोके सम्प्रतिपन्नः। अत एव जनुदघ्ने अपि जले अगाधत्वप्रतीतिः न च रूपवतः एव प्रतिबिम्बः इति नियमः। रूपरहितस्य अपि प्रतिबिम्बदर्शनात्।

न च रूपवतः द्रव्यस्य इति नियमः। अद्वैतसिद्धान्ते न्यायसम्मतगुणद्रव्यत्वपरिभाषायाः निष्प्रमाणत्वात् अनङ्गीकारात् च न इदं सिद्धम्। शुद्धचैतन्यं निर्गुणं निष्क्रियं कदाचिदपि द्रव्यं न भवति। अतः आकाशप्रतिबिम्बे बाधकाभावात् तद्वच्चैतन्यस्य अपि अन्तःकरणादौ प्रतिबिम्बसम्भवे न किञ्चित् बाधकम्। नापि रूपवति एव प्रतिबिम्बः इति नियमः। नीरूपे अपि ध्वनौ नीरूपस्य वर्णस्य प्रतिबिम्बदर्शनात् चैतन्यस्य नीरूपस्य अन्तःकरणादौ प्रतिबिम्बपक्षे न किञ्चित् बाधकम् इति चेत् अत्रोच्यते - अन्धकारे जलादौ साभ्रनक्षत्रादेः आकाशस्य प्रकाशं विना प्रतिबिम्बानुपलब्धेः तत्र प्रकाशप्रतिबिम्बेन एव अभ्रनक्षत्रादिप्रतिबिम्बोपलब्धेः आकाशप्रतिबिम्बकल्पनानुपपत्तेः। अतः जले आकाशस्य अवच्छेदः एव न तु प्रतिबिम्बः प्रकाशस्य च प्रतिबिम्बः एव न अवच्छेदकः इति मन्तव्यम्। किञ्च आलोकप्रतिबिम्बः गगने प्रतिबिम्बः च इति प्रतिबिम्बद्वयकल्पनं जलादौ गौरवग्रस्तम्।

जले अगाधत्वप्रतीतिस्तु गगनगतप्रतीयमाननैल्यप्रतिबिम्बाद् एव उपपद्यते। न च धर्मिप्रतिबिम्बं विना धर्मप्रतिबिम्बः न स्यात् इति वक्तव्यम् स्फटिके जपाकुसुमधर्मिणः आरुण्यस्य प्रतिबिम्बदर्शनात्, न च तत्रापि जपाकुसुमस्य अपि प्रतिबिम्बः इति वाच्यम्। व्यवहिते कुसुमे अपि आरुण्यस्य प्रतिबिम्बदर्शनात्। सूर्यमण्डलादिप्रतिबिम्बाभावे अपि तद्गतप्रकाशादिधर्मस्य प्रतिबिम्बदर्शनात्।

न च ध्वनौ नीरूपे नीरूपस्य वर्णस्य प्रतिबिम्बनिदर्शनम् अपि युक्तम्। वर्णव्यञ्जकध्वनेः सन्निहितत्वात् तद्गतोदात्तत्वादिधर्माणाम् आरोपेण एकोपपत्तेः। न ध्वनौ वर्णप्रतिबिम्बः अपि तु व्यञ्जकतया सन्निहितस्य ध्वनिधर्माणां वर्णेषु समारोपः एव सम्मतः।

न च प्रतिध्वनिः पूर्वशब्दप्रतिबिम्बः यथा वर्णात्मकस्य शब्दस्य व्यक्तस्य भेरीमृदङ्गादिशब्दस्य अव्यक्तस्य च यः अयम् आकाशभवनादौ कूपादौ प्रतिध्वनिः श्रूयते सः पूर्वस्य सञ्जातस्य शब्दस्य प्रतिबिम्बः इति वाच्यम्। प्रतिध्वनेः प्रतिबिम्बः भवति इत्यत्र प्रमाणं नास्ति। तर्हि कः अयं प्रतिध्वनिः इति चेत् उच्यते-

पञ्चीकरणप्रक्रियया वायुप्रभृतीनाम् अपि शब्दाः प्रसिद्धाः सन्ति। पटहपयोनिधि-जलादिशब्दास्ते पृथिवीजलादीनाम् एव स्वशब्दाः। ननु तर्हि कः आकाशस्य शब्दः? प्रतिध्वनिः इति एव उत्तरम् अत्र। पृथिव्यादिजन्यानां शब्दानां यः प्रतिध्वनिः स एव आकाशशब्देन प्रसिद्धः। तस्य प्रतिध्वनिरूपाकाशशब्दस्य अन्यशब्दप्रतिबिम्बत्वम् अप्रामाणिकम्। यदि कश्चित् अन्यः शब्दः आकाशस्य स्यात् तर्हि तत् प्रतिबिम्बः प्रतिध्वनिः स्यात्। अन्यगतस्य शब्दस्य एव यः प्रतिध्वनिः स एव आकाशशब्दः। यथोक्तं पञ्चदश्याम् -

**प्रतिध्वनिर्वियच्छब्दो वायौ वीसीति शब्दनम्।**



**अनुष्णशीतसंस्पर्शो वह्नौ भुगुभुगुध्वनिः॥(२/३)**

तस्य आकाशशब्दस्य प्रतिध्वनिरूपस्य च आकाशस्य उपादानत्वं पटहपयोनिधिशब्दस्य च निमित्तत्वम् अस्ति इति आकाशे प्रतिध्वनेः उत्पत्तौ न किञ्चित् बाधकम्।

ननु भवतु आकाशशब्दः प्रतिध्वनिः एव किन्तु तस्य प्रतिबिम्बरूपे सति का क्षतिः, ध्वनिं प्रतिगतः प्रतिध्वनिः इत्युच्यते। पूर्वं ध्वनिम् अनुगतः एव तस्य प्रतिबिम्बरूपः प्रतिबिम्बः आकाशे अस्तु का क्षतिः इति चेत् उच्यते बिम्बप्रतिबिम्बयोः भेदपक्षे आकाशे प्रतिबिम्बः बिम्बात् भिन्नःचन्द्रादिप्रिबिम्बवत् प्रातिभासिकः इत्येव वक्तव्यम्। तथा च आकाशस्य शब्दगुणत्वं न स्यात् नहि जलस्य चन्द्रादिप्रतिबिम्बा गुणा इति केचिन्मन्यन्ते। यदि च बिम्बप्रतिबम्बयोः अभेदपक्षस्तदापि आकाशस्य शब्दगुणकत्वस्य अनापत्तिः। प्रतिबिम्बस्य प्रतिध्वनेः बिम्बाभिन्नतया बिम्बस्य च पटहपयोनिधिगुणत्वात्। नहि पटहादिगतशब्दाः आकाशस्य गुणा भवितुम् अर्हन्ति।

प्रतिध्वनिभिन्नः कश्चित् आकाकाशोपादानकः शब्दः न वा इति अत्र न इति उत्तरम्। आकाशस्य यदि उपादानं स्वीक्रियते तर्हि सहकारिकारणस्य अभावः भवति। यदि च भेर्यादिः एव सहकारिसाधनं तेन एव आकाशोपादानकः कश्चित् प्रतिध्वनिभिन्नः शब्दः जायते इति मन्यते, तदा प्रतिध्वनेः विलोपापत्तिः भवति। अतः अयं पक्षः न युक्तः भवति।

प्रतिध्वन्यतिरिक्तः आकाशदेशस्थः शब्दः न अनुभूयते। स च अनुभूयमानः शब्दः आकाशवदेव निर्निमित्तकः इति निन्यः स्यात्। तस्मात् प्रतिध्वनिः एव आकाशशब्दः इति युक्तम्। स च न प्रतिबिम्बरूपः। ननु वर्णात्मकप्रतिध्वनेः अवश्यमेव प्रतिबिम्बः अस्ति इति वक्तव्यम्। तस्य प्रतिध्वनेः आकाशादौ उत्पादकस्य अभावात्। तथा हि आकाशादीनां वर्णानामभिव्यञ्जकः कण्ठताल्वादिघातजन्यः मूलध्वनिरेव, न तु कण्ठताल्वादिः। तथा च मूलध्वनेः यथा वर्णाभिव्यञ्जकः तथैव मूलध्वनेः जायमानप्रतिध्वनिः एव वर्णप्रतिध्वनिन्यभिव्यञ्जकः इति अभिमतम्। आकाशादौ यः वर्णप्रतिध्वनिः तस्य मूलध्वनिजन्यप्रतिध्वनिः एव अभिव्यञ्जकः, न पुनः तस्य कण्ठताल्वाद्यभिघातावश्यकता इति। न क्वचित् अपि अरूपवतः अरूपवति प्रतिबिम्बसम्भवनिदर्शनम्। अरूपवत अरूपवति इत्यस्य अचाक्षुषस्य अचाक्षुषे इत्यर्थः। अतः अन्तःकरणेन अवच्छिन्नस्य एव चैतन्यस्य जीवत्वम्।

न हि यथा जले कृत्स्नस्य चन्द्रस्य प्रतिबिम्बः तथा कृत्स्नस्य चैतन्यस्य अन्तःकरणे प्रतिबिम्बः सम्भवति। यथा वा जलात् बहिस्थस्य एव आकाशस्य जले प्रतिबिम्बः न तु जलस्थस्य तथा। एवञ्च अन्तःकरणे प्रतिबिम्बस्य बिम्बभूतं चैतन्यम् अन्तःकरणानन्तर्ति एव तथा च बिम्बभूतस्य चैतन्यस्य ईश्वरस्य अन्तःकरणे प्रवेशाभावात् "यो विज्ञाने तिष्ठन् इत्यादिश्रुतौ उक्तस्य अन्तर्यामिरूपार्थस्य विरोधः स्यादेव"। न च अन्तःकरणावच्छेदपक्षे अन्तःकरणस्य विभिन्नप्रदेशे शरीरेण सह गमनागमनाभ्यां तदवच्छिन्नचैतन्यस्यापि भेदः वाच्यः। यथा घटस्य नयनानयनाभ्यां तत्तप्रदेशाकाशः एव अवच्छेद्यः। एवञ्च क्वचित् अन्तःकरणावच्छिन्नस्य कर्तृत्वम् अन्यत्र च तस्य भोक्तृत्वम् इति कृतहानिः अकृताभ्यागमप्रसङ्गः स्यात्। प्रतिबिम्बपक्षे च नायं दोषः, अन्तःकरणेन सह तत्प्रतिबिम्बस्यापि गमनादियुक्तत्वात् घटगतजलगतप्रतिबिम्बवद् इति वाच्यम्। प्रतिबिम्बपक्षे अपि उक्तदोषस्य प्रसङ्गः। तथा हि जलघटे नीयमाने न पूर्वप्रदेशस्य एव आकाशस्य प्रतिबिम्बः तत्रापि तु यत्रावस्थितो जलघटः

तत्प्रदेशाकाशस्य एव प्रतिबिम्बः। तथा च बिम्बभेदेन प्रतिबिम्बस्यापि भेदः वाच्यः, तथैव अन्तःकरणप्रतिबिम्बस्य नानाबिम्बभेदात् भेदः अवशअयंभावीति कृतहानिरकृताभ्यागमप्रसङ्गतुल्यः। न च अन्तःकरणावच्छिन्नस्य एव चैतन्यस्य अन्तःकरणे प्रतिबिम्बः इति वाच्यम्, अत्यन्तसन्निहितस्य प्रतिबिम्बादर्शनात्। न हि जलावच्छिन्नाकाशः एव जले प्रतिबिम्बते।

ननु अन्तःकरणप्रतिबिम्बः जीव इति पक्षे भवेन्नाम उक्तदोषतुल्यता अविद्याप्रतिबिम्बः जीव इत्येकजीवपक्षे नायं दोषः। तथा हि अविद्यायां चित्प्रतिबिम्बः जीवः। अन्तःकरणं तु तस्य व्यापकस्य जीवस्य विशेषाभिव्यक्तिहेतुः। यथा जलाशयव्यापिनः महामेघमण्डलप्रतिबिम्बस्य जलाशयोपरि गमनशीललोकःविशेषेण अभिव्यक्तिहेतुः तद्वत् अविद्याप्रतिबिम्बस्य विशेषाभिव्यक्तिहेतुः अन्तःकरणम् इति। तथा च एकस्य एव अविद्याप्रतिबिम्बस्य जीवस्य तत्र अन्यत्र च कर्तृत्वभोकृत्वादिविशेषाभिव्यक्तिहेतुः अन्तःकरणम् इति न कृतहानिरकृताभ्यागमदोषः इति चेन्न, अवच्छेदवादे अपि तथा सम्भावात्। यथा एव अविद्याप्रतिबिम्बः जीवः तथैव अस्मिन् पक्षे अपि विद्यावच्छिन्नः जीवः इति वक्तुं शक्यत्वात् नोक्तदोषः। एवम् अज्ञानप्रतिबिम्बः ईश्वरः अन्तःकरणप्रतिबिम्बः जीवः इति सङ्क्षेपशारीरकमते, अथवा अज्ञानप्रतिबिम्बःजीवः अन्तःकरणं तु विशेषाभिव्यक्तिहेतुः अनवच्छिन्नं चैतन्यं बिम्बभूतम् ईश्वरः इति विवरणपक्षे अपि दोषतुल्यम् इति अवच्छेदपक्षः एव ज्यायान्। प्रतिबिम्बपक्षे अपि सर्वगतस्य चैतन्यस्य अज्ञानान्तःकरणादिना अवच्छेदः अवश्यं वाच्यः अन्यथा व्यापकत्वहानिः स्यात्। एवञ्च लाघवात् अयं एव पक्षः युक्तः।

ननु अवच्छेदपक्षे श्रुतिसूत्रादिविरोधः। तथा हि यथा स्वयं ज्योतिरात्मा विवस्वानपो भिन्ना बहुधैकः अनुगच्छन् उपाधिना भेदरूपः देवः क्षेत्रस्वेवमजोऽयमात्मा इति कौषातकीयोपनिषदि उक्तम्.

**एक एव हि भूतात्मा भूते भूते व्यवस्थितः।**
**एकधा बहुधा चैव दृश्यते जलचन्द्रवद्॥इति**

"रूपं रूपं प्रतिरूपं बभूव" इत्यादिश्रुतयः प्रतिबिम्बपक्षपातिन्यः विरुध्येरन्।

अत एव चोपमा सूर्यकादिवत् इति सूत्रविरोधः। तत्र तत्र प्रतिबिम्बस्य एव वर्णनात्। सूर्यप्रतिबिम्बः सूर्यकः इवे प्रतिकृतौ कन् इति कन् प्रत्यय इति चेत् अत्र उच्यते- उक्तसूत्रदृष्टान्तस्य अम्बुवदग्रहणात्। सुर्यादि हि मूर्तेभ्यः पृथग्भूतं विप्रकृष्टदेशं मूर्त्तं जलं गृह्यते। तत्र युक्तः सूर्यादिप्रतिबिम्बोदयः। न तु आत्मा मूर्तो न च अस्मात् पृथग्भूता विप्रकृष्टदेशोपाधयः सर्वहतत्वात् सर्वानन्यत्वाच्च। तस्मात् युक्तोऽयं दृष्टान्तः।

एवं भाष्येण स्पष्टमेव अस्ति यत् रूपवतः एव रूपवत्येव विप्रकृष्टस्य एव प्रतिबिम्बः। न आत्मनः प्रतिबिम्बः भवति इति। एवं दृष्टान्तः एकः- जलगतं सुर्यप्रतिबिम्बं जलवृद्धौ वर्धते जलह्रासे ह्रासति जलचलने चलति जलभेदे भिद्यते इत्येवं जलधर्मानुयायि भवति। न तु परमार्थतः सूर्यस्य परिवर्तनं भवति इति सर्वेषां निश्चितमेव। एवं परमार्थतः अविकृतरूपम् अपि सत् ब्रह्म देहादिना उपाधिना देहाभ्यन्तरे अनुप्रविश्य वृद्धिह्रासादीन् उपाधिधर्मान् भजते इव। एवम् उभयोःदृष्टान्तदार्ष्टान्तिकयोः सामञ्जस्यम् इति अत्र विरोधः अस्मिन् अवच्छेदपक्षे नास्ति। अतः श्रुतिसूत्रभाष्याद्यवच्छेदपक्षे एव अनुगुणम्।

## २१.४ आभासवादः-

केचन वेदान्तिनः आभासवादं स्वीकुर्वन्ति। अस्मिन् मते आत्मा सत्यः। आत्मभिन्नं न विद्यते किञ्चित् वस्त्वन्तरम्। अतः आत्मा न अन्तर्यामी न साक्षी न जगत्कारणः अस्ति। तथापि अज्ञानरूपेन उपाधिना युक्तः सन् आत्मा अज्ञानेन सह तादात्म्यापन्नः भवति। तथा च अज्ञानेन सम्पृक्तः चिदाभासकारणात् स अन्तर्यामी, साक्षी, ईश्वरः इत्युच्यते। बुद्ध्युपहितः सन् बुद्धिगतस्वकीयचिदाभसम् अज्ञात्वा जीवः कर्ता भोक्ता तथा प्रमाता भवति।

## २१.५ जीवस्य कर्तृत्वादिकं जन्ममरणविचारप्रभृतयः-

कर्मणः कर्तृत्वं सुखदुःखयोः च भोक्तृत्वम् अस्मिन् एव जीवे सम्भवति। जाग्रत्स्वप्नसुषुप्तिषु तिसृषु अवस्थासु जीवः अवतिष्ठते। स्थूलसूक्ष्मकारणशरीरेषु अभिमानी जीवः क्रमशः विश्वतैजसप्रज्ञसंज्ञां लभते। अविद्यया वशीभूतः जीवः देहेन्द्रियैः सह तादात्म्यमधिगम्य शारीरकैन्द्रियिकमानसिकदुःखानां भोक्ता भवति। अविद्यायाः अपगमे ब्रह्मसाक्षात्कारे जाते स्वस्वरूपं ब्रह्म अधिगच्छति। आनन्दत्मकस्य ब्रह्मस्वरूपस्य अनुभवः एव जीवस्य मोक्षः। जीवस्य जन्ममरणे वपुषः वा इति सन्देहे वपुषः एव मरणं जन्म च इति अद्वैतवेदान्तस्य सिद्धान्तः। पुत्रः मे जातः इति तथा जातककर्मादितः ते हि जन्ममरणे आत्मनः स्याताम् इति संशयः भवति। अत्र जीवस्य मुख्यमरणाङ्कारे कृतस्य नाशः अकृतस्य अभ्यागमः च भवतः। "जीवापेतं वाव किलेदं म्रियते न जीवो म्रियत इति " छान्दोग्योपनिषदः मन्त्रेण ज्ञायते यत् ते जन्ममरणे वपुषः एव मुख्ये जीवस्य भाक्ते। वपुषः एते औपचारिके जन्मरणे अपेक्ष्य हि जातकर्म पुत्रः मे जातः इति लोकोक्तिः च। एव जीवः नित्यः। जीवः चैतन्यस्वरूपः "आत्मा एव अस्य ज्योतिः " “ अत्र अयं पुरुषः स्वयंज्योतिः भवति” इत्यादिश्रुतौ जीवस्य स्वप्रकाशत्वं प्रतिभाति। अतः जीवः चिद्रूपः। सुषुप्तिमूर्च्छासमाधिषु चैतन्याभावात् जीवः अचिद्रूपः। जागरणे च आत्ममनःसंयोगात् चैतन्याख्यः गुणः आत्मनि जायते इति तार्किकसिद्धान्तं मनसि निधाय ब्रूते सुषुप्तादौ चिदभावात् जीवः अचिद्रूपः इति इष्यते जाग्रच्चित् मनसा कृता। परन्तु अयं संशयः अयुक्तः। यतो हि चिद्रूपस्य ब्रह्मणः एव जीवरूपेण प्रवेशवर्णनात् तत्सृष्ट्वा तदेवानुप्राविशत् इति श्रुत्या जीवः चिद्रूपः एव। कथं तर्हि चैतन्यस्य सुषुप्तादौ लुप्यते, तत्र आह सुषुप्तौ चित् न लुप्यते, तत्साक्षिरूपेन अवस्थानात्. अन्यथा सुखम् अहम् अस्वाप्सम् इति सुषुप्तादिपरामर्शः न स्यात्। कथं तर्हि सुषुप्तादौ द्वैताप्रतीतिः? तत्र उच्यते द्वैतलोपात् द्वैतादृष्टिः भवति, न तु दृष्टिलोपात्। कथम् एतदवगम्यते? तत्र आह अन्यथा लोपवादिनः अपि निःसाक्षिकस्य लोपस्य वक्तुम् अशक्यत्वात्। तत्र किं प्रमाणम् इति चेत् तदाह द्रष्टुः दृष्टिलोपः अर्थात् ज्ञानलोपः न भवति। "नहि द्रष्टुः" इति श्रुतेः।

## २१.६ जीवस्य परिमाणविचारः-

**अयं जीवः न अणुः न मध्यमपरिमाणः किन्तु विभुः।** जीवः अणुः इति उपाधिद्वारा भवति। "एषः अणुः आत्मा चेतसा वेदितव्यः” इति मुण्डकोनिषदः मन्त्रे जीवः अणुः इति आम्नातम्। "महान्

अजः आत्मा यः अयं विज्ञानमयः प्राणेषु" इति बृहदारण्यकोनिषदः मन्त्रे तु जीवः सर्वगतः इति प्रतिपाद्यते। एवं विप्रतिपत्तेः सन्दिह्यते- जीवः अणुः वा सर्वगः वा स्यात्? इदानीं तु किंपरिमाणः जीवः इति विचारे सति किम् अणुपरिमाणः उत मध्यमपरिमाणः आहोस्वित् महापरिमाणः इति । ननु च न आत्मा उत्पद्यते नित्यचैतन्यश्च अयम् इति उक्तम्। अतश्च परः एव आत्मा जीवः इति आपतति। परस्य च आत्मनः अनन्तत्वम् आम्नातम्, तत्र कुतः जीवस्य परिमाणचिन्तायाः अवतारः इति उच्यते- सत्यम् एतत्, उत्क्रान्तिगत्यागतिश्रवणानि तु जीवस्य परिच्छेदं प्रापयन्ति। स्वशब्देन च अस्य क्वचित् अणुपरिमाणत्वम् आम्नायते। तस्य सर्वस्य अनाकूलत्वस्य परस्परम् अविरोधस्य प्रतिपादनाय अयम् आरम्भः। तत्र प्राप्तं तावत् उत्क्रन्तिगत्यागतीनां श्रवणात् परिच्छिन्नः अणुपरिमाणः जीवः इति। उत्क्रान्तिः तावत् "सः यदा अस्मात् शरीरात् उत्क्रामति सह एव एतैः सर्वैः उत्क्रामति" इति उपनिषन्मन्त्रेण उक्ता। गतिः अपि "ये वै के च अस्मात् लोकात् प्रयन्ति चन्द्रमसम् एव ते सर्वे गच्छन्ति। " इति उभयं कौषातकीयोपनिषदि उच्यते। आगतिः अपि "तस्मात् लोकात् पुनः एति अस्मै लोकाय कर्मणे" इति बृहदारण्यकोपनिषदि उच्यते। आसाम् उत्क्रान्तिगत्यागतीनां श्रवणात् परिच्छिन्नः तावत् जीवः इति प्राप्नोति, नहि विभोः चलनम् अवकल्पते इति। सति हि परिच्छेदे शरीरपरिमाणत्वं मध्यमपरिमाणत्वं आर्हतपरीक्षायां जैनमतानुयायिनां परीक्षायां निरस्तम् अतः अणुः आत्मा इति गम्यते। एवं सति पूर्वपक्षिणाम् आक्षेपे तत्पक्षं व्यावर्तयति। न एतत् अस्ति अणुः आत्मा इति। परम् एव ब्रह्म जीवः, परस्य एव ब्रह्मणः प्रवेशश्रवणात् तादात्म्योपदेशात् च। परम् एव चेत् ब्रह्म जीवः, तस्मात् यावत् परं ब्रह्म तावान् एव जीवः भवितुम् अर्हति। परं ब्रह्म विभु इति आम्नातम्, तस्मात् विभुः जीवः। तथा च "स वै एषः महान् अज आत्मा यः अयं विज्ञानमयः प्राणेषु" इति एवंजातीयकाः जीवविषयाः विभुत्ववादाः श्रौताः स्मार्ताः च समर्थिताः भवन्ति। न च अणोः जीवस्य सकलशरीरगता वेदना उपपद्यते। त्वक्सम्बन्धात् स्यात् इति चेत् न कण्टकतोदने अपि सकलशरीरगता एव वेदना प्रसज्येत। त्वक्कण्टकयोः हि संयोगः कृत्स्नायां त्वचि वर्तते, त्वक् च कृत्स्नशरीरव्यापिनी इति। पादतले एव तु कण्टकतुन्नः वेदनां प्रतिलभते। न च अणोः गुणव्याप्तिः उपपद्यते, गुणस्य गुणिदेशे वर्तमानात्। गुणस्य गुणत्वम् एव हि गुणिनम् अनाश्रित्य हीयेत। यदि च चैतन्यं जीवस्य समस्तं शरीरं व्याप्नुयात् न अणु जीवः स्यात्। चैतन्यम् एव हि अस्य स्वरूपम् अग्नेः इव औष्ण्यप्रकाशौ। न अत्र गुणगुणिविभागः विद्यते इति। अतः जीवःविभुः। तर्हि अणुत्वादिव्यपदेशः कथम् इति? अतः आह- सूत्रम् "तद्गुणसारत्वात् तु तद्व्यपदेशः"इति। तस्याः बुद्धेः गुणाः तद्गुणाः, इच्छा द्वेषः सुखं दुःखम् इति एवमादयः, तद्गुणाः सारःप्रधानं यस्य आत्मनः संसारित्वे सम्भवति सः तद्गुणसारः, तस्य भावः तद्गुणसारत्वम्। न हि बुद्धेः गुणैः विना केवलस्य आत्मनः संसारित्वम् अस्ति। बुद्धिम् उपाधिरूपेण निमित्तीकृत्य हि कर्तृत्वभोक्तृत्वादिलक्षणं संसारित्वम् अकर्तुः अभोक्तुः च असंसारिणः नित्यमुक्तस्य सतःआत्मनः। तस्मात् यतो हि तद्गुणसारः अतः बुद्धिपरिमाणेन अस्य परिमाणव्यपदेशः। बुद्ध्युत्क्रान्त्यादिभिः च अस्य उत्क्रान्त्यादिव्यपदेशः, न स्वतः। "तथाच बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते॥" इति श्वेताश्वेतरोपनिषदि जीवस्य अणुत्वम् उक्त्वा तस्य एव पुनः आनन्यम् आह। तच्च एवम् एव समञ्जसं

स्यात् यदि औपचारिकम् अणुत्वं जीवस्य भवेत्, पारमार्थिकं च आनन्त्यम्। न हि उभयं मुख्यम् अवकल्पेत। न च आनन्त्यम् औपचारिकम् इति शक्यं विज्ञातुम्, सर्वोपनिषत्सु ब्रह्मात्मभावःप्रतिपाद्यते।

उपरि उक्तस्य बुद्धरूपस्य उपाधेः संयोगः न शाम्यति वा इति प्रश्ने उत्तरं - यावत् अयं संसारी भवति यावत् अस्य सम्यग् अदर्शनेन संसारित्वं न निवर्तते तावत् अस्य बुद्ध्या संयोगः न शाम्यति। यावदेव च अयं बुद्धिरूपः उपाधिसम्बन्धः तावत् जीवः संसारी जीवस्य जीवत्वं च।

बुद्धिः कर्ता वा जीवः कर्ता इति एकः ज्ञातव्यः अंशः- तद्गुणसारवचनेन ब्रह्मसूत्रे तद्गुणसारत्वाधिकरणे एव अपरः अपि जीवधर्मः प्रपञ्च्यते। कर्ता च अयं जीवः स्यात्। कस्मात्? शास्त्रार्थवचनस्य संगतेः। एवं च "यजेत " “जुहूयात्” "दद्यात्” इति एवंविधं विधिशास्त्रम् अर्थवत् भवति। अन्यथा तत् अनर्थकं स्यात्। तत् हि कर्तुः सतः कर्तव्यविशेषम् उपदिशति। कर्तुः अभावे न तदुपपद्यते। तथा च जीवस्य अयं कर्तृभावः उपाधिनिमित्तः। कर्तृरूपः धर्मः जीवे आरोप्यते, स यथार्थः न यतो हि असङ्गः आत्मा । यथा तक्षा लोके वास्यादिं हस्ते स्वीकृत्य कर्ता दुःखी भवति, एव स्वगृहं प्राप्तः विमुक्तः वास्यादिकरणः स्वस्थः निर्वृत्तः निर्व्यापारः सुखी भवति। एवम् अविद्यया प्रत्युपस्थापितेन द्वैतप्रपञ्चेन सम्पृक्तः आत्मा स्वप्नजागरितावस्थयोः कर्ता दुःखी भवति। अतः जीवस्य कर्तृत्वम् अविद्यारूपोपाधिनिमित्तम्। जीवस्य कर्तृत्वम् इदम् ईश्वराधीनम्। जीवः ईश्वरेण चालितः सन् शुभाशुभं कर्म परिपालयति। एवं जीवस्य अणुत्वविभुत्वकर्तृत्वादिकं संक्षेपेन प्रतिपादितम्।

## २१.७ जीवस्य एकत्वनानात्वविचारः-

### २१.७.१ एकजीववादः-

जीवस्य नानात्वम् एकत्वं च पक्षद्वयम्। अयमेव एकजीववादः अनेकजीववादः च उच्यते। यथा- तेषाम् अयम् आशयःजीवपरमेश्वरसाधारणं चैतन्यमात्रं बिम्बम्। तस्य एव बिम्बस्य अविद्यात्मिकायां मायायां प्रतिबिम्बम् ईश्वरचैतन्यम्। अन्तःकरणेषु प्रतिबिम्बं जीवचैतन्यम्। कार्योपाधिरयं जीवः कारणोपाधिरीश्वरः इति श्रुतेः। केचित् वदन्ति न अवच्छदपक्षः न प्रतिबिम्बपक्षः युक्तः। अखण्डस्य एकस्य नित्यस्य जीवस्य अवच्छेदःअसम्भवात् अरूपस्य च प्रतिबिम्बासम्भवात्। ब्रह्म एव स्वस्य अविद्यया संसरति मुच्यते च स्वनिद्यया। एवञ्च ब्रह्म एकम् एव अद्वितीयम्। उपहितः अनादिः अनिर्वाच्यः एक एव जीवः। ततश्च एकम् एव शरीरं सजीवम् अन्यानि सर्वाणि स्वप्नदृष्टशरीरवत् निर्जीवानि। जीवस्य उपाधिना अज्ञानेन कल्पितं सर्वं जगत्। स्वप्नद्रष्टा एव एक जीवः स्वप्नवद् सर्वं जगत् पश्यति। जीवः सुखं दुःखं च अनुभवति यावत् पर्यन्तम् अविद्या तिष्ठति। अविद्यायाः अपगमे सति सुखदुःखादिव्यवहारः न भवति। जीव तदा मुक्तः भवति। यतो हि जीवः एकः अतःबद्धमुक्तव्यवस्था अपि नास्ति। शुकादयः महर्षयः मुक्ताः इति व्यवहारः अपि कल्पितः एव स्वप्नपुरुषमुक्त्यादिवत्। वस्तुतः यस्मात् जीवः एकः अतः अद्यावधि न कोऽपि मुक्तः। तस्मिन् एकस्मिन् आत्मनि मुक्ते सति संसारस्य उपरमप्रसङ्गः भवति। शुकव्यासादिमुक्तिः तु अर्थवादरूपा प्रशंसापरा मोक्षशास्त्रे प्रवृत्यर्थम् इति आहुः। अस्मिन् पक्षे जीवेश्वरयोः विभागः बद्धमुक्ताव्यवस्था इत्यादिसकलशङ्कासमाधानं स्वप्नदृष्टानेन समाधेयम्। यथा जीवः

एकः चेत् ब्रह्मविद्यायाः उपदेष्टा अपरः कश्चित् न तिष्ठेत् इति अतः ब्रह्मविद्योदयः अपि न स्यात् तदा। एवञ्च जीवेश्वरविभागः यदि न स्यात् तर्हि जीवेन ईश्वरस्य उपासनादिकं कर्तुं न शक्यम्। एवंविधेषु संशयेषु सति स्वप्ने यथा स्वप्नद्रष्टा कश्चित् गुरुम् ईश्वरं वा कल्पयित्वा उपासते अत्रापि तथैव समाधानं चिन्तनीयम्।

अन्ये तु अस्मिन् पक्षे बद्धमुक्तव्यवस्था जीवेश्वरयोः विभागादिव्यवस्था च न सिद्ध्यति। स्वप्नदृष्टान्तः अपि न सङ्गतः। तेषां मतेन जगतः स्वतुल्यताकल्पने अकस्मादेव स्वप्नवदवलुप्येत जगत्। विद्योपदेशः च अनर्थकः स्यात्।

**अधिकं तु भेदनिर्देशात् (ब्रह्मसूत्रम् २-१-२२)** इति सूत्रे जीवब्रह्मणोः भेदप्रतिपादनं व्यर्थं स्यात् एवं कल्पने। जीवब्रह्मणोः भेदप्रतिपादकश्रुतिविरोधः च स्यात्। **लोकवत्तु लीलाकैवल्यम् (ब्रह्मसूत्रम् २-१-३३)** इति सूत्रे जगतः ईश्वरकृता लीला इति प्रतिपादनं व्यर्थं स्यात्। **अनुपपत्तेस्तु न शारीरः(ब्रह्मसूत्रम् १-२-३)** सूत्रे सर्वकर्मत्वसर्वरसत्वादीनाम् अनुपपत्तेः न शारीरः भवितुम् अर्हति सर्वाधिपतिः इति प्रतिपादनविरोधः स्यात्।

तस्मात् एव जीवः हिरण्यगर्भः ब्रह्मणः प्रतिबिम्बः मुख्यः। अन्ये जीवाः तु हि तस्य मुख्यजीवस्य कारणोपाधिकस्य प्रतिबिम्बभूताः। अस्मिन् मते तु बिम्बभूतं चैतन्यम् ईश्वरः तस्य प्रतिबिम्बभूतः हिरण्यगर्भः एकः जीवः। पूर्वमते च एकः जीवः कस्मिन् शरीरे वर्तते इति विनिगमनाविरहात् विनिगमना वै एकतरपक्षपातिनी युक्तिः तस्याः अभावात् इत्यर्थः। हिरण्यगर्भरूपात् जीवात् भिन्नम् अधिकम् ईश्वररूपं ब्रह्म अस्ति इति न सूत्रविरोधः। हिरण्यगर्भस्य प्रतिबिम्बभूताः अन्ये जीवाः सृष्ट्यादिकं कर्तुम् असमर्थाः । ते जीवाः संसारभाजः। एवञ्च अस्मिन् मते हिरण्यगर्भः सजीवः तत्प्रतिबिम्बभूताः जीवाभासाः। तेन च सजीवाः ते इति विशेषः ज्ञेयः।

अपरे पुनः हिरण्यगर्भस्य प्रतिकल्पं भेदात् कस्य हिरण्यगर्भः मुख्यः जीवः इति विनिगमनाविरहात्। सूत्रादिना विरोधः अन्यथा अपि परिहर्तुं शक्यते। अतः एकः एव जीवः अविशेषेण सर्वं शरीरम् अधिष्ठाय वर्तते। अज्ञानम् एकम् अतः तस्मिन् ब्रह्मप्रतिबिम्बरूपः जीवः एकः। तस्मात् जीवानां मुख्यम् अमुख्यम् इति विभागः नास्ति। ननु अस्मिन् पक्षे एकस्य एव जीवस्य सर्वशरीरे अधिष्ठाने शरीरावयवभेदः इव शरीरभेदे अपि परस्परं सुखदुःखादीनाम् अनुभवः स्यात् इति संशयः। किन्तु तत् परस्परसुखदःखादिस्मरणं तु न भवति। जन्मान्तरे अनुभूतानां सुखादीनां स्मरणं यथा न भवति तथैव अत्रापि शरीरभेदात् एव स्मृतिः न भवति। शरीरभेदः एव अत्र प्रतिबन्धकः। अत्र योगिनां कायव्यूहादिना यः सुखाद्यनुभवः कथं स्यात् इति न वाच्यम्। तेषां तदनुसन्धानं योगप्रभावेन सम्भवति। अस्मिन् मते शरीरं भिन्नं भिन्नं जीवः तु एकः एव।

एवम् एकजीववादे त्रीणि मतानि प्रदर्शितानि।

## २१.७.२ अनेकजीववादः-

जीवाः बहवः। एकजीववादपक्षे स्वीकृते दोषः भवति श्रुतिस्मृतिसूत्रैः सह विरोधात्। कारणं हि अनेन बन्धमुक्तावस्थायायम् अव्यवस्था भवति। श्रुतौ सूत्रे अन्यत्र च बन्धमुक्तव्यवस्था स्वीक्रियते । तथा च अत्र श्रुतिः "तद् यो यो देवानां प्रत्यवुध्यत स एव तदभवत्" इति। प्रतिषेधादिति चेन्न शारीरादिति(ब्रह्मसूत्रम् ४-२-१२) अधिकरणे बद्धमुक्तव्यवस्था प्रतिपाद्यते भाष्यकारैः शङ्कराचार्यैः। अतः अन्तःकरणादीनां च जीवस्य उपाधिरूपेण ग्रहणं कृत्वा अनेकजीववादम् आश्रित्य बद्धमुक्तव्यवस्था प्रतिपाद्यते।

जीवो हि चेतनः शरीराध्यक्षः प्राणानां धारयिता तत्प्रसिद्धेर्वचनाच्च इति शङ्करभगवत्पादानां मतं सूत्रभाष्ये(ब्रह्मसूत्रम् १-१-६) । यथा च अविद्याकामकर्मविशिष्टकार्यकरणोपाधिरात्मा संसारी जीव उच्यते(बृहदारण्यकोपनिषदि ३-८-१२ शाङ्करभाष्यम्)। यथा च परमात्मैव चोपाधिकल्पितावच्छेदको जीव इत्याख्ययते(ब्रह्मसूत्रम् ३-१-१ शाङ्करभाष्यम् )।

जीवस्य न च उत्पत्तिः न च विलयः। यथा परस्य ब्रह्मणः कार्यप्रवेशेन जीवभावो विज्ञायते न चोत्पत्तिर्विज्ञायते(ब्रह्मसूत्रम् २-३-१७)। तथा च उच्यते माण्डुक्यकारिकायां

**न निरोधो न चोत्पत्तिर्न बन्धो न च साधकः।**
**न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता॥ इति**

जीवः परमात्मनः अंशः न भवति। पादोऽस्य विश्वाभूतानि इति छान्दोग्योपनिषदि उक्तम्। अंशः पादो भाग इत्यनर्थान्तरम् इति ब्रह्मसूत्रस्य शाङ्करभाष्ये उक्तम्। अनंशत्वमपि हि जीवस्य अभेदवादिन्यः श्रुतयः प्रतिपादयन्ति यथा तत्सृष्ट्वा तदेवानुप्राविशत् इति तैत्तिरीयोपनिषदि उच्यते। यथा च ममैवांशो जीवलोके जीवभूतः सनातनः इति श्रीमद्भगवद्गीतायाम् उच्यते। अत्र कश्चन संशयः यथा ननु जीवस्य ईश्वरांशत्वाभ्युपगमे जीवगतेन संसारदुःखोपभोगेन अंशिनः ईश्वरस्यापि दुःखं स्यात्। अत्र एवं समाधानं यत् सूर्यप्रतिबिम्बे कम्पमाने अपि न तद्वान् सूर्यः कम्पते। तस्मात् नास्ति जीवस्य दुःखेन ईश्वरस्य दुःखत्वप्रसङ्गः। तस्मात् आत्मनः एकरूपतापक्षे सर्वदोषाभावः सिद्धः एव।

जीवः न अणुपरिमाणः नापि मध्यमपरिमाणः किन्तु महापरिमाणः विभुः। यथा किंपरिमाणः जीवः इति चिन्त्यते किम् अणुपरिमाणः उत मध्यमपरिमाणः आहोस्वित् महापरिमाणः इति प्रश्ने सति परमेव हि ब्रह्म जीवः तस्मात् यावत् परं ब्रह्म तावान् एव जीवः भवितुम् अर्हति। परस्य ब्रह्मणो विभुत्वम् आम्नातम्। तस्मात् विभुः जीवः। जीवस्य प्राज्ञत्वं तैजसत्वं हिरण्यगर्भत्वं च। यथा-

**प्राज्ञस्तत्राभिमानेन तैजसत्वं प्रपद्यते।**
**हिरण्यगर्भतामीशस्तयोर्व्यष्टिसमष्टिता॥ इति।**

जीवः स्वयं प्रकाशः। स्वप्नावस्थाम् अधिकृत्य अत्र अयं पुरुषः स्वयं ज्योतिःबृहदारण्यकोपनिषदि उक्तम्(४-३-८)। तथा च जीवः प्रज्ञानघनः अनुभवरूपश्च प्रज्ञानघनः इति श्रुतेः। अनुभवामीति व्यवहारस्तु वृत्तौ प्रतिबिम्बितं चैतन्यम् आदाय उपपद्यते। एकजीववादे अविद्याप्रतिबिम्बः जीवः अनेकजीववादे अन्तःकरणप्रतिबिम्बः जीवः इति। अविद्यायाः आश्रयः कः इति

एकः विचारः। भामतीम् अनुसरन्तः अद्वैतिनः अविद्यायाः आश्रयः जीवः तस्याः अविद्यायाः विषयः ब्रह्म इति। विवरणप्रस्थाने तु मायां तु ब्रह्मणि स्थिता मायायाः विषयः च ब्रह्म एव।

जीवेशयोः कः सम्बन्धः इति एकः विचारः वेदान्ते आलोच्यते। जवेश्वरयोः न तु स्वमिभृत्यवत् सम्बन्धः न वा वह्निस्फुलिङ्गवत् अंशाशिभावः। ईश्वरः निरवयवः तस्मात् जीवः नांशः ईश्वरस्य। तयोः वस्तुतः अभेदसम्बन्धः। उपाधिना तयोः भेदः आपततः परिलक्ष्यते। जीवब्रह्मणोः ऐक्यमेव पारमार्थिकं तत्त्वम्। यथा- पादोऽस्य सर्वा भूतानि त्रिपादस्यामृतं दिवि इति छान्दोग्योपनिशषदि उक्तम्। अत्र भूतपदेन जीवप्रधानानि स्थावराणि जङ्गमानि च निर्दिशति। अंशः पादो भागा इति अर्थान्तरम्। तस्मात् ईश्वरस्य अंशः जीव इत्यत्र संशयः अपगतः। यद्यपि स्वामिभृत्यादिषु एव ईशित्रीशितव्यभावो लोके प्रसिद्धः तथापि शास्त्रात् तु अंशांशित्वम् ईशित्रीशितव्यभावश्च निश्चीयते। निरतिशयोपाधिसम्पन्नः च ईश्वरः निहीनोपाधिसम्पन्नात् जीवान् प्रशास्ति इति न किञ्चित् विप्रतिषिध्यते। अत्र च निरवयवस्य ब्रह्मणः अंशः जीवः न सम्भवति इत्युक्तं बहुधा भाष्ये।

जीवः कर्म कर्तुं स्वतन्त्रः। ईश्वरः च जीवेन कृतं प्रयत्नं धर्माधर्मलक्षणमपेक्ष्य कारयति प्रेरयति। तेन वैषम्यनैर्घण्यादिदोषा ईश्वरे न प्रसरन्ति। यथा यत् अविद्यावस्थायाम् उपाधिनिमित्तं कर्तृत्वम् इदं जीवस्य अभिहितम्।

## पाठगतप्रश्नाः

१. जीवः कः।

२. प्राज्ञः कः।

३. तैजसःकः।

४. जीवः विभुः अणुः वा।

५. जीवः नित्यः अनित्यः वा।

६. जीवब्रह्मणोः ऐक्यं वा अनैक्यम् वा।

७. जीवस्य उपाधिः कः।

८. आभासवादः कस्य।

९. प्रतिबिम्बवादः कस्य ।

१०. अवच्छेदवादः कस्य।

११. जीवस्य कर्तृत्वं स्वतन्त्रं वा।

१२. विश्वः कः।

१३. अविद्यायाः कति शक्तयः काः च ताः।

१४. भामतीमते अविद्यायाः आश्रयः कः।

१५. विवरणते अविद्यायाः आश्रयः कः।

१६. जीवेशयोः कः सम्बन्धः।

१७. जीवः किं परमात्मनः अंशः।

## पाठसारः

अविद्यया संसक्तं अविद्यारूपिणा उपाधिना सहितञ्च ब्रह्मणः विशुद्धं चैतन्यम् एव जीवः इत्युच्यते। प्रतिजीवम् एकम् अन्तःकरणम् उपाधिः भवति। अतश्च जीवः परिच्छिन्न अल्पज्ञः इति व्यवहारः। विवरणे अन्तःकरणे तस्य संस्कारेण अवच्छिन्नाज्ञानप्रतिबिम्बितं चैतन्यं जीवः इति, अन्तःकरणे ब्रह्मप्रतिबिम्बम् एव जीव इति भवति। जीवस्वरूपविषये अवच्छेदादयः त्रयः पक्षाः सन्ति इति उक्तम् -

वाचस्पतेरवच्छिन्न आभासो वार्तिकस्य च।

संक्षेपशारीरककृतः प्रतिबिम्बं तथेष्यते॥इति॥

वार्तिककारः सुरेश्वराचार्यः, संक्षेपशारीरककारः सर्वज्ञात्ममुनिः। तत्र अवच्छेदः वै अन्तःप्रवेशः। तेन युक्तः अवच्छिन्नः। यथा वा जले अन्तःप्रविष्टम् आकाशं जलावच्छिन्नम् इत्युच्यते एवम् अज्ञानाश्रयीभूतं शुद्धचैतन्यं जीवः इत्युच्यते। येषां मते अविद्यया संयुक्तं चैतन्यं जीवः स च अवच्छिन्नः वा उपहितः वा प्रतिबिम्बितः वा तेषां मते जीवस्थायां जीवः एकः। कारणम् अत्र अविद्या एका इति तैः स्वीकारात्। अयम् एव एकजीववादः भामतीकाराणां मते। बहुप्रकारया अविद्यया अविद्याकार्यबुद्ध्या वा संयुक्तं चैतन्यं जीवः स च जीवः अविच्छिन्नः वा उपहितः वा प्रतिबिम्बितः वा भवति इति ये वदन्ति तेषां मते जीवनानात्वम्। वार्तिकारसुरेश्वरः पञ्चपादिकविवरणकारप्रकाशात्मा संक्षेपशारीरककारसर्वज्ञात्मा प्रकटार्थविवरणकारश्च बहुजीववादिनः।

अद्वैतवेदान्तस्य मते जीवः नित्यः नित्यचैतन्यस्वरूपः। स्वरूपतः जीवस्य ब्रह्मत्वे अपि बद्धदशायां अविद्याद्वारा उत्थितस्य अन्तःकरणस्य परिमाणानुगुणेन अणुत्वादिपरिमाणः भवति। कर्ता भोक्ता तेन एव भवति। परमेश्वरस्य कल्पितांशरूपेन यतो हि अङ्गीकृतः जीव अतः जीवस्य कर्तृत्वभोकृत्वं सर्वम् ईश्वराधीनम्। यस्मिन् प्रतिबिम्बितात् ब्रह्मचैतन्यस्य जीवत्वं प्रतिभाति सा अविद्या जीवस्य कारणशरीरम्। पञ्चप्राणकं बुद्धिमनसी कर्मेन्द्रयपञ्चकं चेति मिलित्वा सूक्षशरीराणि सप्तदशावयवानि लिङ्गशरीराणि। तथा च उक्तं पञ्चदश्याम्-

वुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया।

शरीरं सप्तदशभिः सूक्षं तल्लिङ्गमुच्यते॥पञ्चदशी.१.२३॥

लिङ्गशरीरान्तर्गते अन्तःकरणे प्रतिबिम्बितं जीवचैतन्यं प्रमाता इत्युच्यते। प्रमाणसहयोगेन ज्ञानाहरणकारी व्यवहारसम्पादकः अयं जीवः भवति।

## योग्यतावर्धनम्

ज्ञानेन मुक्तः भवति जीवः इति भारतीयदर्शनस्य परमतत्वम्। तत् ज्ञानं च जीवब्रह्मणोः ऐक्यानुभवः। अहम् एव परमब्रह्मस्वरूपः इति जीवस्य यः अनुभवः उपलब्धिः तदेव ज्ञानम् इति अद्वैतवेदान्तस्य चरमराद्धान्तः। अत एव गीतायां गीतं भगवता वासुदेवेन "न हि ज्ञानेन सदृशं पवित्रमिह विद्यते"। एवं जीवस्य स्वरूपज्ञानेन स्वस्मिन् आदरः भूयः वर्धते इत्यत्र नास्ति संशलेशः अपि। कः अहम् इति प्रश्नस्य उत्तरं वेदान्तदर्शने प्रदीयते। अतः सर्वस्मिन् विश्वे वेदान्तस्य विद्यते महान् आदरः। "अहं ब्रह्मास्मि "इति तत्वं प्रतिपाद्यते सर्वविधवेदान्तेषु विशिष्टाद्वैतादिषु। अद्वैतवेदान्तः तेषु वेदान्तेषु मूर्धन्यस्थानीयः।

अध्येता अमुम् पाठं पठित्वा स्वस्य चिन्ताशक्तिं वर्धयितुं दर्शनविचारम् अवगन्तुं स्वस्वरूपः किमिति ज्ञातुं वास्तवजीवने तस्य उपयोगं कर्तुं च विषये अस्मिन् पाटवम् अर्जितुम् अधोल्लिखितान् बिन्दून् अवलोकयेत् -

- वेदान्तस्य प्रयोगक्षेत्रम् अस्ति अस्माकं जीवने। वेदान्तः विमूर्ततत्वं नास्ति। वेदान्तः अस्माकं दैनन्दिनजीवने ओतप्रोतभावेन सम्भिन्नः। अतः अहं जीवः ब्रह्म एव इति सर्वदा विचारः कर्तव्यः। तेन दार्शनिकविचारे पाटवं वर्धते।
- अहं नित्यशुद्धः चेतनः आत्मा ब्रह्म इति ज्ञानेन सर्वविधमानसिकपीडायाः नाशः भवति।
- मम दुःखं सुखम् इत्यादिक्लेशं निवारयेत्। यतो हि नास्ति तादृशं सुखदुःखादिकम्। अतः अहं विशुद्धात्मा इति चिन्तनेन कायिकदुःखानां मानसक्लेशानां निवारणं स्वतः एव भवति। तेन मनुष्यजीवनं आनन्देन प्रपूर्णं भवति। अहं शुद्धः नित्यः इति ज्ञानेन आत्मविश्वासः भूयः वर्धते। अतः छात्रः तादृशेन शुद्धेन विचारेण स्वस्य विचारधारां परिमार्जयेत्।
- अद्वैतवेदान्ते जीवस्वरुपं ज्ञात्वा अपि अन्यत्र दर्शनेषु जीवस्वरूपविचारः कथं विद्यते तत् ज्ञेयम्। ततः सुकरं किमस्ति तत् उपादेयम्।
- प्रारम्भिकस्तरे छात्राणां कृते उपयोगी ग्रन्थः वेदान्तसारः सदानन्दयोगीन्द्रेण कृतः सुस्पष्टः अस्ति। तथा च शंकरभगवत्पादकृतः विवेकचूडामणिः अत्यन्तरमणीयः ग्रन्थः बालानां कृते।
- स्वमातृभायया लिखिताः के ग्रन्थाः सन्ति तान् आदाय यथायथं पठेत्। देशीयभासासु वैदेशिकासु भासासु च वेदान्तस्य बहवः ग्रन्थाः सन्ति। तत्र यः सुलभः अवगन्तुं च सुकरः तत् आदाय ज्ञानं साधयेत्।

## पाठान्तप्रश्नाः

१. जीवस्वरूपं व्याख्यात।

२. अवच्छेदवादं विवृणुत।

३. प्रतिबिम्बवादं विवृणुत।

४. आभासवादः कः।

५. जीवस्य कर्तृत्वभोक्तृत्वं व्याख्यात।

६. जीवस्य जन्ममरणे कीदृशं व्याख्यात।

७. एकजीववादं व्याख्यात।

८. अनेकजीववादं व्याख्यात।

९. जीवस्य अणुत्वविभुत्वादिविचारं विवृणुत।

१०. जीवेशयोः सम्बन्धः कः इति व्याख्यात।

## पाठगतप्रश्नानाम् उत्तराणि-

१. जीवः अन्तःकरणे प्रतिबिम्बितः उपहितः अवच्छिन्नः वा चैतन्यम्।

२. सुषुप्त्यवस्थाभिमानी जीवः प्राज्ञ

३. स्वप्नावस्थाभिमानी जीवः तैजसः।

४. जीवः विभुः।

५. जीवः नित्यः।

६. जीवब्रह्मणोः ऐक्यम् एव अद्वैतवेदान्तस्य सिद्धान्तः।

७. जीवस्य उपाधिः मलिनसत्त्वप्रधानम् अज्ञानम्।

८. वार्तिककारस्य सुरेश्वराचार्यस्य आभासवादः।

९. पञ्चपादिकाविवरणकारस्य प्रकाशात्मयतेः प्रतिबिम्बवादः।

१०. भामतीकारवाचस्पमिश्रस्य अवच्छेदवादः।

११. जीवस्य कर्तृत्वं परतन्त्रम् ईश्वराधीनम्।

१२. जाग्रदवस्थाभिमानी जीवः विश्वः।

१३. अविद्यायाः शक्तिद्वयं, विक्षेपशक्तिः आवरणशक्तिः च।

१४. भामतीमते अविद्यायाः आश्रयः जीवः

१५. विवरणते अविद्यायाः आश्रयः ब्रह्म।

१६. जीवेशयोः अभेदसम्बन्धः अद्वैतवेदान्ते स्वीक्रियते।

१७. न, जीवः परमात्मस्वरूपः एव।

---

॥ इति एकविंशः पाठः ॥

---

# २२

# अध्यारोपापवादौ

## प्रस्तावना

अद्वैतवेदान्ते जीवब्रह्मणोः अभेदः प्रतिपादितः। ब्रह्म नित्य-शुद्ध-बुद्ध-मुक्त-स्वभावम्। जीवो हि ब्रह्म। जीवस्तु स्वस्य नित्यशुद्धस्वरूपम् अजानन् सुखलाभाय बाह्यभोगवस्तूनां ग्रहणरक्षणयोः महत्कष्टम् अनुभवति। यदा जीवः अनुभवेन शास्त्रतः आप्तवाक्यश्रवणेन वा भोग्यवस्तूनाम् अनित्यतां विजानाति, वैराग्यवान् च भवति, तदा स्वस्वरूपज्ञानाय ब्रह्मज्ञस्य गुरोः समीपमायाति। गुरुश्च करुणया तस्मै ब्रह्म उपदिशति। परन्तु यदि गुरुः संसारदुःखोपशमाय समागतं जीवं कथयेद् यद् दृश्यमानं जगदिदं मिथ्या शुक्तिरूप्यम् इव, ब्रह्म निष्कलं निर्विशेषम् अवाङ्मनसगोचरं बोधयितुम् अयोग्यञ्च, तर्हि तत्त्वानि एतानि अनुभवविरुद्धत्वात् शिष्यस्य मनसि नैव प्रतिष्ठां लभेत। अतो यथा कथाच्छलेन बालाय तत्त्वं बोध्यते तथैव सहस्रमातृभ्यः अपि अधिकहितैषिणी श्रुतिः अध्यारोपापवादन्यायेन मुमुक्षवे ब्रह्मतत्त्वम् उपदिशति। जगद्विषये शिष्यस्य वर्तमानं बोधमेव भित्तिरूपेण स्वीकृत्य दृश्यमानस्य जगतः कारणरूपेण ब्रह्म निर्दिशति गुरुः। अतः शिष्यस्य तत्त्वबोधः अनुभवानुसारित्वात् सम्यग् भवति। ततश्च श्रुतस्य ब्रह्मणो मनन-निदिध्यासनरूपा उपाया वर्णिता भवन्ति। उच्यते च –

**अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते।**
**शिष्याणां बोधसिद्ध्यर्थं तत्त्वज्ञैः कल्पितः क्रमः॥ इति।**

शिष्याणां सुखेन तत्त्वबोधार्थम् अयम् उपदेशप्रकारः कल्पितः तत्त्वविद्भिः। अस्मिन् पाठे वयम् उपदेशविधौ अध्यारोपापवादन्यायस्य किं तावद्गुरुत्वं, किं वा अस्य स्वरूपमिति विस्तरेण ज्ञास्यामः।

## उद्देश्यानि

पाठमेतं पठित्वा छात्रा अधोलिखितान् विषयान् ज्ञास्यन्ति।

- अध्यारोपापवादन्यायस्य आवश्यकता
- क अध्यारोपः
- क अपवादः
- अज्ञानलक्षणम्
- कारणशरीरं, सूक्ष्मशरीरं, स्थूलशरीरम् इति शरीरत्रयम्



- पञ्चकोशाः
- पञ्चीकरणम्
- सामान्याध्यारोपः
- विशेषाध्यारोपः
- विशेषाध्यारोपनिरासः
- सामान्याध्यारोपनिरासः
- तत्त्वम्पदार्थशोधनम्

## २२.१ को वै अध्यारोपः

वेदान्तसारग्रन्थे सदानन्दयोगीन्द्रः अध्यारोपलक्षणम् कथयति – "असर्पभूतायां रज्जौ सर्पारोवत् वस्तुनि अवस्त्वारोपः अध्यारोपः" इति। सच्चिदानन्दस्वरूपं ब्रह्म एव वस्तुपदेन कथितम्। अवस्तु च अज्ञानं, ततः समुत्पन्नः सकलः कार्यप्रपञ्चश्च। अतः वस्तुनि ब्रह्मणि अज्ञानस्य तत्कार्याणां वा आरोपः एव अध्यारोपः। अत्र उदाहरणं तावत् असर्पभूतायां रज्जौ सर्पारोप इति। तथाहि अल्पालोके मार्गे पतितायां रज्जौ कश्चित् सर्पं पश्यति, कथयति च "अयं सर्प" इति। रज्जुः सर्पश्च परस्परं भिन्नौ। रज्जौ रज्जुत्वम् अस्ति, सर्पे च सर्पत्वम्। रज्जुः सर्पो न भवति, सर्पश्च रज्जुः न भवति। तथापि अल्पालोके रज्जोः अज्ञानकारणात् पूर्ववर्ति-सर्पसंस्कारोद्बोधाच्च सर्पभिन्नायां रज्जौ अपि सर्पस्य आरोपो भवति, रज्जौ सर्पज्ञानं च सम्भवति। तथैव अज्ञानं तत्कार्याणि च जडानि, ब्रह्म च तद्विपरीतं चेतनम्। ब्रह्मस्वरूपस्य अज्ञानकारणात् चेतने ब्रह्मणि अचेतनानाम् अज्ञान-तत्कार्याणां वा आरोपः भवति। अयमेव अध्यारोप इति कथ्यते।

## २२.२ को वै अपवादः

यत्र आरोपो भवति तद् अधिष्ठानमिति, यस्य च आरोपो भवति तत् आरोप्यम् इति कथ्यते। तथाहि रज्जुः अधिष्ठानम्, आरोप्यो हि सर्पः। अधिष्ठानं विना आरोपो न भवति। ब्रह्मणि प्रपञ्चस्य आरोपस्थले ब्रह्म हि अधिष्ठानम्, प्रपञ्चश्च आरोप्यः। आरोप्यं हि मिथ्या। यत् प्रतीयते, उत्तरज्ञानेन बाध्यते च तत् मिथ्या। रज्जौ सर्पः प्रतीतो भवति, यदा तु ज्ञानं भवति 'इयं रज्जुः' इति, तदा सर्पो निवर्तते, रज्जुमात्रम् अवशिष्यते। रज्जुज्ञाने जाते तत्र पुनः सर्पस्य प्रतीतिः न भवति। अतः रज्वां दृष्टः सर्पः मिथ्या। अधिष्ठानस्य ज्ञानेन हि आरोप्यस्य मिथ्यावस्तुनः निवृत्तिः भवति, अधिष्ठानमात्रम् अवशिष्यते। रज्जौ सर्पस्य आरोपे सति न हि रज्जौ सर्पस्य गुणाः दोषा वा प्रविशन्ति। न हि रज्जौ सर्पस्य आरोपे सति रज्जुः विषयुक्तो भवति, सर्पस्य मिथ्याभूतत्वात्। तथाहि ब्रह्मरूपस्य अधिष्ठानस्य ज्ञानेन आरोपितानाम् अज्ञानस्य तत्कार्याणां च निवृत्तिः भवति। अज्ञानं तत्कार्याणि च मिथ्याभूतानि।

कारणात् कार्यम् उत्पद्यते। कारणं हि कार्यरूपेण प्रकाशितं भवति। कारणस्य कार्यरूपः अन्यथाभावः (अन्यरूपप्राप्तिः) द्विविधः – परिणामः विवर्तश्च। परिणाम एव विकारपदेन कथ्यते।

कारणस्य स्वस्वरूपम् परित्यज्य अन्यरूपप्राप्तिः परिणामः विकारो वा। यथा दुग्धाद् दधि उत्पद्यते। दुग्धं कारणं, दधि च कार्यम्। दुग्धं स्वस्वरूपं परित्यज्य दधिरूपतां प्राप्नोति। अतः दुग्धस्य विकारः परिणामो वा दधि। कारणस्य स्वरूपम् अपरित्यज्य एव अन्यरूपप्राप्तिः विवर्तः। यथा रज्जुः स्वस्वरूपम् अपरित्यज्य एव सर्परूपेण प्रतिभासते। अतः सर्पः रज्जोः विवर्तः। विकार-परिणामयोः लक्षणं वेदान्तसारे एवमुदाहृतम् – "सतत्त्वतोऽन्यथाप्रथा विकार इत्युदाहृतः। अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदाहृतः।।" इति च। एवं ब्रह्म स्वस्वरूपम् अपरित्यज्य एव प्रपञ्चरूपेण प्रतिभासते। अतोऽयं परिदृश्यमानः मिथ्याभूतः प्रपञ्चः ब्रह्मणो विवर्तः। विवर्तस्थले मिथ्याभूतस्य पदार्थस्य उत्तरज्ञानेन बाधे सति अधिष्ठानमात्रम् अवशिष्यते।

एवम् अविकृतायां रज्जौ, सर्पाकारेण भासमानस्य रज्जुविवर्तस्य, "इयं रज्जुः" इति अधिष्ठानज्ञाने जाते यथा अधिष्ठानरज्जुरूपेणैव स्थितिः भवति तथा ब्रह्मविवर्तस्य अज्ञानादिप्रपञ्चस्य ब्रह्मरूपाधिष्ठानज्ञाने सति ब्रह्मरूपेणैव स्थितिः एव अपवादः। अतः कार्यस्य कारणमात्रसत्तावशेषणं कारणस्वरूपव्यतिरेकेण कार्यस्य असत्तावधारणं हि अपवादः। उच्यते च सदानन्दयोगीन्द्रेण वेदान्तसारे – "अपवादो नाम रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्तस्य अवस्तुनः अज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम्" इति। अतो यथा रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्वमेव तथैव अवस्तूनाम् ब्रह्मविवर्तभूतानाम् अज्ञान-तत्कार्याणां च ब्रह्मरूपवस्तुमात्रता इति प्रतिपादनमेव अपवादः।

## २२.३ अध्योरोपापवादन्यायस्य प्रयोजनम्

जगतः मिथ्यात्वप्रदर्शनं, जगत्कारणरूपेण सत्यस्य ब्रह्मणः सूचनं च अध्यारोपापवादप्रक्रियाया मुख्यम् उद्देश्यम्। आदौ अखिलं जगत् ब्रह्मणः समुद्भूतम् इति प्रतिपाद्यते। कार्यं च कारणे तिष्ठति। अतः अखिलं जगत् ब्रह्मनिष्ठमिति प्रतिपादितं भवति। ततो ब्रह्मणि श्रुत्या युक्त्या च जगत् निषिध्यते। ब्रह्मणि जगतो निषेधे सति जगतः सत्त्वमेव व्याहतं भवति। यतो हि कारणं ब्रह्म विहाय अन्यत्र जगतः स्थितिः नैव सम्भवति। अतो ब्रह्मणि जगतो निषेधे सति ब्रह्म विहाय अन्यत्र जगतः अभावात् जगतः मिथ्यात्वम् आपतति। अध्यारोपापवादन्यायस्य गौणं फलं तावत् तत्त्वम्पदार्थशोधनम्। विषयः अयम् अग्रे स्फुटो भवति।

### पाठगतप्रश्नाः १

१. अध्यारोपलक्षणं किम्?

२. कः अपवादः?

३. किं तावद् अधिष्ठानम्?

४. मिथ्याभूतस्य आरोप्यस्य निवृत्तिः कथं भवति?

५. कः परिणामः?

६. को विवर्तः ?

७. परिदृश्यमानस्य अस्य प्रपञ्चस्य किमधिष्ठानम्?

८. प्रपञ्चोऽयं ब्रह्मणो विवर्तः परिणामो वा?

९. अध्यारोपापवादन्यायस्य मुख्यं प्रयोजनं किम्?

१०. अध्यारोपापवादन्यायस्य गौणं प्रयोजनं किम्?

## २२.४ सामान्याध्यारोपवर्णनम्

परिदृश्यमानं जगदिदं ब्रह्मणो विवर्तः, अज्ञानस्य च परिणामः। अज्ञानं हि जगतः परिणाम्युपादानम्। ब्रह्म च जगतः विवर्तोपादनम्। अज्ञानं हि जगद्रूपेण परिणमते, यथा दुग्धं दधिरूपेण परिणमते। यथा अल्पान्धकारे रज्जोः अज्ञानं सर्पोत्पत्तौ कारणं, तथैव ब्रह्मस्वरूपस्य अज्ञानं हि जगदुत्पत्तौ कारणम्। इदं जगत् जडं, सुखदुःखमोहान्वितञ्च। तस्माद् अस्य जगतः परिणाम्युपादानकारणमपि कार्यसदृशमेव जडं सुखदुःखमोहान्वितञ्च भवेत्। अतो जगतः परिणाम्युपादानकारणरूपेण जडस्य सुखदुःखमोहात्मकस्य सत्त्वरजस्तमोरूपगुणत्रयान्वितस्य अज्ञानस्य ग्रहणं भवति। ब्रह्मविषयकस्य अज्ञानस्य स्वरूपं ततः जगदुत्पत्तिप्रक्रिया च अधो निर्दिश्यते।

### २२.४.१ अज्ञानलक्षणविचारः

सदानन्दयोगीन्द्रेण अज्ञानलक्षणविषये वेदान्तसारे निगदितं– "अज्ञानं तु सदसद्भ्याम् अनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चित्" इति। सत् वै कालत्रयाबाध्यम्। अतीत-वर्तमान-भविषद्रूपे कालत्रये यत्तिष्ठति, यस्य एतत्कालत्रये नाशो न भवति तत् सत्। अज्ञानं न हि सत्। यथा घटज्ञानात् परं घटविषयकम् अज्ञानं नश्यति तथैव ब्रह्मज्ञानात् परं ब्रह्मविषयकम् अज्ञानं नष्टं भवति। न च अज्ञानम् असत्। असत् वै अलीकम्, शशशृङ्गादि। परन्तु 'अहमज्ञ' इत्यादिषु स्थलेषु अज्ञानस्य प्रत्यक्षानुभवो भवति, अतः अज्ञानं न असत्। अलीकस्य कदापि, कुत्रचिद्वा ज्ञानं न भवति। न हि कश्चित् कुत्रापि शशशृङ्गं साक्षात्करोति। न च अज्ञानं सदसदुभयात्मकम् एकस्मिन्नेव धर्मिणि सत् असत् चेति विरुद्धधर्मद्वयं न तिष्ठति। अतः अज्ञानं न सत्, नापि असत्, न वा सदसदुभयात्मकं, किन्तु सदसदनुभयात्मकम् अनिर्वचनीयम्। उच्यते च अनिर्वचनीयस्य लक्षणम् –

**प्रत्येकं सदसत्त्वाभ्यां विचारपदवीं च यत्।**
**गाहते तदनिर्वाच्यमाहुर्वेदान्तवादिनः।। इति।**

विवेकचूडामणौ भगवच्छङ्कराचार्यैरप्युक्तं –

**सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो।**
**साङ्गाप्यन्यङ्गाप्युभयात्मिका नो महाद्भूतानिर्वचनीयरूपा।। इति।**

अज्ञानं माया अविद्या इति पर्यायवाचिनः। अज्ञानं च त्रिगुणात्मकम्। ते च गुणाः लोहितशुक्लकृष्णाः इति श्रुतिषु प्रतिपादितम्। अज्ञानकार्येषु तेजसि अप्सु पृथिव्यां त्रिवृत्करणेन

समुत्पन्नेषु स्थूलभूतेषु च एतद्गुणत्रयसत्त्वात् तत्कारणभूता माया अपि त्रिगुणात्मिका इति सिध्यति। आम्नातं च – "यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य" इति।

यद्वा गुणत्रयं हि सत्त्वं रजः तमश्चेति। मायायाः त्रिगुणात्मकत्वं श्रुतौ भगवद्गीतासु च प्रतिपादितम्। तथाहि अजामेकां लोहितशुक्लकृष्णाम् इति श्रुतौ लोहितशुक्लकृष्णपदैः रजस्सत्त्वतमसां निर्देशो विहितः। भगवद्गीतासु च – सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः, दैवी ह्येषा गुणमयी मम माया दुरत्यया इत्यादिवचोभिः माया निर्दिष्टा। त्रिगुणात्मकाद् अज्ञानात् समुत्पन्नोऽयं प्रपञ्चोऽपि त्रिगुणो भवति।

गुणत्रयविशिष्टत्वात् न हि अज्ञानं सत्यमिति वाच्यं, यतो हि अज्ञानं ज्ञानेन बाधितं भवति। ब्रह्मज्ञानेन हि अज्ञानं नश्यति। अतोऽज्ञानं ज्ञानविरोधि। न च ज्ञानाभाव एव अज्ञानमिति चिन्तनीयम्, यतो हि अज्ञानं न अभावरूपम्। अज्ञानम् अभावरूपं चेत् अज्ञानात् भावरूपस्य जगतः उत्पत्तिः न सम्भवति। न हि अभावाद् भावपदार्थस्य उत्पत्तिः भवति। अहम् अज्ञः इत्यादौ अनुभवे अज्ञानं प्रत्यक्षप्रमाणेन ज्ञातं भवति। अज्ञानं यदि अभावरूपं स्यात् तर्हि तस्य अनुपलब्धिप्रमाणेन ज्ञानं स्यात्, न प्रत्यक्षेण। न च अज्ञानं शृङ्गग्राहिकन्यायेन इदमित्थमिति पिण्डीकृत्य प्रदर्शयितु शक्यते। अतो यत्किञ्चिदिति अज्ञानस्य विशेषणं प्रदत्तम्।

## २२.४.२ कारणशरीरम्

अज्ञानं हि समष्ट्यभिप्रायेण एकं, व्यष्ट्यभिप्रायेण च अनेकम् इति कथ्यते। वृक्षाणां समष्टिः वनं भवति, जलबिन्दूनां च समष्टिः जलाशयः। यदा वक्ता समष्टिं वक्तुम् इच्छति तदा वनम् इति जलाशय इति च कथयति; यदा च व्यष्टिं वक्तुं वाञ्छति तदा वृक्षा इति जलानि इति च कथयति। जीवा हि बहवः, अतो जीवगतानि अज्ञानानि अपि बहवः। तेषाम् अज्ञानानां समष्ट्यभिप्रायेण समष्ट्यज्ञानम् इति व्यवहारः। अस्मिन् समष्ट्यज्ञाने सत्त्वगुणस्य बहु आधिक्यं दृश्यते, अत्र सत्त्वगुणश्च रजस्तमोभ्याम् अभिभूतो न भवति। अतः अज्ञानस्य समष्टिः विशुद्धसत्त्वप्रधाना। सत्त्वगुणस्य आधिक्यात् समष्ट्यज्ञानम् उत्कृष्टोपाधिरिति कथ्यते। अज्ञानानां व्यष्ट्यभिप्रायेण व्यष्ट्यज्ञानम् इति व्यवहारः। व्यष्ट्यज्ञाने सत्त्वगुणस्य प्राधान्यमस्ति, परन्तु न तथा यथा समष्ट्यज्ञाने। रजस्तमोभ्याम् अभिभूतं भवति सत्त्वं व्यष्ट्यज्ञाने। अतो व्यष्ट्यज्ञानं मलिनसत्त्वप्रधानं निकृष्टोपाधिश्च। समष्ट्यज्ञानोपहितं चैतन्यं हि ईश्वरः। ईश्वरो हि सर्वज्ञः, सर्वेश्वरः, सर्वनियन्ता, अव्यक्तः, अन्तर्यामी, जगत्कारणञ्च। ईश्वरो हि सर्वेषाम् अज्ञानानाम् अवभासकः। व्यष्ट्यज्ञानोपहितं चैतन्यं हि प्राज्ञ इत्युच्यते। प्राज्ञश्च एकस्य अज्ञानस्य अवभासको भवति। मलिनसत्त्वप्राधान्यात् च व्यष्ट्यज्ञानम् अस्पष्टोपाधिः, तस्माच्च अनतिप्रकाशकं भवति। ईश्वरस्य उपाधिरूपं समष्ट्यज्ञानं, प्राज्ञस्य उपाधिरूपं व्यष्ट्यज्ञानं च कारणशरीरम् आनन्दमयकोशः सुषुप्तिः इति च कथ्यते। समष्ट्यज्ञानं सकलजगत्कारणं, ब्रह्मज्ञानेन शीर्यमाणत्वात् च शरीरम्, अत इदं कारणशरीरम् इति कथ्यते। व्यष्ट्यज्ञानम् च अहङ्कारादीनां कारणं, ब्रह्मज्ञानेन शीर्यमाणत्वात् च शरीरम्, अतो व्यष्ट्यज्ञानमपि कारणशरीरम् इत्युच्यते। एतस्माद् कारणशरीरात् अज्ञानादेव स्थूलसूक्ष्मप्रपञ्च उत्पद्यते। कारणात् कार्यमुत्पद्यते, विनाशादनन्तरं च कार्यं कारणे लीयते इति

नियमः। अतः स्थूलसूक्ष्मप्रपञ्चोऽपि कारणशरीरे अज्ञाने एव लीयते। अतः कारणशरीरस्य सुषुप्तिः इति नाम, तत्रैव समस्तप्रपञ्चस्य लयदर्शनात्। कारणत्वावस्थायां सुषुप्तौ प्रलयकाले वा स्थूल-सूक्ष्मप्रपञ्चयोः अभावात् जीवः आनन्दबाहुल्यम् अनुभवति, इदमज्ञानं कोशवत् ब्रह्म आच्छादयति च । अतः कारणशरीरम् आनन्दमयकोश इत्युच्यते।

वनवृक्षयोः अभेदः भवति, न हि वृक्षो वनाद् भिन्नः। एवं वनाकाशस्य वृक्षाकाशस्य च अभेदः वर्तते, वृक्षे विद्यमानः आकाशः वने विद्यमानात् आकाशात् न भिन्नः, वनवृक्षयोः अभेदात्। एवं समष्टिव्यष्ट्यज्ञानयोः वनवृक्षयोः अभेदवत्, ईश्वरप्राज्ञयोः चैतन्यस्वरूपत्वात् वनवृक्षावच्छिन्नाकाशयोः अभेदवत् अभेदो बोध्यः। अज्ञानेन अनुपहितं यत् चैतन्यं तत् तुरीयचैतन्यम् इति उच्यते। यथा वनाकाशस्य वृक्षाकाशस्य आधारभूतः एको महाकाशो वर्तते, एवमेव समष्ट्यज्ञानेन उपहितस्य चैतन्यस्य व्यष्ट्यज्ञानेन उपहितस्य चैतन्यस्य च आधारभूतम् एकं चैतन्यं वर्तते, यत् केनापि उपाधिना संस्पृष्टं न तिष्ठति। तदेव आधारभूतं चैतन्यं तुरीयचैतन्यम् इत्युच्यते।

अस्य च अज्ञानस्य शक्तिद्वयं वर्तते – आवरणशक्तिः विक्षेपशक्तिश्चेति। यथा अल्पः मेघः अनेकयोजनविस्तृतं सूर्यम् आवृणोति द्रष्टुः नयनपथपिधानेन, तथैव अज्ञानम् आवरणशक्त्या अपरिच्छिन्नम् अपि आत्मानं जीवस्य बुद्धिम् आवृत्य आच्छादयति इव। यथा रज्जुविषयकम् अज्ञानम् आवृतायां रज्जौ स्वशक्त्या सर्पादिकम् उद्भावयति एवम् अज्ञानमपि आवरणशक्त्या आवृते आत्मनि विक्षेपशक्त्या आकाशादिप्रपञ्चम् उद्भावयति।

आवरणविक्षेपशक्तिद्वयविशिष्टेन अज्ञानेन उपहितं चैतन्यम् (ईश्वरः) जगतः निमित्तम् उपादानं च भवति। ईश्वरो हि चैतन्यप्रधानतया जगतो निमित्तं भवति, जडोपाधिप्रधानतया उपादानं च भवति। यथा लूताकीटः स्वचैतन्यदृष्ट्या तन्तूनां निमित्तं भवति, स्वशरीरप्रधानतया तन्तूनाम् उपादानञ्च भवति। अतः ईश्वर एव जगतः अभिन्ननिमित्तोपादानकारणम्। आम्नातं च मुण्डकोपनिषदि –

**यथोर्णनाभिः सृजते गृह्णते च यथा पृथिव्यामोषधयः सम्भवन्ति।**
**यथा सतः पुरुषात् केशलोमानि तथाक्षरात् सम्भवतीह नित्यम्।। इति।**

## पाठगतप्रश्नाः २

११. जगतः परिणाम्युपादानकारणं किम्?

१२. जगतो विवर्तोपादानकारणं किम्?

१३. अज्ञानस्य लक्षणं किम्?

१४. त्रिगुणात्मकस्य अज्ञानस्य गुणत्रयं किम्?

१५. अज्ञानं केन प्रमाणेन गृहीतं भवति?

१६. किं तावत् कारणशरीरम्?

१७. क ईश्वरः?

१८. कः प्राज्ञः ?

१९. किमर्थं कारणशरीरम् आनन्दमयकोश इत्युच्यते?

२०. किं तावत् तुरीयं चैतन्यम्?

२१. अज्ञानस्य शक्तिद्वयं किम्?

२२. कथमीश्वरः जगतः निमित्तकारणम् उपादानकारणञ्च भवति?

## २२.४.३ सूक्ष्मशरीरम्

तमःप्रधानेन विक्षेपशक्तिविशिष्टेन अज्ञानेन उपहितात् चैतन्यात् आकाशः, आकाशाद् वायुः, वायोः अग्निः, अग्नेः आपः, अद्भ्यः पृथिवी च उत्पद्यते। एतेषु भूतेषु च जाड्याधिक्यदर्शनात् जाड्यहेतुभूतस्य तमसः प्राधान्यं कारणे अङ्गीक्रियते। आम्नातं च तैत्तिरीयोपनिषदि – "तस्माद्वा एतस्मादात्मन आकाशः सम्भूतः, आकाशाद् वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी" इति। गुणत्रयविशिष्टाद् अज्ञानाद् उत्पन्नेषु एतेषु भूतेषु अपि गुणत्रयं वर्तते । एतानि हि सूक्ष्मभूतानि तन्मात्राणि इत्युच्यन्ते। एतैः सूक्ष्मैः भूतैः जीवस्य व्यवहारो न सम्भवति। एतेभ्यः सूक्ष्मभूतेभ्यः सूक्ष्मभूतानि स्थूलभूतानि च उत्पद्यन्ते।

आकाशादीनां पञ्चानां सूक्ष्मभूतानां सात्त्विकांशेभ्यः व्यस्तेभ्यः पृथक् पृथक् श्रोत्र-त्वग्-अक्षि-रसन-घ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि क्रमेण उत्पद्यन्ते। एतेभ्यः पञ्चसूक्ष्मभूतानां सूक्ष्मांशेभ्यः मिलितेभ्यः अन्तःकरणम् उत्पद्यते। निश्चयात्मिका अन्तःकरणवृत्तिर्हि बुद्धिः इत्युच्यते, सङ्कल्पविकल्पात्मिका अन्तःकरणवृत्तिश्च मनः इत्युच्यते। अन्तःकरणवृत्तिभेदयोः चित्ताहङ्कारयोः एतयोः बुद्धिमनसोरेव अन्तर्भावः। चित्तं वै स्मरणात्मिका अन्तःकरणवृत्तिः। अहङ्कारश्च अभिमानात्मिका अन्तःकरणवृत्तिः। चित्तस्य बुद्धौ अन्तर्भावो भवति, अहङ्कारस्य च मनसि। आकाशादीनां पञ्चानां भूतानां रजोंऽशेभ्यः व्यस्तेभ्यः क्रमेण वाक्-पाणि-पाद-पायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि उत्पद्यन्ते। आकाशादिपञ्चसूक्ष्मभूतानां रजोंऽशेभ्यो मिलितेभ्यः पञ्च प्राणा उत्पद्यन्ते। पञ्च प्राणाश्च – प्राणः अपानः व्यान उदानः समानश्चेति। नागः कूर्मः कृकरः देवदत्तः धनञ्जयश्चेति पञ्च प्राणा इत्यपि केचिद् वदन्ति। ऊर्ध्वगमनशीलः नासाग्रवर्ती वायुः प्राणः, अधोगमनशीलः पाय्वादिस्थायी वायुः अपानः, सर्वनाडीगमनशीलः अखिलशरीरस्थो वायुः व्यानः, ऊर्ध्वम् उत्क्रमणशीलः कण्ठस्थितो वायुः उदानः, शरीरमध्यगतः अन्नरसादीनां समीकरणकरः वायुश्च समानः। केचित् पुनः अन्यद् वायुपञ्चकम् नाग-कूर्म-कृकर-देवदत्त-धनञ्जयाख्यम् अङ्गीकुर्वन्ति। तत्र नागाख्यो वायुः उद्गिरणकरः, कूर्मः उन्मीलनकरः, कृकरः क्षुधाकरः, देवदत्तः जृम्भणकरः, धनञ्जयः पोषणकरश्च। एतेषां पञ्चवायूनां प्राणादिषु एव अन्तर्भाव इति केचित्।

सूक्ष्मशरीराणि हि सप्तदशावयवविशिष्टानि। सूक्ष्मशरीरं हि लिङ्गशरीरम् इत्यपि कथ्यते। प्रत्यगात्मानम् अनुमापयति इति कारणात् सूक्ष्मशरीरस्य लिङ्गशरीरम् इति नाम। लिङ्गशरीरस्य



सप्तदशावयवा हि – ज्ञानेन्द्रियपञ्चकं बुद्धिः मनः कर्मेन्द्रियपञ्चकं वायुपञ्चकं चेति।

एतेषु पुनः ज्ञानेन्द्रियपञ्चकसहिता बुद्धिः विज्ञानमयकोश इत्युच्यते। अयं विज्ञानमयकोश एव लोकात् लोकान्तरं देहात् देहान्तरं च व्रजति, कर्तृत्व-भोक्तृत्व-सुखित्व-दुःखित्वाद्यभिमानवान् च भवति। विज्ञानमयकोश एव जीवपदवाच्यः। ज्ञानेन्द्रियसहितं मनः मनोमयकोशो भवति। प्राणादिपञ्चकं कर्मेन्द्रियपञ्चकसहितं प्राणमयकोशो भवति। प्राणमयकोशो हि क्रियात्मकः, अतः रजोंऽशेभ्यः समुत्पन्न इति निर्धार्यते। एतेषु त्रिषु कोशेषु विज्ञानमय-मनोमय-प्राणमयेषु विज्ञानमयः ज्ञानशक्तिमान् कर्तृरूपः, मनोमय इच्छाशक्तिमान् करणरूपः, प्राणमयः क्रियाशक्तिमान् कार्यरूपश्च भवन्ति। कार्यभेदात् च एतेषां कोशानां विभागः। एतत्कोशत्रयं मिलित्वा एव सूक्ष्मशरीरं भवति।

सूक्ष्मशरीरस्थलेऽपि समष्टिव्यष्टिबुद्धिः प्रवर्तितो भवति। समष्टिसूक्षशरीरोपहितं चैतन्यं हि सूत्रात्मा, हिरण्यगर्भः, प्राणो वेत्युच्यते। व्यष्टिसूक्ष्मशरीरोपहितं चैतन्यं तैजसः इत्युच्यते। तेजोमयान्तःकरणस्य उपाधिरूपेण वर्तमानत्वात् एवम् अभिधानं समायातम्। सूक्ष्मशरीरं हि स्थूलप्रपञ्चापेक्षया सूक्ष्मत्वात् सूक्ष्मं, ब्रह्मज्ञानेन शीर्यमाणत्वात् च शरीरम्। जाग्रद्वासनायुक्तत्वात् अयं स्वप्नः, स्थूलप्रपञ्चस्य अत्रैव लयात् इदं स्थूलप्रपञ्चलयस्थानमिति चोच्यते। हिरण्यगर्भतैजसौ स्वप्नकाले मनोवासनानिर्मितान् सूक्ष्मविषयान् अनुभवतः।

## पाठगतप्रश्नाः ३

२३. आकाशादिपञ्चसूक्ष्मभूतानि कस्माद् उत्पद्यन्ते?

२४. आकाशादीनां पञ्च सुक्ष्मभूतानां सात्त्विकांशेभ्यः किमुत्पद्यते?

२५. किं वै मनः?

२६. का वै बुद्धिः?

२७. चित्ताहंकारयोः कुत्र अन्तर्भावः?

२८. कर्मेन्द्रियाणि कुत उत्पद्यन्ते?

२९. पञ्चप्राणाः कुतः समुत्पद्यन्ते?

३०. पञ्चप्राणाः के?

३१. सूक्ष्मशरीरे कति अवयवाः सन्ति, के च ते?

३२. को विज्ञानमयकोशः?

३३. कः प्राणमयकोशः?

३४. कः मनोमयकोशः?


३५. को हिरण्यगर्भः?

३६. कस्तैजसः?


## २२.४.४ स्थूलशरीरम्

आकाशादीनां पञ्चसूक्ष्मभूतानां पञ्चीकरणेन स्थूलभूतानां समुत्पत्तिः भवति। आकाशादिपञ्चसु भूतेषु प्रत्येकं समं द्विधा विभज्य, प्रत्येकभूतस्य आद्यभागान् पुनः चतुर्धा समं विभज्य, तेषां चतुर्णाम् आद्यभागांशानां स्वस्वेतरद्वितीयांशैः सह योजनेन पञ्चीकरणं सम्भवति। तथाहि उच्यते-


**द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः।**
**स्वस्वेतरद्वितीयांशैर्योजनात् पञ्च पञ्च ते।। इति।**





स्थूला पृथ्वी





स्थूलाः आपः




स्थूलः तेजः




स्थूलः वायुः




स्थूलः आकाशः

एवं पञ्चीकरणेन पञ्च स्थूलभूतानि आविर्भवन्ति। ननु पञ्चीकरणादनन्तरं प्रत्येकस्मिन् एव स्थूलभूते पञ्चभूतानाम् विद्यमानत्वात् किं तेषामभिधानं स्यादिति चेदुच्यते यस्मिन् समुदाये यस्य भूतस्य

भागाधिक्यं तस्य तेनैव नाम्ना अभिधानम्। तथाहि यत्र समुदाये पृथिव्या भागः अधिकः तस्य समुदायस्य पृथिवी इति, एवं जलं तेजो वायुः आकाश इति नामानि बोध्यानि। ब्रह्मसूत्रे बादरायणेन अयमर्थः सूचितः – 'वैशेष्यात् तद्वादस्तद्वादः' इति सूत्रेण। न च पञ्चीकरणख्यापकश्रुतेरभावादस्य प्रामाण्यम् नास्ति इति आशङ्कनीयम्, "तासां त्रिवृतं त्रिवृतमेकैकां करवाणि" इत्यादित्रिवृत्करणश्रुत्या पञ्चीकरणस्यापि उपलक्षितत्वात्। आकाशाद् वायुः, वायोरग्निः इत्यादिवाक्येभ्यः श्रुतार्थापत्त्या आकाशवाय्वोरपि पञ्चीकरणं सिद्ध्यति।

स्थूलभूतेषु आकाशे शब्दः अभिव्यक्तो भवति, वायौ शब्दस्पर्शौ, अग्नौ शब्दस्पर्शरूपाणि, जले शब्दस्पर्शरूपरसाः, पृथिव्यां शब्दस्पर्शरूपरसगन्धाश्च। एतैः पञ्चीकृतैः स्थूलभूतैः सप्तोर्ध्वलोकाः सप्त अधोलोकाश्च उत्पद्यन्ते। किञ्च, स्थूलभूतेभ्यः ब्रह्माण्डान्तर्गतानां स्थूलशरीराणां स्थूलशरीरेण भोग्यानाम् अन्नपानादीनां च समुत्पत्तिः भवति। सप्त ऊर्ध्वलोकास्तावत् – भूः भुवः स्वः महः जनः तपः सत्यम् चेति, सप्त अधोलोका हि – अतलः वितलः सुतलः रसातलः तलातलः महातलः पातालश्चेति। चतुर्विधानि स्थूलशरीराणि तावत् – जरायुजम् अण्डजं स्वेदजम् उद्भिज्जं चेति। जरायुजानि शरीराणि जरायुभ्यः जातानि मनुष्यपश्वादिशरीराणि। अण्डजानि शरीराणि अण्डेभ्यो जातानि पक्षिसर्पादिशरीराणि। स्वेदजानि शरीराणि स्वेदेभ्यो जातानि यूकमशकादिशरीराणि। उद्भिज्जानि च भूमिमुद्भिद्य जातानि लतावृक्षादीनि।

प्रतिजीवं शरीराणि भिन्नानि। यदा च एषां स्थूलशरीराणां समष्टिविवक्षा भवति तदा समष्टिस्थूलशरीरम् इति व्यपदेशः, यदा च व्यष्टिविवक्षा भवति तदा व्यष्टिस्थूलशरीरम् इति व्यपदेशः। समष्टिस्थूलशरीरोपहितं चैतन्यं वैश्वानरः विराट् इति वा उच्यते। सकलनराभिमानित्वात् समष्टिस्थूलशरीरोपहितचैतन्यस्य वैश्वानर इति, विविधं राजमानत्वात् च विराट् इति नाम। व्यष्टिस्थूलशरीरोपहितं चैतन्यं विश्वः इति उच्यते। सूक्ष्मशरीराभिमानम् अपरित्यज्य एव स्थूलशरीरे प्रविष्टत्वात् विश्वत्वम्। स्थूलशरीरं च अन्नविकारः, अन्नेन एव स्थूलशरीरस्य वृद्धिः भवति। अतः अस्य अन्नमयकोश इति अभिधानम्। अनेन शरीरेण स्थूलविषयाणाम् एव भोगाः सम्भवन्ति, तस्मादिदं स्थूलशरीरम् इति कथ्यते। स्थूलभोगायतनत्वात् स्थूलशरीरस्य जाग्रत् इति नाम।

जाग्रदवस्थायां विश्ववैश्वानरौ श्रोत्रत्वगक्षिरसनघ्राणैः शब्दस्पर्शरूपरसगन्धान्, वाक्-पाणि-पाद-पायूपस्थैः वचनादानगमनविसर्गानन्दान्, मनो-बुद्ध्यहंकार-चित्तैः सङ्कल्प-निश्चयाहंकार्य-चैत्तान् स्थूलविषयान् अनुभवतः। श्रोत्रादीन्द्रियाणि क्रमेण दिग्-वातार्क-वरुणाश्विभिः नियन्त्रितानि भवन्ति। वागादीनि कर्मेन्द्रियाणि यथाक्रमं अग्नीन्द्रोपेन्द्रयमप्रजापतिभिः नियन्त्रितानि भवन्ति। मनोबुद्ध्यहंकारचित्तानि च चन्द्र-चतुर्मुखब्रह्म-शङ्कराच्युतैः नियन्त्रितानि भवन्ति। पूर्ववत् समष्टिव्यष्टिस्थूलशरीरयोः वनवृक्षाभेदवत्, वैश्वानर-विश्वयोश्च वनाकाश-वृक्षाकाशाभेदवत् अभेदो बोध्यः।

एवमेतेषां स्थूल-सूक्ष्म-कारणप्रपञ्चानां समष्टिः एकः महान् प्रपञ्चः भवति। यथा बहूनि अवान्तरवनानि मिलित्वा एकं महावनं भवति तद्वत्।

## २२.५ विशेषाध्यारोपः

ब्रह्मणि सामान्यतः महाप्रपञ्चाध्यारोपः वर्णितः। इदानीं प्रत्यगात्मनि विशेषाध्यारोपः प्रतिपाद्यते। पुत्रत्वादीनां बाह्यधर्माणाम् आत्मभिन्नानां देहादीनां च आत्मनि अध्यारोपात् अहम् इदं, मम इदम् इत्यादिव्यवहारा भवन्ति। अयमेव विशेषाध्यारोपः। तथाहि आत्मा वै जायते पुत्रः इत्यादिश्रुतिं दृष्ट्वा विप्रतिपन्नाः केचन प्राकृताः चार्वाकाः स्वस्मिन् इव पुत्रेऽपि प्रेमदर्शनात् पुत्रे पुष्टे नष्टे च अहमेव पुष्टो नष्ट इत्याद्यनुभवाच्च पुत्र एव आत्मा इति वदन्ति। केचन चार्वाकाः पुनः 'स वा एष पुरुषोऽन्नरसमय' इत्यादिश्रुतिप्रमाणात् प्रदीप्ताद् गृहात् पुत्रं परित्यज्य अपि जनानां वहिर्गमनं दृष्ट्वा, किञ्च, स्थूलोऽहं कृशोऽहम् इत्यादिव्यवहारान् च वीक्ष्य स्थूलशरीरम् आत्मा इति वदन्ति। अपरे चार्वाकाः 'ते ह प्राणाः प्रजापतिं पितरमेत्योचुः' इत्यादिश्रुतिं वीक्ष्य, इन्द्रियाणाम् अभावे शरीरचलनाभावं दृष्ट्वा, काणोऽहं वधिरोऽहम् इत्याद्यनुभवात् च इन्द्रियाणि एव आत्मा इति वदन्ति। अन्ये केचन चार्वाकाः 'अन्योऽन्तर आत्मा मनोमयः' इत्यादिश्रुतिदर्शनात्, मनसि सुप्ते प्राणादेः अनुभवाभावात्, अहं संकल्पवान् अहं विकल्पवान् इत्याद्यनुभवाच्च मन आत्मा इति वदन्ति। योगाचारा बौद्धास्तु कर्तुः अभावे करणानां प्रवृत्त्यभावात्, अहं कर्ता अहं भोक्ता इत्याद्यनुभवात् च बुद्धिः एव आत्मा इति वदन्ति। 'अन्योऽन्तर आत्मा विज्ञानमय' इति श्रुतिरपि तैः प्रमाणरूपेण प्रदर्श्यते। प्राभाकराः तार्किकाश्च बुद्ध्यादीनाम् अज्ञाने लयदर्शनतात्, अहम् अज्ञ इत्याद्यनुभवाच्च अज्ञानम् आत्मा इति वदन्ति। एतन्मतस्य उपोद्बलकत्वेन 'अन्योऽन्तर आत्मा आनन्दमय' इति श्रुतिं ते उदाहरन्ति। भाट्टमीमांसकास्तु अज्ञानोपहितं चैतन्यम् आत्मा इति वदन्ति। यतो हि सुषुप्तौ ज्ञानम् अज्ञानम् उभयमेव तिष्ठतः, अतो हि भवति अनुभवः 'माम् अहं न जानामि' इति। अत्र उपोद्बलकं श्रुतिवाक्यं तावत् – 'प्रज्ञानघन एवानन्दमय आत्मा' इति। शून्यवादिबौद्धानां मते शून्यम् एव आत्मा, 'अहं सुषुप्तौ न आसम्' इति सुप्तोत्थितस्य अनुभवात्, 'असदेवेदमग्र आसीत्' इत्यादिश्रुतेश्च। एवम् आत्मनि पुत्र-शरीरेन्द्रिय-मनो-बुद्ध्यज्ञान-तदुपहितचैतन्य-शून्यानाम् अनात्मवस्तूनाम् अध्यारोपात् विविधाभिमाना भ्रमभूता जायन्ते।

### २२.५.१ विशेषाध्यारोपनिरासः

पुत्राद् आरभ्य शून्यपर्यन्ता विषया आत्मभिन्ना एव। पुत्रादीनाम् आत्मत्वं प्रतिपादयितुं ये श्रुति-युक्त्यनुभवाः प्रदर्शिताः ते श्रुतियुक्त्यनुभवाभासा एव, न यथार्थाः। पूर्वपूर्वयुक्तीनां च उत्तरोत्तरयुक्तिभिः खण्डनम् अध्यारोपप्रतिपादनकाले एव विहितम्। पुत्रादारभ्य शून्यपर्यन्तानां ज्ञानविषयत्वात् जडत्वाच्च अनात्मत्वं, तस्माच्च मिथ्यात्वं स्फुटम्। 'प्रत्यगस्थूलः अचक्षुः अप्राणः अमनाः अकर्ता चैतन्यं चिन्मात्र सत्' इत्यादिप्रबलश्रुतिविरोधात्, अहं ब्रह्म इति विदुषाम् अनुभवस्य प्रामाण्यात् पूर्वोक्तानां श्रुतियुक्त्यनुभवाभासानां बाधः। प्रत्यगात्मा हि नित्यशुद्धबुद्धमुक्तस्वभावः पूर्वोक्तानां विषयाणां प्रकाशकः।

### २२.५.२ स्थूलसूक्ष्मकारणप्रपञ्चापवादेन कारणभूतब्रह्मनिर्णयः (सामान्याध्यारोपनिरासः)

कार्यं कारणे आश्रितं तिष्ठति इति पूर्वं प्रतिपादितम्। शास्त्रेण अध्यारोपप्रतिपादनस्य मुख्यम् उद्देश्यं तावत् कार्यप्रपञ्चेन कारणभूतस्य ब्रह्मणो निर्देशः। इदानीम् अपवादेन कार्यप्रपञ्चद्वारा कारणभूतं ब्रह्म प्रतिपाद्यते। तथाहि स्थूलभोगायतनं चतुर्विधं स्थूलशरीरं भोग्यरूपाणि अन्नपानादीनि चतुर्दशभुवनानि तदाश्रयं ब्रह्माण्डं च कारणरूपपञ्चीकृतभूतमात्रं भवन्ति। एवं शब्दादिसहितानि पञ्चीकृतभूतानि सूक्ष्मशरीरादुत्पन्नानि ज्ञानकर्मेन्द्रियप्राणान्तःकरणानि च अपञ्चीकृतभूतमात्रं भवन्ति। त्रिगुणात्मकानि अपञ्चीकृतभूतानि च कारणभूतं अज्ञानोपहितचैतन्यमात्रं भवन्ति। कारणशरीरम् अज्ञानम् अज्ञानोपहितं चैतन्यम् ईश्वरादिकं च उपहितचैतन्याधारभूतम् अनुपहितचैतन्यरूपं तुरीयं ब्रह्ममात्रं भवति।

## २२.६ अध्यारोपापवादेन तत्त्वम्पदार्थशोधनम्

'तत्त्वमसि' इति महावाक्येन जीवब्रह्मणोः ऐक्यं प्रतिपादितं भवति। तत्-त्वम्पदे लक्षणया चैतन्यमात्रं बोधयतः। अध्यारोपस्य आलोचनद्वारा तत्त्वम्पदयोः अभिहितार्थस्य लक्ष्यार्थस्य च ज्ञानं सुखेन सम्भवति। यथा वृक्षे जलसेकः क्रियते चेत् तदधःस्थिताः तृणाः अपि सिक्ता भवन्ति, तथा कारणभूतब्रह्मसूचनाय अध्यारोपापवादन्याये प्रयुक्तेऽपि सः तत्-त्वम्पदार्थशोधनमपि विदधाति। अतः तत्-त्वम्पदार्थशोधनं अध्यारोपापवादस्य गौणं प्रयोजनम्। तथाहि, समष्ट्यज्ञानं तदुपहितं चैतन्यम् (ईश्वरः) तदनुपहितं चैतन्यं (तुरीयं) – अभेदेन प्रतीयमानम् एतत् त्रितयं तत्पदस्य वाच्यार्थो भवति। यथा अयसि तप्ते अयसः वह्नेश्च भेदः न ज्ञातुं शक्यते। तदा च भवति व्यवहारः अयो दहतीति। एवमेव समष्ट्यज्ञानम् ईश्वरः तुरीयं चैतन्यं च अभेदेन प्रतिभासमानं तत्पदस्य वाच्यार्थो भवति। तत्पदस्य लक्ष्यार्थः तावत् अज्ञानेन अनुपहितं सकलाधारभूतं तुरीयं चैतन्यम्।

एवमेव व्यष्ट्यज्ञानं तदुपहितं चैतन्यं (प्राज्ञः) तदनुपहितं तुरीयं चैतन्यम् – एतत् त्रितयं तप्तायःपिण्डवद् अभेदेन भासमानं त्वंपदस्य वाच्यार्थो भवति। व्यष्ट्यज्ञानेन अनुपहितं तुरीयं चैतन्यञ्च त्वम्पदस्य लक्ष्यार्थो भवति। एवं तत् पदस्यापि लक्ष्यार्थः तुरीयं चैतन्यं, त्वम्पदस्यापि लक्ष्यार्थो तुरीयं चैतन्यम्। तेन च तत्त्वम्पदयोः तुरीयचैतन्यमात्रबोधकत्वं समायाति। तदेव च तात्पर्यं तत्त्वमसि इति महावाक्यस्य। अतो ब्रह्मजीवयोः तत्त्वम्पदवाच्ययोः नास्ति भेदः इति समापतति।

## पाठगतप्रश्नाः ४

३७. स्थूलभूतानां उत्पत्तिः कुतः कस्माच्च भवति?

३८. किं तावत् पञ्चीकरणम्?

३९. सप्तोर्ध्वलोकाः के?

४०. स्थूलशरीराणि कतिविधानि, कानि च तानि?

४१. सप्ताधोलोका के?

४२. स्वेदजशरीराणि कानि?

४३. को वैश्वानरो विराट् वा?

४४. व्यष्टिस्थूलशरीरोपहितचैतन्यस्य किमभिधानम्?

४५. मनोबुद्ध्यहंकारचित्तानि कैः देवैः नियन्त्रितानि भवन्ति?

४६. शून्यम् एव आत्मा इति केषां मतम्?

४७. भाट्टमीमांसकानां मते क आत्मा?

४८. तत्-पदस्य वाच्यार्थो लक्ष्यार्थश्च कः?

४९. त्वम्पदस्य वाच्यार्थो लक्ष्यार्थश्च कः?

## पाठसारः

अध्यारोपापवादन्यायेन गुरुः शिष्यं ब्रह्मतत्त्वम् उपदिशति। अध्यारोपापवादन्यायस्य मुख्यं प्रयोजनं सकलप्रपञ्चकारणस्य ब्रह्मणः निर्देश एव, गौणं प्रयोजनं तु तत्त्वम्पदार्थशोधनम्। वस्तुनि ब्रह्मणि अवस्तुनः अज्ञान-तत्कार्यप्रपञ्चस्य च आरोपः अध्यारोपः। अपवादस्तु ब्रह्मविवर्तस्य अज्ञान-तत्कार्यप्रपञ्चस्य च ब्रह्ममात्रत्वप्रतिपादनम्। अध्यारोपश्च सामान्याध्यारोपः विशेषाध्यारोपः इति द्विधा प्रदर्शितः। ब्रह्मणि अज्ञानस्य ततः उत्पन्नानां स्थूलसूक्ष्मशरीराणाम् आरोपो हि सामान्याध्यारोपः। विशेषाध्यारोपश्च पुत्रदेहादीनाम् बाह्यधर्माणाम् आत्मनि अध्यारोपः।

सामान्याध्यारोपे तावत् आदौ गुणत्रयात्मकस्य अज्ञानस्य प्रतिजीवं भिन्नस्य समष्टिविवक्षया व्यष्टिविवक्षया च समष्ट्यज्ञानं व्यष्ट्यज्ञानमिति व्यवहारः। समष्ट्यज्ञानोपहितं चैतन्यम् ईश्वर इति कथ्यते, व्यष्ट्यज्ञानोपहितं चैतन्यं च प्राज्ञ इति। इदमज्ञानम् हि कारणशरीरम् आनन्दमयकोशश्चेति व्यपदिश्यते। ईश्वर-प्राज्ञरूपयोः उपहितयोः चैतन्ययोः आधारभूतं यत् अनुपहितं चैतन्यं तत् तुरीयम् इत्युच्यते। अज्ञानस्य च आवरणविक्षेपाख्यं शक्तिद्वयं वर्तते। अज्ञानम् आवरणशक्त्या ब्रह्मस्वरूपम् आवृणोति, विक्षेपशक्त्या च आवृते ब्रह्मणि जगत् सृजति। तथाहि तमःप्रधान-विक्षेपशक्तिविशिष्टात् अज्ञानात् आकाश-वायु-तेजो-जल-पृथिवीरूपाणि पञ्च सूक्ष्मभूतानि समुत्पद्यन्ते। एतानि सूक्ष्मभूतानि अपि गुणत्रयविशिष्टानि। एतेषां भूतानां सात्त्विकांशेभ्यो व्यस्तेभ्यः श्रोत्र-त्वग्-अक्षि-रसन-घ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि उत्पद्यन्ते। सूक्ष्मभूतानां सात्त्विकांशेभ्यो मिलितेभ्यः अन्तःकरणम् उत्पद्यते। संकल्पविकल्पात्मिका अन्तःकरणवृत्तिर्हि मनः, बुद्धिश्च निश्चयात्मिका अन्तःकरणवृत्तिः। चित्ताहंकारयोः अन्तःकरणवृत्तिभेदयोः मनोबुद्ध्योरेव अन्तर्भावः। आकाशादीनां सूक्ष्मभूतानां रजोंऽशेभ्यो व्यस्तेभ्यो वाक्-पाणि-पाद-पायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि, मिलितेभ्यश्च पञ्च प्राणाः समुत्पद्यन्ते। एवं पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च प्राणाः, मनो बुद्धिश्चेति सप्तदशावयवैः सूक्ष्मशरीरम्

उत्पद्यते। प्रतिजीवं सूक्ष्मशरीराणि भिद्यन्ते। तेषां सूक्ष्मशरीराणां समष्टिविवक्षया समष्टिसूक्ष्मशरीरं, व्यष्टिविवक्षया च व्यष्टिसूक्ष्मशरीरम् इति व्यपदेशः। समष्टिसूक्ष्मशरीरोपहितं चैतन्यं हि हिरण्यगर्भः, व्यष्टिसूक्ष्मशरीरोपहितं चैतन्यं हि तैजसः। सूक्ष्मशरीरे एव त्रयः कोशा विज्ञानमय-मनोमय-प्राणमयरूपा अन्तर्भवन्ति। तथाहि बुद्धिः ज्ञानेन्द्रियाणि च मिलित्वा विज्ञानमयकोशः, मनो ज्ञानेन्द्रियाणि च मिलित्वा मनोमयकोशः, पञ्च प्राणाः पञ्च कर्मेन्द्रियसहिताः प्राणमयकोशो भवति।

एतेषाम् आकाशादीनां पञ्च सूक्ष्मभूतानां पञ्चीकरणेन स्थूलभूतानि उत्पद्यन्ते। पञ्चीकरणं च प्रत्येकस्य भूतस्य पञ्चात्मकत्वविधानं, सचित्रम् भूतानाम् अनुपातः मूलपाठे प्रदत्तः। यस्मिन् भूतसमुदाये यस्य भूतस्य आधिक्यं तस्य तदेव अभिधानम्। पञ्चीकरणेन समुत्पन्नेभ्यः स्थूलभूतेभ्यः सप्तोर्ध्वलोकाः सप्ताधोलोकाः, तत्तल्लोकोचितानि चतुर्विधानि शरीराणि, तत्तल्लोकेषु भोग्यानि अन्नपानादीनि च समुत्पद्यन्ते। प्रतिजीवं स्थूलशरीरं भिन्नम्। स्थूलशरीराणां समष्टिविवक्षया समष्टिस्थूलशरीरं, व्यष्टिविवक्षया च व्यष्टिस्थूलशरीरम् इति व्यपदेशः। समष्टिस्थूलशरीरोपहितं चैतन्यं हि विराट् वैश्वानरो वा, व्यष्टिस्थूलशरीरोपहितं चैतन्यं हि विश्व इत्युच्यते। इदं स्थूलशरीरं हि अन्नेन उपचितं भवति, अतः स्थूलशरीरम् अन्नमयकोश इत्युच्यते। ईश्वरप्राज्ञौ सुषुप्तौ आनन्दमनुभवतः, हिरण्यगर्भ-तैजसौ स्वप्ने वासनामयान् सूक्ष्मविषयान् अनुभवतः, वैश्वानर-विश्वौ च जाग्रदवस्थायां बाह्येन्द्रियैः स्थूलान् विषयान् अनुभवतः। समष्टिव्यष्ट्यज्ञानयोः तदुपहितचैतन्ययोश्च वनवृक्षयोः तदवच्छिन्नचैतन्ययोः इव अभेदः।

श्रुतियुक्त्यनुभवाभासम् आश्रित्य चार्वाकादयः दार्शनिकाः पुत्रदेहादीनाम् आत्मनि अध्यासपुरःसरं पुत्रदेहादीनाम् एव आत्मत्वं प्रतिपादयन्ति। पुत्रादारभ्य शून्यपर्यन्तानां सर्वेषामेव विषयाणाम् अनात्मत्वं, श्रुत्या युक्त्या अहं ब्रह्मेत्यादि विद्वदनुभवविरोधात् च।

कार्यं च कारणाव्यतिरिक्तं कारणमात्रमिति प्रतिपाद्यते बुधैः। एवं सर्वाणि स्थूलशरीराणि ब्रह्माण्डं स्थूलभोग्यवस्तूनि च स्थूलभूतपञ्चकमात्रं भवन्ति, स्थूलभूतपञ्चकं पञ्चज्ञानेन्द्रियाणि पञ्चकर्मेन्द्रियाणि पञ्चप्राणाः मनो बुद्धिश्च सूक्ष्मभूतपञ्चकमात्रं भवन्ति, सूक्ष्मभूतपञ्चकं च कारणभूतम् अज्ञानोपहितचैतन्यमात्रं भवति। अज्ञानं तदुपहितं चैतन्यम् ईश्वरादिकं च उपहितचैतन्याधारभूतं तूरीयं ब्रह्ममात्रं भवति। एवमपवादः प्रदर्शितः। सृष्टिप्रक्रियाद्वारा जगतः कारणरूपेण ब्रह्म निर्दिष्टं भवति।

अध्यारोपापवादन्यायेन तत्-त्त्वम्पदयोः वाच्यार्थलक्ष्यार्थप्रदर्शनमपि सुकरं भवति। तथाहि समष्ट्यज्ञानम्, ईश्वरः तुरीयं चैतन्यं च यदा अभेदेन प्रतिभासते तदा सः समुदायः तत्पदस्य वाच्यार्थो भवति, अनुपहितं तुरीयं ब्रह्ममात्रं हि तत्पदस्य लक्ष्यार्थः। एवं व्यष्ट्यज्ञानं, प्राज्ञः तुरीयं चैतन्यं च अभेदेन प्रतिभासमानं त्वंपदस्य वाच्यार्थो भवति, अनुपहितं तुरीयं ब्रह्ममात्रं हि त्वम्पदस्य लक्ष्यार्थः। अतः तत्त्वमसि इति वाक्येन ब्रह्मजीवयोः तत्त्वम्पदवाच्ययोः लक्ष्यार्थं तुरीयं ब्रह्म आदाय ऐक्यं बोध्यते।

## पाठान्तप्रश्नाः

१. बुद्धिः आत्मा इति केषां मतम्?

२. कारणशरीरस्य कथं सुषुप्तिः इति नाम?

३. समष्टिस्थूलशरीरोपहितचैतन्यस्य वैश्वानर इति अभिधानं किमर्थम्?

४. जरायुजानि स्थूलशरीराणि कानि?

५. पञ्चीकरण-त्रिवृत्करणयोः परस्परविरोधित्वं न वा?

६. पृथिव्यां के गुणास्तिष्ठन्ति?

७. तेजसि के गुणा भवन्ति?

८. पञ्चीकरणादनन्तरं सर्वेषामेव भूतानां पञ्चपञ्चात्मकत्वात् कथं तेषामभिधानं स्यात्?

९. कः प्राणः?

१०. को व्यानः?

११. को देवदत्ताख्यः वायुः?

१२. समष्टिकारणशरीरस्य उत्कृष्टोपाधित्वं कुतः?

## पाठगतप्रश्नानामुत्तराणि १

**पाठगतप्रश्नानामुत्तराणि १**

१. असर्पभूतायां रज्जौ सर्पारोपवत् वस्तुनि अवस्त्वारोपः अध्यारोपः।

२. रज्जुविवर्तस्य सर्पस्य रज्जुमात्रत्ववत् वस्तुविवर्तस्य अवस्तुनः अज्ञानादेः प्रपञ्चस्य वस्तुमात्रत्वम् एव अपवादः।

३. यत्र आरोपो भवति तदधिष्ठानम्।

४. अधिष्ठानज्ञानेन हि आरोप्यस्य निवृत्तिः भवति।

५. कारणस्य स्वस्वरूपम् परित्यज्य अन्यरूपप्राप्तिः परिणामः। उच्यते च – 'सतत्त्वतोऽन्यथाप्रथा विकार इत्युदाहृत' इति।

६. स्वस्वरूपम् अपरित्यज्य एव कारणस्य अन्यरूपप्राप्तिः विवर्तः। उच्यते च – 'अतत्त्वतोऽन्यथाप्रथा विवर्त इत्युदाहृत' इति।

७. ब्रह्म एव आरोप्यस्य प्रपञ्चस्य अधिष्ठानम्।

८. प्रपञ्चोऽयं ब्रह्मणो विवर्तः।

९. अध्यारोपापवादन्यायस्य मुख्यं प्रयोजनं तावत् जगतः कारणरूपेण तुरीयस्य ब्रह्ममात्रस्य सूचनम्, जगतो मिथ्यात्वप्रदर्शनं च।

१०. तत्त्वम्पदार्थशोधनमेव अध्यारोपापवादन्यायस्य गौणं प्रयोजनम्।

**पाठगतप्रश्नानामुत्तराणि २**

११. अज्ञानं हि जगतः परिणाम्युपादानम्।

१२. ब्रह्म एव जगतो विवर्तोपादानकारणम्।

१३. अज्ञानं तु सदसद्भ्याम् अनिर्वचनीयं त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चित् इति।

१४. लोहित-शुक्ल-कृष्णाः सत्त्वसजस्तमांसि वा गुणत्रयम्।

१५. अज्ञानम् अनुपलब्धिभिन्नेन प्रत्यक्षादिप्रमाणपञ्चकेन गृहीतं भवति।

१६. अज्ञानम् एव कारणशरीरम् इत्युच्यते, अखिलजगत्कारणत्वात् ब्रह्मज्ञानेन शीर्यमाणत्वाच्च।

१७. समष्टिकारणशरीरोपहितं चैतन्यं हि ईश्वरः।

१८. व्यष्टिकारणशरीरोपहितं चैतन्यं हि प्राज्ञः।

१९. कारणत्वावस्थायां स्थूल-सूक्ष्मप्रपञ्चयोः अभावात् जीवः आनन्दबाहुल्यम् अनुभवति, कारणशरीरम् अज्ञानं च कोशवत् ब्रह्म आच्छादयति। अतः कारणशरीरम् आनन्दमयकोश इत्युच्यते।

२०. ईश्वरप्राज्ञयोः उपहितचैतन्ययोः आधारभूतं यदनुपहितं चैतन्यं तद्धि तुरीयं चैतन्यम् इत्युच्यते।

२१. आवरणशक्तिः विक्षेपशक्तिश्चेति।

२२. ईश्वरः अज्ञानरूपोपाधिप्राधान्येन जगत उपादानं भवति, स्वचैतन्यप्राधान्येन च जगतो निमित्तकारणं भवति।

**पाठगतप्रश्नानामुत्तराणि ३**

२३. तमःप्रधानाद् विक्षेपशक्तिविशिष्टाद् अज्ञानाद् आकाशादिपञ्चसूक्ष्मभूतानि उत्पद्यन्ते।

२४. आकाशादीनां पञ्च सूक्ष्मभूतानां सात्त्विकांशेभ्यः व्यस्तेभ्यः श्रोत्र-त्वग्-अक्षि-रसन-घ्राणाख्यानि पञ्च ज्ञानेन्द्रियाणि उत्पद्यन्ते, मिलितेभ्यश्च अन्तःकरणमुत्पद्यते।

२५. संकल्पविकल्पात्मिका अन्तःकरणवृत्तिरेव मनः।

२६. निश्चयात्मिका अन्तःकरणवृत्तिरेव बुद्धिः।

२७. चित्तस्य बुद्धौ अन्तर्भावो भवति, अहंकारस्य च मनसि।

२८. आकाशादिपञ्चसूक्ष्मभूतानां रजोंऽशेभ्यो व्यस्तेभ्यः वाक्-पाणि-पाद-पायूपस्थाख्यानि पञ्च कर्मेन्द्रियाणि उत्पद्यन्ते।

२९. आकाशादिपञ्चसूक्ष्मभूतानां रजोंऽशेभ्यो मिलितेभ्यः पञ्च प्राणाः समुत्पद्यन्ते।

३०. प्राणापान-व्यानोदानसमानाः पञ्च प्राणाः। केषाञ्चन मते नाग-कूर्म-कृकर-देवदत्त-धनञ्जयाख्याः पञ्च वायवः।

३१. सूक्ष्मशरीरे सप्तदश अवयवाः सन्ति। ते हि - पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, पञ्च प्राणाः, मनो बुद्धिश्चेति।

३२. मनः ज्ञानेन्द्रियैः सहितं विज्ञानमयकोशः भवति।

३३. पञ्च प्राणाः पञ्च कर्मेन्द्रियाणि च मिलित्वा प्राणमयकोशो भवति।

३४. ज्ञानेन्द्रियैः सहितं मन एव मनोमयकोशः।

३५. समष्टिसूक्ष्मशरीरोपहितं चैतन्यं हि हिरण्यगर्भः।

३६. व्यष्टिसूक्ष्मशरीरोपहितं चैतन्यं हि तैजसः।

**पाठगतप्रश्नानामुत्तराणि ४**

३७. आकाशादीनां पञ्च सूक्ष्मभूतानां पञ्चीकरणेन स्थूलभूतानां समुत्पत्तिः भवति।

३८. आकाशादिपञ्चसु भूतेषु प्रत्येकं समं द्विधा विभज्य, प्रत्येकभूतस्य आद्यभागान् पुनः चतुर्धा समं विभज्य, तेषां चतुर्णाम् आद्यभागांशानां स्वस्वेतरद्वितीयांशैः सह योजनेन पञ्चीकरणं भवति।

३९. सप्त ऊर्ध्वलोकास्तावत् भूः भुवः सुवः महः जनः तपः सत्यञ्चेति।

४०. स्थूलशरीराणि चतुर्विधानि जरायुजाण्डजोद्भिज्जस्वेदजभेदेन।

४१. सप्त अधोलोकास्तावत् अतलः, वितलः, सुतलः, तलातलः, महातलः, रसातलः पातालश्चेति।

४२. स्वेदेभ्यः उत्पन्नानि यूकमशकादीनां शरीराणि हि स्वेदजानि.

४३. समष्टिस्थूलशरीरोपहितं चैतन्यं हि वैश्वानरो, विराट् इत्युच्यते।

४४. विश्व इति।

४५. मनोबुद्ध्यहंकारचित्तानि चन्द्र-चतुर्मुख-शङ्कराच्युतैः नियन्त्रितानि भवन्ति।

४६. शून्यवादिनां बौद्धानां मतम्।

४७. अज्ञानोपहितं चैतन्यम् आत्मा।

४८. समष्ट्यज्ञानम् ईश्वरः तुरीयं चैतन्यं च यदा अभेदेन प्रतिभासते तदा सः समुदायः तत्पदस्य वाच्यार्थो भवति, अनुपहितं तुरीयं ब्रह्ममात्रं हि तत्पदस्य लक्ष्यार्थः।

४९. व्यष्ट्यज्ञानं प्राज्ञः तुरीयं चैतन्यं च अभेदेन प्रतिभासमानं त्वंपदस्य वाच्यार्थो भवति, अनुपहितं तुरीयं ब्रह्ममात्रं हि त्वम्पदस्य लक्ष्यार्थः।

॥ इति द्वाविंशः पाठः ॥

# २३

# बहिरङ्गसाधनम्

## प्रस्तावना

परम्परासाधनानि एव शास्त्रेषु क्वचित् बहिरङ्गसाधनानि इत्यपि उच्यन्ते। .अन्तःकरणशुद्धिकारणानि साधनानि सर्वाण्यपि अत्र अन्तर्भवन्ति। कर्मयोगादीनि नानाविधानि साधनानि अन्तःकरणशुद्धिकारणानि शास्त्रेषु उपदिश्यन्ते। प्रसिद्धानाम् परम्परासाधनानाम् अस्मिन् पाठे यथाशास्त्रं विवरणं क्रियते।

## उद्देश्यानि

अमुम् पाठम् पठित्वा भवान् –

- अद्वैतवेदान्तमते मोक्षस्य परम्परासाधनानि कानि इति ज्ञातुं शक्नुयात्।
- कर्मणाम् उपासनानाञ्च मोक्षोपायरूपेण अनुष्ठानं कथं कार्यम् इति ज्ञातुं शक्नुयात्।
- शास्त्रे प्रसिद्धानाम् कर्मयोगादीनाम् परम्परासाधनानां विषये विस्तरेण ज्ञातुम् प्रभवेत्।

## २३.१ मोक्षस्य परम्परासाधनानि

मोक्षस्य परम्परासाधनानि इत्यनेन मोक्षम् प्रति साक्षात्साधनस्य ब्रह्मज्ञानस्य समुत्पत्तौ यानि परम्परासाधनानि भवन्ति तानि एव बोद्धव्यानि।

चित्तशुद्धिकारणानि साधनानि एव परम्परासाधनानि अथवा बहिरङ्गसाधनानि इति प्रसिद्धानि। परम्परासाधनानि नानाविधानि शास्त्रे निर्दिश्यन्ते। आहारशुद्धौ सत्त्वशुद्धिः इति छान्दोग्योपनिषदि (७.२६.२) श्रूयते। अत्र आहारशब्दस्य व्याख्यानं भाष्यकारभगवत्पूज्यपादैः एवं कृतम् – आह्रियत इत्याहारः शब्दादिविषयज्ञानम् इति। इन्द्रियैः पवित्राणां विषयाणां संयमपूर्वकं सेवनेन अन्तःकरणशुद्धिः भवति इति भगवत्पूज्यपादानाम् आशयः। भगवान् श्रीकृष्णः श्रीमद्भगवद्गीतायां यज्ञः, दानं, तपः इत्येतानि निस्सङ्गतया अनुष्ठितानि चित्तशुद्धिकारणानि भवन्ति इति अस्मान् उपदिशति – यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् (श्रीमद्भगवद्गीता १८.५)। मनुमहर्षिः मनुस्मृतौ तपः चित्तशुद्धेः साधनम् भवति इति बोधयति – तपसा कल्पषं हन्ति (मनुस्मृतिः १२.१०४) इति। कर्मयोगेन चित्तशुद्धिः भवति इत्यपि श्रीभगवान् गीताशास्त्रे समुपदिशति – योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वात्मशुद्धये॥ (श्रीमद्भगवद्गीता ५.११) इति। ध्यानेन चित्तं शुद्ध्यति इत्यपि भगवान् गीताशास्त्रे वदति – उपविश्यासने

युञ्ज्याद् योगम् आत्मविशुद्धये (श्रीमद्भगवद्गीता ६.१२) इति। योगदर्शने प्रसिद्धानि यमनियमादीनि साधनानि अपि अन्तःकरणशुद्धिं जनयन्ति इति शङ्करभगवत्पादाः ब्रह्मसूत्रभाष्ये अङ्गीकुर्वन्ति। अन्यानि अपि बहुविधानि साधनानि सत्त्वशुद्धिकारणानि शास्त्रेषु श्रूयन्ते।

अत्र वयं कर्मयोगः, ध्यानयोगः, भक्तियोगः, यमनियमादिकम् इत्येतेषां चतुर्विधानाम् परम्परासाधनानां विषये सङ्क्षेपतः विचारयामः।

## पाठगतप्रश्नाः-१

१. परम्परासाधनानाम् अन्यत् वै किम्।

२. शास्त्रे निर्दिष्टानि नानाविधानि परम्परासाधनानि कानि।

## २३.२ कर्मणाम् उपासनानां च मोक्षोपायतया अनुष्ठानम्

ब्रह्मविद्यया अविद्यामयस्य संसारस्य निवृत्तिः नित्यनिरतिशयानन्दप्राप्तिश्चेति महत् प्रयोजनं सिद्ध्यतीति ज्ञातम्। परन्तु सर्वेषां जीवानां स्वरूपम् ब्रह्मैव इति भूयो भूयः श्रुत्वाऽपि केन हेतुना अस्माकम् अन्तःकरणेषु ब्रह्मविद्या न समुदेति इति भवति शङ्का। तत्र कारणम् अस्माकं अन्तःकरणस्य मालिन्यम्। सत्त्वरजस्तमोगुणमयाद् अज्ञानाद् उत्पन्नं खलु अन्तःकरणं सर्वेषाम्। अत एव अन्तःकरणं गुणत्रयात्मकम् भवति। त्रिषु गुणेषु सत्त्वगुणः प्रकाशकः। रजोगुणः कामक्रोधरागद्वेषादीनाम् उत्पादकः। तमोगुणस्तु प्रमादालस्यनिद्रामोहादीनां जनकः। रजसि तमसि च क्षीणे सत्त्वगुणाधिक्यात् अन्तःकरणं यथायथं सर्वम् प्रकाशयति। रजसा तमसा च अभिभूतम् अन्तःकरणं दृष्टस्य स्पृष्टस्य श्रुतस्य आघ्रातस्य रसितस्य च विषयस्य वास्तविकं स्वरूपम् प्रकाशयितुं न शक्नोति। अस्माभिः सर्वैः विद्युद्दीपः दृष्टः। विद्युद्दीपः प्रकाशकद्रव्येण पूर्णः अस्ति। किन्तु तस्य बहिर्देशः धूल्यादिमालिन्ययुक्तः चेत् सः स्वस्य अन्तः निहितायाः दीप्तेः बहिः प्रकाशने असमर्थः भवति। एवमेव अन्तःकरणम् प्रकाशनशीलेन सत्त्वगुणेन सहितं चेदपि रजसा तमसा च योगात् अशुद्धम् अस्ति इत्यतः स्वान्तर्निहितस्य ब्रह्मणः प्रकाशने असमर्थम् भवति। तस्मात् यदि अस्माभिः ब्रह्मविद्या इष्यते तर्हि प्रथमम् अन्तःकरणस्य शुद्धिः यत्नेन सम्पादनीया। अन्तःकरणे विद्यमानात् सत्त्वगुणात् रजोगुणः तमोगुणश्च दूरीकरणीयः इत्यर्थः। अतः एव अन्तःकरणस्य शुद्धिः सत्त्वशुद्धिः इत्यपि व्यपदिश्यते। यस्य सत्त्वशुद्धिः अस्ति तस्यैव साधनचतुष्टयं सिद्ध्यति। साधनचतुष्टयसम्पन्नः एव ब्रह्मबोधकानि वेदान्तवाक्यानि श्रुत्वा ब्रह्मविद्यां लभते।

अन्तःकरणशुद्धिः कथम् अस्माभिः प्राप्तुं शक्या। योगबुद्ध्या (योगबुद्धिः -- निरहङ्कारा निःस्वार्था बुद्धिः।) यदि वयं कर्मणाम् उपासनानां च अनुष्ठानं कुर्मः तर्हि अस्माकम् अन्तःकरणं क्रमशः शुद्धम् भवति। प्रायेण शारीरकं कर्म एव कर्मशब्देन अत्र उच्यते, मानसिकं कर्म तु उपासनशब्देन अभिधीयते। शास्त्रे बहुविधानि कर्माणि उपासनानि च विहितानि सन्ति। एषां कर्मणाम् उपासनानाञ्च यथाविधि अनुष्ठानेन

प्राप्तुं शक्यानि फलानि च शास्त्रे बोधितानि विद्यन्ते। यदि वयम् एषां कर्मणाम् उपासनानाञ्च अनुष्ठानम् फलेच्छया एव कुर्मः तर्हि वयम् पुनः पुनः कामनानां वशीभूताः एव भवामः। प्रत्युत यदि फलेच्छाम् परित्यज्य वयं कर्मोपासनानुष्ठाने निरताः भवेम तर्हि अस्माकम् अन्तःकरणं शुद्धम् एकाग्रं च भवेत्। निर्मलम् एकाग्रञ्च अन्तःकरणं साधनचतुष्टयसम्पन्नम् भवति। तादृशे अन्तःकरणे वेदान्तशास्त्रश्रवणेन ब्रह्मविद्या समुदेति। तस्मात् कर्मणाम् उपासनानाञ्च निष्कामतया एव अनुष्ठानं कर्तव्यम् मुक्तिकामैः।

काम्यं निषिद्धं नित्यं नैमित्तिकम् प्रायश्चित्तञ्चेति पञ्चविधानि कर्माणि प्रथन्ते। यैः कर्मभिः स्वर्गादि इष्टम् फलं लभ्यते तानि कर्माणि काम्यानि। येषां कर्मणां नरकादि अनिष्टम् एव फलं तानि शास्त्रेण प्रतिषिद्धानि कर्माणि निषिद्धानि। ब्राह्मणादीन् वर्णान् ब्रह्मचर्यादीन् आश्रमान् च उद्दिश्य नित्यकर्तव्यतया शास्त्रेण विहितानि कर्माणि नित्यानि। पुत्रजन्मादिरूपं किमपि विशिष्टं निमित्तम् आश्रित्य यानि कर्माणि कर्तव्यानि भवन्ति तानि नैमित्तिकानि। पापं कृतं चेत् तस्य क्षयार्थं यत् कर्म कर्तव्यं तत् प्रायश्चित्तम्। एषु काम्यं निषिद्धं च वर्जयित्वा अन्यानि त्रिविधानि कर्माणि अस्माभिः कर्तव्यानि भवन्ति। एषां नित्यनैमित्तिकप्रायश्चित्तानां शास्त्रप्रसिद्धानां कर्मणाम्, गुरुजनैः कर्तव्यतया अस्मभ्यम् उपदिष्टानां कर्मणां च मोक्षसाधनरूपेण अनुष्ठानम् एव वेदान्तशास्त्रे कर्मयोगः इत्युच्यते। कर्मयोगेन चित्तमलानां नाशः भवति, ततश्च चित्तं शुद्ध्यति।

उपासनं द्विविधम् – सगुणब्रह्मविषयकं निर्गुणब्रह्मविषयकञ्च इति। सगुणब्रह्मविषयकम् उपासनम् एव ब्रह्मविद्यायाः बहिरङ्गसाधनेषु अथवा परम्परासाधनेषु गण्यते। निर्गुणब्रह्मविषयकम् उपासनं तु निदिध्यासनम् इति नाम्ना प्रसिद्धम्। तत् अन्तरङ्गसाधनेषु अन्तर्भवति (श्रवणम् मननं निदिध्यासनञ्च ब्रह्मविद्योत्पत्तिम् प्रति अन्तरङ्गसाधनानि भवन्ति।)। सगुणब्रह्मविषयकानि उपासनानि उपनिषत्सु मुख्यतया द्विविधानि श्रूयन्ते – अहङ्ग्रहोपासनम् प्रतीकोपासनं चेति। एषां द्विविधानाम् अपि उपासनानां स्वकीयानि फलानि सन्ति। तेषु फलेषु कामनाम् परित्यज्य चित्तशुद्ध्यर्थम् अपि उपासनं कर्तुं शक्यते। अन्तःकरणशुद्धिद्वारा ब्रह्मविद्योदयस्य उपायभूतम् अन्यत् अपि द्विविधम् उपासनं विद्यते – ध्यानयोगः, भक्तियोगश्च इति। ध्यानम् भक्तिश्च मनसा एव क्रियते इत्यतः ध्यानयोगस्य भक्तियोगस्य च मानसव्यापाररूपे उपासने अन्तर्भावः भवति। ध्यानेन चित्तविक्षेपाणां क्षयात् चित्तस्य एकाग्रता भवति। एकाग्रता चित्तशुद्धिं वर्धयति, साधनचतुष्टयसम्पत्तौ च साहाय्यं विदधाति। भक्त्या च ईश्वरप्रसादः भवति, भगवत्कृपया च चित्तशुद्धिः, साधनचतुष्टयम्, वेदान्तवाक्यार्थस्य अवगमनम्, मोक्षः इत्यादिकं सर्वं क्षणेन सेत्स्यति।

## पाठगतप्रश्नाः-२

३. अन्तःकरणं कथं शुद्धम् भवति।

४. विद्युद्दीपदृष्टान्तेन अन्तःकरणस्य शोधनं वर्णयत।

५. द्विविधम् उपासनं किम्।

६. भक्तियोगः ध्यानयोगश्च कथम् उपासनेषु अन्तर्भवति।

## २३.३ कर्मयोगः

देहे इन्द्रियेषु अन्तःकरणे च सत्त्वं रजः तमः इत्याख्यैः त्रिभिः गुणैः नानाविधानि कर्माणि उपजायन्ते। एतानि अध्यासवशात् आत्मनि आरोप्यन्ते जीवैः। गुणैः जायमानेषु कर्मसु अध्यासेन संसक्तः जनः कामादीनां वशीभूतः सन् अहं कर्माणि करोमि इति विभावयति। ततश्च स तेषां कर्मणाम् फलानि भुञ्जानः संसारम् अनुभवति।

अस्मात् संसारात् मुक्तिः तु अध्यासस्य अत्यन्तनिवृत्त्या एव सम्भवति। देहेन्द्रियादिसङ्घातस्य आत्मनश्च मध्ये यः परस्परम् अध्यासः स अविद्या इत्यपि उच्यते। अविद्या ब्रह्मविद्यया एव चिराय निवर्तते। ब्रह्मविद्या च कामाक्रोधादिभिः अशुद्धे मनसि न समुदेति। तस्मात् साधकः प्रथमम् अन्तःकरणशुद्ध्यै कामक्रोधादिकं निगृह्य निस्सङ्गतया कर्माणि कुर्यात्।

निस्सङ्गतया यत्किमपि यथेच्छं कुर्मः चेत् सः कर्मयोगः भवति वा। न, स्वस्य कर्तव्यानां कर्मणां निस्सङ्गतया अनुष्ठानम् एव कर्मयोगः। कर्तव्यं किम्, अकर्तव्यं किम् इत्यत्र अस्माकं यदा संशयः भवेत् तदा शास्त्रम् आचार्याणां वचनं च प्रमाणरूपेण स्वीकार्यम्। अस्माकं स्वधर्मः अथवा कर्तव्यं कर्म अवस्थाभेदेन भिद्यते। तस्मात् अस्माभिः शास्त्राचार्यवाक्यानि श्रुत्वा विवेकपूर्वकम् एव स्वधर्मः निश्चेतव्यः भवति। स च स्वधर्मः मोक्षार्थिभिः योगबुद्ध्या समनुष्ठेयः। अत एव भगवान् गीताशास्त्रे उवाच – तस्माच्छास्त्रम् प्रमाणं ते कार्याकार्यव्यवस्थितौ। ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि॥ (श्रीमद्भगवद्गीता, अध्यायः १६, श्लोकः २४), स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः (श्रीमद्भगवद्गीता, अध्यायः १८, श्लोकः ४५), स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः (श्रीमद्भगवद्गीता, अध्यायः १८, श्लोकः ४६), श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्। स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥ (श्रीमद्भगवद्गीता, अध्यायः १८, श्लोकः ४७) इत्यादि।

कर्मणां योगबुद्ध्या समनुष्ठानम् एव कर्मयोगः इति प्रोच्यते। अहं करोमि इति कर्तृत्वबुद्धिम् इदं फलम् मम भवतु इति फलाभिसन्धिं च विना या बुद्धिः निस्स्वार्थतायाम् अवतिष्ठति सा एव योगबुद्धिः। योगबुद्धिः कामक्रोधादिभिः (कामः, क्रोधः, लोभः, मोहः, मदः, मात्सर्यम्, डम्भः, असूया इत्येते अष्ट पाशाः इति उच्यन्ते।) कदापि न विचलति। योगबुद्धियुक्तः जनः सर्वाणि अपि कर्माणि यत्नेन करोति चेदपि कर्मफलानां सिद्धौ न तुष्यति, तेषाम् असिद्धौ च न खिद्यति। स समत्वेन सर्वम् पश्यति। अनया बुद्ध्या यदि वयं कर्माणि कुर्मः तर्हि अस्माकम् अन्तःकरणं शुद्धम् भविष्यति, क्रमेण साधनचतुष्टयञ्च सम्पत्स्यते। इदं सर्वं संकलय्य श्रीभगवान् उवाच –

**योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय। सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ (श्रीमद्भगवद्गीता, अध्यायः २, श्लोकौ ४८) इति।**

कर्मयोगस्य अभ्यसनस्य सुकरः कश्चन उपायः अस्ति ईश्वरार्पणबुद्ध्या कर्मणाम् अनुष्ठानम्। ईश्वरभक्तः कर्मयोगी स्वकर्मणां समाचरणेन भगवन्तम् अर्चयति। स कर्मणाम् फलानि न वाञ्छति। भगवान् मयि प्रसन्नः भूत्वा मम अन्तःकरणं निर्मलं विदधातु इत्येव स प्रार्थयति। ईदृशं कर्मयोगाभ्यासं श्रीभगवान् गीताशास्त्रे उपदिष्टवान् –

**सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः। मत्प्रसादादवाप्नोति शाश्वतम् पदमव्ययम्॥**

**चेतसा सर्वकर्माणि मयि संन्यस्य मत्परः। बुद्धियोगमुपाश्रित्य मच्चित्तः सततम् भव॥ (श्रीमद्भगवद्गीता, अध्यायः १८, श्लोकौ ५६, ५७) इति।**

## २३.३.१ कर्मयोगस्य फलम्

कर्मयोगस्य साक्षात्फलम् अस्ति चित्तशुद्धिः। परम्पराफलं तु मुक्तिः।

निष्कामकर्मयोगः महत् पुण्यकर्म वर्तते। निष्कामकर्मयोगेन जातेन पुण्येन चित्तस्य पापं नश्यति। रागद्वेषादिकम् अथवा कामक्रोधादिकम् अस्ति चित्तस्य पापम्। इदम् पापम् एव चित्तस्य मलम्। मलिनं चित्तं वेदान्तवाक्यैः बोधितस्य आत्मस्वरूपस्य सुष्ठु ग्रहणे समर्थं न भवति। यदा साधकः निस्सङ्गतया कर्माचरणे निष्ठां प्राप्नोति तदा पापानि विनश्यन्ति, चित्तं च शुद्ध्यति।

किन्तु प्रारम्भे एव साधकः निष्कामकर्मयोगे निष्ठावान् न भवति। अभ्यासेन स कर्मयोगे निष्ठां सम्पादयति। कर्मयोगे निष्ठावान् साधकः योगारूढः इत्युच्यते। अत्र योगः इत्यस्य कर्मयोगः इत्यर्थः। योगरूढस्य लक्षणं श्रीभगवान् गीताशास्त्रे एवं प्राह –

**यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।**
**सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते॥ (श्रीमद्भगवद्गीता, अध्यायः ६, श्लोकः ४) इति।**

**अन्वयः** – यदा हि न इन्द्रियार्थेषु अनुषज्जते, न कर्मसु (अनुषज्जते), सर्वसङ्कल्पसंन्यासी, तदा योगारूढः उच्यते।

**तात्पर्यम्** – यदा कर्तव्यानि सर्वाणि अपि कर्माणि कुर्वन् एव कश्चित् साधकः सर्वान् कामहेतून् सङ्कल्पान् संन्यस्यति, इन्द्रियविषयेषु कर्मसु च न सज्जते, तदा स कर्मयोगारूढः इति ज्ञायते।

इयं योगारूढस्थितिः अथवा कर्मयोगनिष्ठा यदा प्राप्यते तदा साधकस्य चित्तम् प्रायेण शुद्धम् (प्रायेण शुद्धम् – यद्यपि कर्मयोगेन चित्तशुद्धिः भवति इति उच्यते तथापि वस्तुतः कर्मयोगमात्रेण सम्पूर्णतया चित्तशुद्धिः न भवति। ब्रह्मविद्यया अथवा आत्मज्ञानेन एव चित्तं सम्पूर्णतया शुद्धम् भवति। चित्ते अवस्थितानि रागद्वेषादीनि मलानि आत्मज्ञानेन एव नितान्तं विनश्यन्ति। तस्मात् कर्मयोगेन चित्तम् प्रायेण शुद्धम् भवति इति उक्तम्।) इति ज्ञायते। इयं चित्तशुद्धिः एव कर्मयोगाभ्यासस्य साक्षात्फलम्।

परम्परया तु कर्मयोगनिष्ठः साधकः विवेकवैराग्यादिरूपं साधनचतुष्टयम् प्राप्य वेदान्तवाक्यानां तात्पर्यभूतम् आत्मस्वरूपम् ब्रह्म साक्षात्करोति। ब्रह्मसाक्षात्कारः एव ब्रह्मविद्या इत्यपि उच्यते।

आत्मस्वरूपविषयिण्या अनया विद्यया आत्मस्वरूपविषयिण्याम् अविद्यायां निवृत्तायां संसारात् मुक्तिः भवति। इदं गीताशास्त्रे श्रीभगवान् एवम् उपदिशति –

**येषां त्वन्तगतम् पापं जनानाम् पुण्यकर्मणाम्।**
**ते द्वन्द्वमोहनिर्मुक्ताः भजन्ते मां दृढव्रताः॥ (श्रीमद्भगवद्गीता, अध्यायः ७, श्लोकः २८)**

**अन्वयः** – येषाम् पुण्यकर्मणां जनानां तु पापम् अन्तगतं ते द्वन्द्वमोहनिर्मुक्ताः दृढव्रताः माम् भजन्ते।

**तात्पर्यम्** – कर्मयोगः एवात्र पुण्यकर्म इत्युक्तः। रागद्वेषादिकम् अथवा कामक्रोधादिकम् एव पापम्। इच्छाद्वेषादिरूपम् भवति द्वन्द्वम्। द्वन्द्वनिमित्तः मोहः अस्माकं चित्तं वशीकृत्य अस्मान् पापकर्मसु प्रवर्तयति। ये जनाः कर्मयोगाख्यम् पुण्यकर्म कुर्वन्ति ते द्वन्द्वमोहात् निर्मुक्ताः भवन्ति। अत एव तेषाम् पापं क्रमशः नश्यति, चित्तं च शुद्ध्यति। कर्मयोगे दृढव्रताः ते साधकाः परमात्मानम् एव सर्वदा भजन्ते। ब्रह्मविद्यया परमात्मानं साक्षात्कृत्य तस्मिन् एव रमन्ते इत्यर्थः।

## २३.३.२ भगवद्गीतायां कर्मयोगोपदेशः

> गीता सुगीता कर्तव्या किमन्यैः शास्त्रविस्तरैः।
> या स्वयम् पद्मनाभस्य मुखपद्माद् विनिःसृता॥

एवञ्च मुक्तिरेव कर्मयोगस्य परम्परया लभ्यम् फलम् इति अवगम्यते।

श्रीमद्भगवद्गीता योगशास्त्रम् इति नाम्ना विद्वद्भिः स्तूयते। आत्मस्वरूपबोधाय यः साधनमार्गः स एव योगः इत्युच्यते। यद्यपि भगवता श्रीकृष्णेन गीताशास्त्रे बहुविधानां योगानां सारः समुपदिष्टः तथापि कर्मयोगविषये भगवता कृतः उपदेशः अत्यन्तम् प्रसिद्धः। अत एव लोके प्रसिद्धिः – भगवद्गीता अस्मान् स्वकर्मणः निःसङ्गतया अनुष्ठानमेव बोधयति इति। गीताशास्त्रे आद्यन्तं कर्मयोगपराः श्लोकाः विद्यन्ते। यथा –

कर्मण्येवाधिकारस्ते मा फलेषु कदाचन।
मा कर्मफलहेतुर्भूः मा ते सङ्गोऽस्त्वकर्मणि॥ (अध्यायः २, श्लोकः ४७)

**अन्वयः** – कर्मणि एव ते अधिकारः। कदाचन फलेषु मा (ते अधिकारः स्यात्)। कर्मफलहेतुः मा भूः। अकर्मणि ते सङ्गः मा अस्तु।

**तात्पर्यम्** – चित्तशुद्धिः यस्य वर्तते स एव कर्मणाम् परित्यागे अधिकारी भवति। कर्माणि परित्यज्य शुद्धचित्तः साधनचतुष्टयान्तर्भूतं शमादिकं शीलयति। तस्मात् यस्य चित्तशुद्धिः नास्ति स कर्मसु एव अधिकारी। स चित्तशुद्ध्यर्थं कर्माणि कुर्यात्। किन्तु कर्मफलाकाङ्क्षया यः कर्माणि करोति तस्य

चित्तं न शुद्ध्यति। तस्मात् चित्तशुद्धिं यः कामयते तस्य केवलं कर्मसु एव अधिकारः, न तु कर्मफलेषु। स कर्मफलानां स्वयं हेतुः न भवेत्, कर्मफलेच्छाम् परित्यजेत् इत्यर्थः। कर्मफलेच्छा परित्यक्तव्या इत्युक्ते कदाचित् कोऽपि कर्माणि एव परित्यजेत् इति चिन्तयन् भगवान् विशेषतः उपदिशति – तव अकर्मणि सङ्गः मा अस्तु इति। कर्माणि एव परित्यज्य अलसः मा भव। विना कर्मानुष्ठानं कस्यापि चित्तशुद्धिः न सिद्ध्यति। तस्मात् कर्मफले यथा सङ्गः न युक्तः तथा कर्मणाम् अननुष्ठाने अपि सङ्गः न युक्तः।

योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते॥ (अध्यायः २, श्लोकः ४८)

**अन्वयः** – (हे) धनञ्जय, योगस्थः (सन्) सङ्गं त्यक्त्वा सिद्ध्यसिद्ध्योः समः भूत्वा (च) कर्माणि कुरु। समत्वं योगः उच्यते।

**तात्पर्यम्** – कर्तृत्वबुद्ध्या फलाभिसन्ध्या च विरहितस्य अन्तःकरणस्य यत् समत्वं तदेव योगः। योगं समाश्रित्य एव सर्वविधः अपि सङ्गः त्यक्तुं शक्यते। योगे स्थितिं सङ्गस्य त्यागञ्च यः वाञ्छति सःकर्ता कर्मफलानां सिद्धौ असिद्धौ च समः भवेत्। तत्र कारणम् इदम् – समत्वम् एव योगः इत्युच्यते।

## २३.४ स्वपाठाय – (परीक्षार्थं न)

- न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत्।
  कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः॥ (अध्यायः ३ श्लोकः ५)
- कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन्।
  इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते॥ (अध्यायः ३ श्लोकः ६)
- यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन।
  कर्मेन्द्रियैः कर्मयोगम् असक्तः स विशिष्यते॥ (अध्यायः ३ श्लोकः ७)
- यज्ञार्थात् कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः।
  तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर॥ (अध्यायः ३ श्लोकः ९)
- तस्मादसक्तः सततं कार्यं कर्म समाचर।
  असक्तो ह्याचरन् कर्म परमाप्नोति पूरुषः॥ (अध्यायः ३ श्लोकः १९)
- प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
  अहङ्कारविमूढात्मा कर्ताहमिति मन्यते॥ (अध्यायः ३ श्लोकः २७)
- तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः।
  गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते॥ (अध्यायः ३ श्लोकः २८)
- मयि सर्वाणि कर्माणि सन्यस्याध्यात्मचेतसा।
  निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः॥ (अध्यायः ३ श्लोकः ३०)

- इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ।
  तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ॥ (अध्यायः ३ श्लोकः ३४)

- श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
  स्वधर्मे निधनं श्रेयः परधर्मो भयावहः॥ (अध्यायः ३ श्लोकः ३५)

- यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः।
  ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितम् बुधाः॥ (अध्यायः ४, श्लोकः १९)

- त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः।
  कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः॥ ((अध्यायः ४, श्लोकः २०)

- निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः।
  शारीरं केवलं कर्म कुर्वन् नाप्नोति किल्बिषम्॥ (अध्यायः ४, श्लोकः २१)

- यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः।
  समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते॥ (अध्यायः ४, श्लोकः २२)

- ब्रह्मण्याधाय कर्माणि सङ्गं त्यक्त्वा करोति यः।
  लिप्यते न स पापेन पद्मपत्रमिवाम्भसा॥ (अध्यायः ५, श्लोकः १०)

- कायेन मनसा बुद्ध्या केवलैरिन्द्रियैरपि।
  योगिनः कर्म कुर्वन्ति सङ्गं त्यक्त्वाऽऽत्मशुद्धये॥ (अध्यायः ५, श्लोकः ११)

- युक्तः कर्मफलं त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम्।
  अयुक्तः कामकारेण फले सक्तो निबध्यते॥ (अध्यायः ५, श्लोकः १२)

- आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।
  योगारूढस्य तस्यैव शमः कारणमुच्यते॥ (अध्यायः ६, श्लोकः ३)

- यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।
  सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते॥ (अध्यायः ६, श्लोकः ४)

- यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत्।
  यज्ञो दानं तपश्चैव पावनानि मनीषिणाम्॥ (अध्यायः १८, श्लोकः ५)

- एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च।
  कर्तव्यानीति मे पार्थ निश्चितम् मतमुत्तमम्॥ (अध्यायः १८, श्लोकः ६)

- कार्यमित्येव यत् कर्म नियतं क्रियतेऽर्जुन।
  सङ्गं त्यक्त्वा फलञ्चैव स त्यागः सात्त्विको मतः॥ (अध्यायः १८, श्लोकः ९)

- न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः।

यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते॥ (अध्यायः १८, श्लोकः ११)

- यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।
  स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥ (अध्यायः १८, श्लोकः ४६)
- श्रेयान् स्वधर्मो विगुणः परधर्मात् स्वनुष्ठितात्।
  स्वभावनियतं कर्म कुर्वन् नाप्नोति किल्मिषम्॥ (अध्यायः १८, श्लोकः ४७)

## २३.४.१ कर्मयोगस्य माहात्म्यविषये स्वामिविवेकानन्देन कृतम् प्रबोधनम्

स्वस्य कर्तव्यं कर्म न कदापि निन्द्यम्, केनापि स्वकर्तव्यं न परित्याज्यम्, योगबुद्ध्या तत् अनुष्ठेयम् इति स्वामी विवेकानन्दः अपि अस्मान् प्रबोधयति। कर्मयोगम् अधिकृत्य स्वामिना पाश्चात्यदेशे आङ्गलभाषया कृतात् भाषणात् केचन अंशाः संस्कृतेन अनूद्य अधस्तात् उद्ध्रियन्ते –

उन्नतिलाभस्य एकः एव उपायः – अस्माकं निकटे यत् कर्तव्यं वर्तते तस्य अनुष्ठानम्। तद्द्वारा शक्तिं सञ्चित्य क्रमशः परमपदम् प्रति गन्तव्यम्। यः अध्यापकः सदा अर्थहीनमेव यत्किमपि भाषते तस्मादपि यः चर्मकारः अल्पेन कालेन पादरक्षां निर्माय प्रददाति स एव श्रेयान्।

कश्चन युवा संन्यासी वनं गतवान्। बहुकालं स तत्र ध्यानम् भजनं योगाभ्यासञ्च अकरोत्। बहूनि वर्षाणि कठोरं तपः आचर्य कस्मिंश्चित् दिने वृक्षतले स समुपविष्टः आसीत्। तदा तस्य मस्तके शुष्कपत्राणि कानिचन अपतन्। उपरि पश्यन् सः एकं काकम् एकं बकञ्च अपश्यत्। काकबकौ परस्परं कलहायमानौ आस्ताम्। तौ दृष्ट्वा तस्य महान् क्रोधः जातः। सः अवोचत् – किम्, युवां मम मस्तके शुष्कपत्राणि पातयितुं साहसं कुरुथः। एवं वदन् यदा स कोपेन तौ अपश्यत् तदा तस्य मस्तकात् कश्चन अग्निरश्मिः निर्गत्य पक्षिणौ भस्मीचकार। तेन कृतस्य योगाभ्यासस्य एतावती शक्तिः। तस्य महान् आनन्दः जातः। मम ईदृशी शक्तिः विकसिता यत् दृष्टिप्रसारमात्रेण काकम् बकञ्च भस्मीकर्तुम् प्रभवामि इति विचिन्त्य सः अत्यानन्देन विह्वलः अभवत्।

किञ्चिदनन्तरं भिक्षाटनार्थं तेन नगरं गन्तव्यम् अभवत्। कस्यचित् गृहस्य पुरस्तात् स्थित्वा स अवदत् – मातः मह्यम् भिक्षां देहि इति। अन्तर्भागात् उत्तरम् आगतम् – वत्स, किञ्चित्कालम् प्रतीक्षस्व इति। युवकः अचिन्तयत् – हतभागिनि, कियता दुःसाहसेन माम् प्रतीक्षितुं वदसि। त्वम् इदानीमपि मम शक्तिं न जानासि इति। यदा स एवं चिन्तयति स्म तदा सा एव कण्ठध्वनिः पुनः श्रुता – वत्स, स्वस्य विषये अत्यधिकम् मा चिन्तय। अत्र काकः वा बकः वा नास्ति इति। स आश्चर्यचकितः जातः। तथापि तेन प्रतीक्षा करणीया अभवत्। अन्ते सा महिला बहिः आगतवती। स तस्याः पादयोः पतित्वा अपृच्छत् – मातः, त्वं कथं तत् ज्ञातवती इति। सा अवदत् – तात, अहं तव योगं वा तपः वा किमपि न जानामि। अहं काचित् इतरा महिला (इतरा महिला – *A common everyday woman; a simple lady.*)। प्रतीक्षस्व इति त्वाम् अवदम्, यतो हि मम पतिः रोगपीडितः अस्ति। अहं तस्य सेवायं निरता आसम्। सम्पूर्णेऽपि जीवने अहम् मम कर्तव्यं समनुष्ठातुम् प्रयतितवती। विवाहात् पूर्वम् पितरौ प्रति पुत्र्या यत् कर्तव्यं तत् मया कृतम्। अधुना विवाहिता पतिम् प्रति मम यत् कर्तव्यं तत् करोमि। एतावान् एव मम योगाभ्यासः। किन्तु कर्तव्यस्य कर्मणः ,समनुष्ठानेन मम ज्ञानचक्षुः समुन्मीलितम्। ततः एव अहं तव

मनोभावम् अरण्ये त्वया कृतञ्च सर्वम् अवगतवती। इतोऽपि उच्चतरं किमपि ज्ञातुम् इच्छसि चेत् समीपस्थस्य अपरस्य नगरस्य विपणीं गच्छ। तत्र कञ्चित् व्याधं द्रक्ष्यसि। स तुभ्यम् उपदेशं दास्यति, यम् प्राप्य त्वम् आनन्दितः भविष्यति इति।

संन्यासी अचिन्तयत् – तत्र नगरे कस्यचित् व्याधस्य समीपं किमर्थं गच्छामि इति। किन्तु गृहिण्याः सविधे यज्जातं तेन तस्य किञ्चित् ज्ञानोदयः जातः आसीत्। तस्मात् स व्याधं द्रष्टुं गतवान्। तस्य नगरस्य निकटम् आगत्य विपणीम् अपश्यत्। दूरात् एव संन्यासी तत्र अपश्यत् -- कश्चन स्थूलकायः व्याधः समुपविश्य मांसं खण्डयति। स मूल्यादिविषये बहुविधैः जनैः सह उच्चैः विवदन् मांसविक्रयणं करोति। युवा संन्यासी अचिन्तयत् – हे भगवन्, रक्ष। किम्, अस्य निकटे मया विद्या ग्रहीतव्या। अयं तु कस्यचित् पिशाचस्य अवतार इव भाति इति। एतन्मध्ये सः व्याधः मुखम् उन्नमय्य संन्यासिनं दृष्ट्वा अवदत् – स्वामिन्, किं सा महिला भवन्तम् अत्र प्रेषितवती। मम विक्रयः यावन्न समाप्यते तावत् उपविशतु इति। अत्र मम किं वा भविष्यति इति चिन्तयन् संन्यासी उपाविशत्। व्याधः स्वस्य कर्मणि निरतः। मांसविक्रयं समाप्य धनादिकं च समाहृत्य स संन्यासिनम् अवदत् – आगच्छतु श्रीमन्, मम गृहं समागच्छतु इति। गृहे सम्प्राप्ते व्याधः तस्मै आसनम् प्रदाय अवदत् – अत्र प्रतीक्षस्व इति। तदनन्तरं गृहम् प्रविश्य स्वस्य वृद्धौ पितरौ व्याधः स्नापितवान्। स तौ भोजितवान्, तयोः सन्तोषकरीं सर्वविधाम् अपि परिचर्यां कृतवान्। ततः संन्यासिनं समेत्य अपृच्छत् – भवान् अत्र मं द्रष्टुम् आगतः। वदतु, किमहं भवते करोमि इति। संन्यासी तम् प्रति आत्मनः परमात्मनश्च विषये कांश्चित् प्रश्नान् अकरोत्। तेषाम् उत्तररूपेण व्याधेन यत् उक्तं तत् महाभारतस्य अंशरूपेण व्याधगीता इति नाम्ना प्रसिद्धम्। इयं व्याधगीता अत्युन्नता वेदान्तविद्या, दर्शनस्य परा काष्ठा। यूयम् भगवद्गीतायाः नाम श्रुतवन्तः, सा श्रीकृष्णस्य उपदेशः। भगवद्गीताम् पठित्वा युष्माभिः इयं व्याधगीता पठितव्या। अयं वेदान्तदर्शनस्य चूडामणिः।

व्याधोपदेशे समाप्ते संन्यासी अत्यन्तं विस्मितः अभवत्। स व्याधम् अपृच्छत् – भवतः एतादृशम् अत्युन्नतं ज्ञानम् विद्यते, तथापि इदं व्याधशरीरम् अवलम्ब्य ईदृशं कुत्सितं कार्यं कस्मात् करोषि इति। तदा व्याधः उत्तरम् प्रायच्छत् – वत्स, किमपि कर्म कुत्सितं नास्ति। किमपि कर्म अपवित्रं नास्ति। इदं कार्यम् मम वंशगतम्, इदम् मम प्रारब्धलब्धम्। बाल्यकालाद् अहम् इदं कर्म अभ्यस्तवान्। अनासक्तः भूत्वा अहम् मम कर्तव्यानि कर्तुम् प्रयते। अहं योगं न जानामि, संन्यासदीक्षाम् अपि न स्वीकृतवान्। अहं कदापि सांसारिकं जीवनम् परित्यज्य वनं न गतवान्। तथापि मम समाजस्थितिम् अनुसृत्य मया यत् कर्तव्यं तस्य अनासक्तभावेन अनुष्ठानं कुर्वन् अहम् इदं ज्ञानम् प्राप्तवान् इति।

अस्यां कथायां व्याधः महिला च सानन्दम् आत्मसमर्पणपूर्वकं स्वस्य कर्तव्यं कर्म करोति स्म। फलतः तौ आत्मज्ञानं प्राप्तवन्तौ। अनेन इदं स्पष्टम् प्रमाणीकृतम् – यस्य कस्यचिदपि आश्रमस्य (आश्रमाः चत्वारः – ब्रह्मचर्यम्, गार्हस्थ्यम्, वानप्रस्थम्, संन्यासः।) कर्म भवतु, निःसङ्गतया स्वकर्तव्यस्य कर्मणः अनुष्ठानेन वयम् आत्मस्वरूपविषयिणीम् परमाम् अनुभूतिम् (आत्मस्वरूपविषयिणी परमा अनुभूतिः एव ब्रह्मविद्या इति उच्यते।) प्राप्स्यामः इति।

अस्माकं कर्तव्यम् प्रधानतः अस्माकम् परितःस्थित्या (परितःस्थितिः -- *Circumstances.*) निर्धारितम् भवति। कर्तव्यस्य कर्मणः स्वभावतः एव गौरवं वा लाघवं वा नास्ति। सकामः कर्ता तस्य भाग्ये यत् कर्तव्यं कर्म आपतितं तस्मिन् असन्तुष्टिम् प्रकटयति। परन्तु अनासक्तस्य कर्तुः सर्वाणि अपि कर्तव्यानि समानरूपेण साधूनि भवन्ति। तानि अमोघानि अस्त्राणि भूत्वा तस्य स्वार्थपरताम् इन्द्रियपरवशतां च विनाशयन्ति, ततश्च स साधकः मुक्तेः पथि अग्रे सरति॥

## पाठगतप्रश्नाः-३

७. कर्मयोगः कः।

८. योगबुद्धिः का, तया किं सिद्ध्यति।

९. कर्मयोगस्य किम् फलम्, तच्च कथम् प्राप्यते।

## २३.५ ध्यानयोगः

ध्यानयोगः क्वचित् उपासनम् इत्यपि अभिधीयते। बहिरङ्गसाधनरूपे ध्यानयोगे सगुणब्रह्मविषयकाणि उपासनानि वयं गृह्णीमः।

वेदान्तसारः इत्याख्ये ग्रन्थे सदानन्दयोगीन्द्रः वदति – उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि इति। सर्वप्राणिनाम् आत्मस्वरूपं ब्रह्म निर्गुणं चेदपि शास्त्रेण आचार्येण वा उपासनायाः सौकर्यार्थम् ब्रह्मणि नाम रूपं च कल्प्यते। एवम् उपासनासौकर्याय कल्पिताभ्यां नामरूपाभ्यां सहितं यत् ब्रह्म तत् सगुणम् ब्रह्म इति शास्त्रे प्रसिद्धम्। विष्णुः शिवः दुर्गा इत्याद्याः देवताः सगुणब्रह्मणः भिन्नानि रूपाणि भवन्ति। अस्माकम् अभीष्टं सगुणब्रह्मणः रूपम् आश्रित्य वयं गुरूपदेशम् अनुसृत्य उपासनं कर्तुं शक्नुमः। इदम् उपासनम् मनसा एव क्रियते। अतः उपासनम् मानसव्यापारः अस्ति। शाण्डिल्यविद्या इति नाम्ना विख्यातम् एकम् उपासनं छान्दोग्योपनिषदि श्रूयते। शाण्डिल्यविद्या इत्यत्र विद्या इति शब्दस्य उपासनम् इत्येव अर्थः।

### २३.५.१ ध्यानयोगः किमर्थम् अभ्यसनीयः

चित्तशुद्धिः अथवा अन्तःकरणशुद्धिः क्रमशः अभ्यासेन सम्पादनीया भवति। प्रथमं कर्मयोगाभ्यासः, तदनन्तरं ध्यानयोगाभ्यासश्च कर्तव्यः।

ननु केवलं कर्मयोगेन एव चित्तं शुद्धम् भवति, किमर्थम् ध्यानयोगः अपि अभ्यसनीयः इति भवति शङ्का। उच्यते – अत्यन्तम् एकाग्रचित्तानां केवलं कर्मयोगेन अपि अन्तःकरणं शुद्ध्यति। अन्येषान्तु ध्यानयोगाभ्यासः अपि विशिष्य कर्तव्यः अस्ति। चित्तस्य शुद्धिः चित्तमलानां चित्तविक्षेपाणाञ्च

नाशेन एव सम्भवति। चित्तमलानां नाशः कर्मयोगाभ्यासेन प्रायः भवति। चित्तविक्षेपाणान्तु नाशः ध्यानयोगेन भवति।

पूर्वपूर्वजन्मनां सुकृतदुष्कृतानि चित्ते अवस्थितानि चित्तमलानि इत्युच्यन्ते। निस्सङ्गतया कर्मयोगे समनुष्ठिते इमानि क्षयम् आप्नुवन्ति। एवञ्च चित्तं क्रमशः शुद्धम् भवति। किन्तु यावत् चित्तविक्षेपाः न क्षीणाः तावत् चित्तम् अतीव शुद्धं न जातम् इति ज्ञायते। निर्मलम् एकाग्रञ्च चित्तं शुद्धम् इत्युच्यते। विक्षेपैः चित्तम् अनेकाग्रम् भवति। अनेकाग्रं चित्तं न सम्पूर्णतः शुद्धम्। तस्मात् चित्तशुद्ध्यै चित्तविक्षेपाः निरोद्धव्याः। चित्तस्य विक्षेपाः सन्ति कामक्रोधादयः (कामक्रोधादयः मनोविक्षेपाः क्वचित् रागद्वेषादिशब्दैः अपि उच्यन्ते।) । तेषां विक्षेपाणां हेतवः भवन्ति संस्काराः। संस्कारेभ्यः विक्षेपाख्याः चित्तवृत्तयः पुनः पुनः जायन्ते। चित्तस्य वर्तनम् एव वृत्तिः इत्युच्यते। कदाचित् चित्तं कामरूपेण वर्तते। कदाचिच्च क्रोधरूपेण वर्तते। कदाचित् पुनः लोभरूपेण। यदा चक्षुरादीनि इन्द्रियाणि बाह्यपदार्थैः सम्बन्धम् प्राप्नुवन्ति तदा चित्तम् अथवा अन्तःकरणं कामादिवृत्तिं धत्ते। इष्टस्य कस्यचित् वस्तुनः दर्शनेन मनः कामरूपेण वर्तते। अनिष्टस्य कस्यचित् वस्तुनः दर्शनेन मनः क्रोधरूपेण वर्तते। एवञ्च प्रतिक्षणम् अन्तःकरणं कामक्रोधादिरूपेण वर्तन्ते। आभिः कामादिभिः वृत्तिभिः एव अन्तःकरणं विक्षिप्तम् भवति। तस्मात् इमाः वृत्तयः एव चित्तस्य विक्षेपाः। विक्षेपाः यदा तेषां संस्कारैः सह क्षीणाः भवन्ति तदा अन्तःकरणम् एकाग्रम् भवति। एकाग्रम् एव अन्तःकरणम् अतीव विशुद्धम्। चित्तैकाग्रतायै च ध्यानयोगः अभ्यसनीयः। ध्यानाभ्यासेन खलु चित्ते अवस्थितानां विक्षेपहेतूनां संस्काराणां ततः विक्षेपाणाञ्च नाशः सम्भवति।

## २३.५.२ भगवद्गीतायां ध्यानयोगोपदेशः

१. आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते।
योगारूढस्य तस्यैव शमः कारणमुच्यते॥ (श्रीमद्भगवद्गीता, अध्यायः ६, श्लोकः ३)

२. यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्जते।
सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते॥ (श्रीमद्भगवद्गीता, अध्यायः ६, श्लोकः ४)

ध्यानयोगविधिः इत्थम् प्रोक्तः भगवता वासुदेवेन –

३. योगी युञ्जीत सततम् आत्मानं रहसि स्थितः।
एकाकी यतचित्तात्मा निराशीरपरिग्रहः॥ (श्रीमद्भगवद्गीता, अध्यायः ६, श्लोकः १०)

४. शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः।
नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम्॥ (श्रीमद्भगवद्गीता, अध्यायः ६, श्लोकः ११)

५. तत्रैकाग्रम् मनः कृत्वा यतचित्तेन्द्रियक्रियः।
उपविश्यासने युञ्ज्याद् योगमात्मविशुद्धये॥ (श्रीमद्भगवद्गीता, अध्यायः ६, श्लोकाः १२)

## पाठगतप्रश्नाः-४

१०. उपासनस्य वेदान्तसारे प्रोक्तं लक्षणं किम्।

११. का वै चित्तवृत्तिः।

१२. चित्तविक्षेपाः के।

१३. चित्तविक्षेपाः कस्मात् निरोद्धव्याः।

१४. ध्यानयोगाभ्यासः किमर्थः।

## २३.६ भक्तियोगः

विषयवस्तुषु विरागः, ईश्वरे अनुरागश्च भक्तिः इति कथ्यते। भगवति परमम् प्रेम एव भक्तिरिति नारदभक्तिसूत्रे प्रोक्तम्। नारदः, प्रह्लादः इत्यादीनाम् बहूनाम् पुराणप्रसिद्धानाम् भगवद्भक्तानां कथाः श्रूयन्ते। पुरा आल्वार् इति प्रसिद्धाः विष्णुभक्ताः, नायन्मार् इति ख्याताः शिवभक्ताश्च द्राविडदेशे भक्तिमार्गस्य प्रवर्तकाः आसन्। रामानुजाचार्यः, मध्वाचार्यः, वल्लभाचार्यः, निम्बार्काचार्यः, कनकदासः, पुरन्दरदासः, अक्कमहादेवी, ज्ञानेश्वरः, एकनाथः, नामदेवः, तुकारामः, मीरा, तुलसीदासः, सूरदासः, कबीरदासः, चैतन्यमहाप्रभुः इत्याद्याः अगणनीयाः भगवद्भक्ताः भारतवर्षस्य भिन्नेषु प्रान्तेषु भक्तिवेदान्तम् प्रचारितवन्तः।

### २३.६.१ बहुविधाः भक्ताः

लोके केचन भक्ताः भवन्ति ये रोगादीनां दुःखानां निवृत्तिं वा धनादिविषयस्य प्राप्तिं वा इच्छन्तः ईश्वरम् भजन्ते। केचित् तु स्वाभीष्टे रूपे ईश्वरं द्रष्टुम् तं निरन्तरं ध्यायन्ति। केचित् पुनः केवलम् आत्मज्ञानम् एव इच्छन्तः भगवति भक्तिं कुर्वन्ति। अन्ये तु केचन अत्यल्पाः भगवान् मम च अन्येषां च भूतानाम् अन्तरात्मा इति ज्ञानम् अवाप्य सर्वात्मस्वरूपे शुद्धे तस्मिन् ब्रह्मणि भक्तियुक्ताः निवसन्ति। भगवान् श्रीकृष्णः चतुर्विधान् भक्तान् निर्दिश्य तेषु अयं यः ज्ञानी स एव श्रेष्ठः भक्तः इति वदति –

**चतुर्विधा भजन्ते मां जनाः सुकृतिनोऽर्जुन।**
**आर्तो जिज्ञासुरर्थार्थी ज्ञानी च भरतर्षभ॥**
**तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते।**
**प्रियो हि ज्ञानिनोऽत्यर्थम् अहं स च मम प्रियः॥**
**(श्रीमद्भगवद्गीता, अध्यायः ७, श्लोकौ १६, १७) इति।**

**अन्वयः –**

(हे) भरतर्षभ, (हे) अर्जुन, आर्तः जिज्ञासुः अर्थार्थी ज्ञानी च (इति) चतुर्विधाः सुकृतिनः जनाः माम् भजन्ते। तेषां नित्ययुक्तः एकभक्तिः ज्ञानी विशिष्यते। हि ज्ञानिनः अहम् अत्यर्थम् प्रियः, मम च स प्रियः।

**शब्दार्थाः –**

भरतर्षभः – भरतकुलीनेषु श्रेष्ठः। आर्तः – दुःखितः। जिज्ञासुः – ज्ञानेच्छुः। अर्थार्थी – धनेच्छुः। सुकृतिनः – पुण्यवन्तः। नित्ययुक्तः – नित्यः यः परमात्मा तेन सह युक्तः। एकभक्तिः – एकनिष्ठया भक्त्या सहितः। विशिष्यते – अतिशेते।

## २३.६.२ निर्गुणब्रह्मविषयिणी भक्तिः

**मोक्षकारणसामग्र्याम् भक्तिरेव गरीयसी।**
**स्वस्वरूपानुसन्धानम् भक्तिरित्यभिधीयते॥ (विवेकचूडामणिः ३२)**

**अन्वयः** – मोक्षकारणसामग्र्याम् भक्तिः एव गरीयसी। स्वस्वरूपानुसन्धानम् भक्तिः इति अभिधीयते।

**शब्दार्थः – कारणसामग्री** – साधनसमूहः। गरीयसी – श्रेष्ठा। स्वस्वरूपानुसन्धानम् – स्वस्य यत् स्वरूपं तस्य अनुसन्धानम्, आत्मस्वरूपस्य ब्रह्मणः अनुसन्धानम्। अनुसन्धानम् – विचारः। अभिधीयते – उच्यते।

**तात्पर्यम्** – मोक्षम् प्रति यानि साधनानि वर्तन्ते तेषु भक्तिः एव श्रेष्ठा। का वै भक्तिः। आत्मस्वरूपस्य ब्रह्मणः स्वरूपानुसन्धानमेव भक्तिः। शङ्करभगवत्पादैः इयम् अत्र निर्गुणब्रह्मविषयिणी भक्तिः उक्ता।

आत्मस्वरूपानुसन्धानरूपा भक्तिः क्रमशः आत्मस्वरूपज्ञानरूपेण परिणमते। निर्गुणब्रह्मणि पूर्वं यत्नेन कृता इयम् भक्तिः अभ्यासेन साधकस्य अन्तःकरणे दृढा भवति। सुदृढा इयं निर्गुणब्रह्मविषयिणी भक्तिः (निर्गुणब्रह्मविद्या) संसारहेतुभूतां निर्गुणब्रह्मविषयिणीम् अविद्यां नाशयति। ततश्च मुक्तिः भवति।

**भक्त्या माम् अभिजानाति यावान् यश्चास्मि तत्त्वतः।**
**ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम्॥ (श्रीमद्भगवद्गीता, अध्यायः १८, श्लोकः ५५)**

सर्वप्राणिनाम् आत्मरूपेण अवस्थितं यत् निर्गुणम् ब्रह्म तदेव श्रीभगवतः वास्तविकं स्वरूपम्। इदं जगदीश्वरस्य वास्तविकं स्वरूपं वयं ब्रह्मविद्यया एव अभिजानीमः। एवञ्च भक्त्या माम् अभिजानाति इत्यत्र श्रीभगवता उक्ता या भक्तिः सा ब्रह्मविद्या एव। ब्रह्मविद्यारूपा इयं निर्गुणब्रह्मविषयिणी भक्तिः चतुर्थी भक्तिः इत्यपि उच्यते। आर्तस्य भक्तिः प्रथमा, जिज्ञासोः भक्तिः द्वितीया, अर्थार्थिनः भक्तिः तृतीया, ज्ञानिनः भक्तिश्च चतुर्थी। अनया भक्त्या साधकः मुक्तः भवति।

निर्गुणब्रह्मणि भक्तिमतः लक्षणम् –

अद्वेष्टा सर्वभूतानाम् मैत्रः करुण एव च।

निर्ममो निरहङ्कारः समदुःखसुखः क्षमी॥

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः॥

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः॥

यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान् यः स मे प्रियः॥

समः शत्रौ च मित्रे च तथा मानापमानयोः।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः॥

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
अनिकेतः स्थिरमतिर्भक्तिमान् मे प्रियो नरः॥

(श्रीमद्भगवद्गीता, अध्यायः १२, श्लोकाः १३-१९)

## २३.६.३ सगुणब्रह्मविषयिणी भक्तिः

अद्वेष्टा सर्वभूतानाम् इत्यादिश्लोकैः श्रीभगवता गीताशास्त्रे वर्णितः यः निर्गुणब्रह्मभक्तः सः आत्मज्ञानी एव। अत्यन्तं शुद्धाचित्तैः तादृशैः महात्मभिः एव सर्वात्मस्वरूपे निर्गुणे ब्रह्मणि यथायथं ज्ञानरूपा भक्तिः कर्तुं शक्यते। अन्यैस्तु निर्गुणब्रह्मभक्तिलभ्याम् ब्रह्मविद्यां कामयमानैः आदौ सगुणे ब्रह्मणि भक्तिः अभ्यसनीया।

सर्वात्मभूते परमे ब्रह्मणि उपासनायाः सौकर्यार्थं शास्त्रेण आचार्येण वा नामरूपादिकं कल्प्यते। तत् एव उपास्यम् ब्रह्म सगुणब्रह्म इति च प्रसिद्धं वेदान्तशास्त्रे। शास्त्रम् अवलम्ब्य जीवैः कृताभिः अन्तःकरणगताभिः भावनाभिः सर्वेषाम् आत्मस्वरूपम् यत् ब्रह्म तत् निर्गुणमपि सगुणम् भवति। सगुणे ब्रह्मणि क्रियमाणम् प्रेम सगुणभक्तिरिति कथ्यते।

शुद्धम् ब्रह्म एव भक्तानाम् भावनानुरूपं रामरूपेण कृष्णरूपेण शिवरूपेण दुर्गारूपेण च आविर्भवति। एवञ्च विष्णुः, शिवः, दुर्गा, गणेशः, सरस्वती इत्याद्याः देवताः सगुणब्रह्मणः भिन्नानि रूपाणि भवन्ति। आसां देवतानाम् भजनोपासनाविधेः विवरणम् पुराणादिषु शास्त्रग्रन्थेषु दृश्यते। उपासकानाम् भक्तिवृद्ध्यर्थम् आसां देवतानाम् अवतारकथाः लीलावर्णनम् इत्यादि च तेषु ग्रन्थेषु विस्तारितम्।

सगुणब्रह्मणि फलकामनया ये भक्तिं कुर्वन्ति ते तत् फलं लभन्ते। किन्तु तेषां चित्तशुद्धिः न भवति। अत एव श्रीभगवान् गीताशास्त्रे उवाच –

**यो यो यां यां तनूम् भक्तः श्रद्धयाऽर्चितुमिच्छति।**

**तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम्॥**
**स तया श्रद्धया युक्तस्तस्याराधनमीहते।**
**लभते च ततः कामान् मयैव विहितान् हि तान्॥** (७/२१,२२)

नारदभक्तिसूत्रे भक्तिः एवं निरुक्ता – सा त्वस्मिन् परमप्रेमरूपा इति। अस्मिन् ईश्वरे परमम् प्रेम एव भक्तेः रूपम् इति नारदमहर्षिः अस्मान् बोधयति। भगवन्तं ये परमप्रेम्णा भजन्ते ते भगवत्कृपया शुद्धचित्ताः भूत्वा ब्रह्मविद्याम् अवाप्य संसारात् मुक्ताः भवन्ति। इदं श्रीभगवान् स्वयं गीताशास्त्रे प्रतिज्ञातवान् –

**मच्चित्ता मद्गतप्राणा बोधयन्तः परस्परम्।**
**कथयन्तश्च मां नित्यं तुष्यन्ति च रमन्ति च॥**
**तेषां सततयुक्तानाम् भजताम् प्रीतिपूर्वकम्।**
**ददामि बुद्धियोगं तं येन मामुपयान्ति ते॥**
**तेषामेवानुकम्पार्थम् अहमज्ञानजं तमः।**
**नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता॥** (१०/९,१०,११)

**ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः।**
**अनन्येनैव योगेन मां ध्यायन्त उपासते॥**
**तेषामहं समुद्धर्ता मृत्युसंसारसागरात्।**
**भवामि नचिरात् पार्थ मय्यावेशितचेतसाम्॥** (१२/६,७)

## २३.६.४ भागवतप्रसिद्धा नवविधा भक्तिः

सगुणब्रह्मणि भक्तिः कथम् अभ्यसनीया इति जिज्ञासा सम्भवति। नवभिः सोपानैः समन्वितः कश्चन भक्तिमार्गः श्रीकृष्णभक्तानां कृते भागवतमहापुराणे निरूपिता वर्तते। अयम् भक्तिमार्गः नवविधा भक्तिः इति प्रसिद्धः। अनेन मार्गेण वयम् न केवलं श्रीकृष्णे अपि तु अस्माकम् अभीष्टे सगुणब्रह्मणः यस्मिन् कस्मिन्नपि रूपे भक्तिं लब्धुं शक्नुमः।

**श्रवणं कीर्तनं विष्णोः स्मरणम् पादसेवनम्।**
**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥ (भागवतमहापुराणम् ७.५.२३)**

श्रवणम् – विष्णोः सर्वव्यापिनः ईश्वरस्य नाम्नां माहात्म्यस्य च श्रवणम्।

कीर्तनम् – भगवतः गुणानां नाम्नां च सङ्कीर्तनम् अथवा गानम्।

स्मरणम् – भगवद्विषये एव सर्वदा स्मरणम्।

पादसेवनम् – भगवतः पादपद्मयोः सेवा।

अर्चनम् – भगवतः पूजनम्।

वन्दनम् – नमस्क्रिया।

दास्यम् – भगवतः दासरूपेण आचरणम्।

सख्यम् – भगवता सह सौहार्दम्।

आत्मनिवेदनम् – भगवति आत्मसमर्पणम्।

## २३.६.५ भक्तियोगविषयकाः श्लोकाः

पत्रम् पुष्पम् फलं तोयं यो मे भक्त्या प्रयच्छति।
तदहम् भक्त्युपहृतम् अश्नामि प्रयतात्मनः॥ (९.२६)
यत् करोषि यदश्नाति यज्जुहोषि ददासि यत्।
यत्तपस्यसि कौन्तेय तत् कुरुष्व मदर्पणम्॥ (९.२७)
समोऽहं सर्वभूतेषु न मे द्वेष्योऽस्ति न प्रियः।
ये भजन्ति तु माम् भक्त्या मयि ते तेषु चाप्यहम्॥ (९.२९)
अपि चेत् सुदुराचारो भजते माम् अनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग् व्यवसितो हि सः॥ (९.३०)
क्षिप्रम् भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति॥ (९.३१)

नास्था धर्मे न वसुनिचये नैव कामोपभोगे
यद्यद् भाव्यम् भवतु भगवन् पूर्वकर्मानुरूपम्।
एतत् प्रार्थ्यम् मम बहुमतं जन्मजन्मान्तरेऽपि
त्वत्पादाम्भोरुहयुगगता निश्चला भक्तिरस्तु॥ (राजा कुलशेखरः मुकुन्दमालास्तोत्रे)

तृणादपि सुनीचेन तरोरपि सहिष्णुना। अमानिना मानदेन कीर्तनीयः सदा हरिः॥ (श्रीकृष्णचैतन्यः शिक्षाष्टके)

## पाठगतप्रश्नाः-५

१५. का वै भक्तिः।

१६. भगवद्गीतानुसारं चतुर्विधाः भक्ताः के।

१७. निर्गुणब्रह्मविषयिणी भक्तिः का।

१८. सगुणब्रह्मविषयिणी भक्तिः का।

१९. नवविधभक्तिप्रख्यापकः भागवतश्लोकः कः।

## २३.७ यमनियमादिकम्

षट्सु वैदिकदर्शनेषु योगदर्शनम् अन्यतमम्। पतञ्जलिमहर्षिः अस्य दर्शनस्य प्रसिद्धः आचार्यः। पतञ्जलिमहर्षिणा प्रणीते योगसूत्रम् इत्याख्ये ग्रन्थे अष्टाङ्गयोगमार्गः वर्णितः। अस्य योगस्य अष्टौ अङ्गानि अथवा सोपानानि सन्ति इत्यतः अयं योगः अष्टाङ्गयोगः इति प्रसिद्धः। पातञ्जलयोगस्य अष्टौ अङ्गानि तावत् – यमः, नियमः, आसनम्, प्राणायामः, प्रत्याहारः, धारणा, ध्यानम्, समाधिः इत्येतानि। एषु अष्टसु अङ्गेषु यमम् आरभ्य प्रत्याहारं यावत् यानि अङ्गानि सन्ति तानि अन्तःकरणशुद्धिद्वारा साधनचतुष्टयोत्पत्तिम् प्रति उपायाः भवन्ति इति वेदान्तदर्शनस्य आचार्याः अङ्गीकुर्वन्ति।

एषु अङ्गेषु यमादीनाम् अङ्गानाम् अर्थः अधस्तात् प्रदर्श्यते –

| | |
|---|---|
| यमः | अहिंसा, सत्यम्, अस्तेयः, ब्रह्मचर्यम्, अपरिग्रहः इति पञ्च यमशब्देन उच्यन्ते। |
| नियमः | शौचम्, सन्तोषः, तपः, स्वाध्यायः, ईश्वरप्रणिधानम् इति पञ्च नियमशब्देन कथ्यन्ते। |
| आसनम् | स्थिरतया सुखेन च दीर्घकालं यावत् उपवेशनं यथा सम्भवति तथा हस्तपादादीनां संस्थापनम् आसनम् इति प्रोच्यते। पद्मासनम्, स्वस्तिकासनम् इत्यादिनामभिः बहुविधानि आसनानि प्रसिद्धानि सन्ति। |
| प्राणायामः | रेचकः, पूरकः, कुम्भकः इति त्रिभिः उपायैः क्रियमाणः प्राणनिग्रहार्थकः अभ्यासः प्राणायामः इति व्यपदिश्यते। |
| प्रत्याहारः | विषयवस्तुभ्यः इन्द्रियाणाम् प्रत्याहरणम् प्रत्याहारः इत्युच्यते। |

## पाठगतप्रश्नाः-६

२०. यमाः के।

२१. नियमाः के।

२२. प्रत्याहारस्य किं लक्षणम्।

## २३.८ परम्परासाधनानाम् फलम्

परम्परासाधनानि चित्तशुद्धेः कारणानि भवन्ति इति पूर्वमेव आपाततः प्रोक्तम्। वस्तुतः एकैकमपि परम्परासाधनं चित्ते भिन्नम् भिन्नं सामर्थ्यम् उत्पादयति। चित्ते स्थितानाम् पुण्यपापादीनाम् मलानां नाशः कर्मयोगेन भवति। चित्तस्य ये विक्षेपाः तेषां क्षयः ततः एकाग्रता च ध्यानयोगस्य फलम्। भक्तियोगस्य तु एतदुभयम् अपि फलम्। यमनियमादीनामपि तथैव।

कर्मयोगः
ध्यानयोगः
भक्तियोगः — अन्तःकरणशुद्ध्या साधनचतुष्टयसम्पत्तिः
यमनियमादिकम्

↓

वेदान्तवाक्यानां श्रवणमनननिदिध्यासनैः ब्रह्मविद्योत्पत्तिः।

## पाठसारः

चित्तशुद्धिकारणानि साधनानि एव परम्परासाधनानि अथवा बहिरङ्गसाधनानि इत्युच्यन्ते। कर्मयोगः, ध्यानयोगः, भक्तियोगः, यमनियमादिकम् इत्यादीनि नानाविधानि परम्परासाधनानि शास्त्रे निर्दिश्यन्ते। कर्तृत्वबुद्धिम् फलाभिसन्धिञ्च वर्जयित्वा योगबुद्ध्या नित्यनैमित्तिकप्रायश्चित्तादिकर्मणां समनुष्ठानं कर्मयोगः इति कथ्यते। निर्गुणब्रह्मणः सगुणब्रह्मणश्च उपासने ध्यानम् भक्तिश्च अन्तर्भवतः। तथापि ध्यानयोगः उपासनाशब्देन अधिकतया निर्दिश्यते। निर्गुणब्रह्मस्वरूपस्य अनुसन्धानं वा सगुणब्रह्मणि प्रेम वा भक्तिः इति प्रोच्यते। यमादयश्च पातञ्जलानाम् अष्टाङ्गयोगमार्गे प्रसिद्धाः। कर्मयोगादिषु एकेन एकाधिकेन वा साधनेन यस्य अन्तःकरणम् प्रायेण शुद्ध्यति तस्मिन्नेव सहकारिसाधनानि प्रकाशन्ते।

## पाठान्तप्रश्नाः

१. शास्त्रे निर्दिष्टानि नानाविधानि परम्परासाधनानि कानि।
२. अन्तःकरणं कथं शुद्धम् भवतीति विद्युद्दीपदृष्टान्तेन विशदयत।
३. उपासनं वै किम्, द्विविधम् उपासनं किम्, भक्तियोगः ध्यानयोगश्च कथम् उपासनेषु अन्तर्भवति।
४. कर्मयोगस्य किम् फलम्, तच्च कथम् प्राप्यते।

५. उपासनस्य वेदान्तसारे प्रोक्तं लक्षणं किम्।

६. का वै चित्तवृत्तिः।

७. चित्तविक्षेपाः के. ते कस्मात् निरोद्धव्याः।

८. ध्यानयोगाभ्यासः किमर्थः।

९. का वै भक्तिः, तस्याः द्वैविध्यं किम्।

१०. भगवद्गीतानुसारं चतुर्विधाः भक्ताः के, सश्लोकं व्याख्यात।

११. निर्गुणब्रह्मभक्तेः सगुणब्रह्मभक्तेश्च कः भेदः।

१२. भागवतप्रसिद्धां नवविधाम् भक्तिं व्याख्यात।

१३. यमाः नियमाश्च के।

१४. परम्परासाधनानाम् फलं किम्।

## पाठगतप्रश्नोत्तराणि

### पाठगतप्रश्नोत्तराणि-१

१. परम्परासाधनानि बहिरङ्गसाधनानि इत्यपि उच्यन्ते।

२. चित्तशुद्धिकारकाणि साधनानि एव परम्परासाधनानि भवन्ति। तानि नानाविधानि शास्त्रे निर्दिश्यन्ते। यथा छान्दोग्योपनिषदि आहारशुद्ध्या चित्तशुद्धिः भवतीति उक्तम्। भगवान् श्रीकृष्णः श्रीमद्भगवद्गीतायां यज्ञः, दानं, तपः इत्येतानि निस्सङ्गतया अनुष्ठितानि चित्तशुद्धिकारणानि भवन्ति इति अस्मान् उपदिशति। मनुमहर्षिः मनुस्मृतौ तपः चित्तशुद्धेः साधनम् भवति इति बोधयति। कर्मयोगेन चित्तशुद्धिः भवति इत्यपि श्रीभगवान् गीताशास्त्रे समुपदिशति। ध्यानेन चित्तं शुद्ध्यति इत्यपि भगवान् गीताशास्त्रे वदति। योगदर्शने प्रसिद्धानि यमनियमादीनि साधनानि अपि अन्तःकरणशुद्धिं जनयन्ति इति शङ्करभगवत्पादाः ब्रह्मसूत्रभाष्ये अङ्गीकुर्वन्ति। अन्यानि अपि बहुविधानि साधनानि सत्त्वशुद्धिकारणानि शास्त्रेषु श्रूयन्ते।

### पाठगतप्रश्नोत्तराणि-२

३. शास्त्रे बहुविधानि कर्माणि उपासनानि च विहितानि सन्ति। यदि वयम् एषां कर्मणाम् उपासनानाञ्च अनुष्ठानम् फलेच्छया एव कुर्मः तर्हि वयम् पुनः पुनः कामनानां वशीभूताः एव भवामः। प्रत्युत यदि फलेच्छाम् परित्यज्य वयं कर्मोपासनानुष्ठाने निरताः भवेम तर्हि अस्माकम् अन्तःकरणं शुद्धम् एकाग्रं च भवेत्।

४. विद्युद्दीपः प्रकाशकद्रव्येण पूर्णः अस्ति चेदपि तस्य बहिर्देशः धूल्यादिमालिन्ययुक्तः चेत् सः स्वस्य अन्तः निहितायाः दीप्तेः बहिः प्रकाशने असमर्थः भवति। एवमेव अन्तःकरणम्

प्रकाशनशीलेन सत्त्वगुणेन सहितं चेदपि रजसा तमसा च योगात् अशुद्धम् अस्ति इत्यतः स्वान्तर्निहितस्य ब्रह्मणः प्रकाशने असमर्थम् भवति। तस्मात् यदि अस्माभिः ब्रह्मविद्या इष्यते तर्हि प्रथमम् अन्तःकरणस्य शुद्धिः यत्नेन सम्पादनीया। अन्तःकरणे विद्यमानात् सत्त्वगुणात् रजोगुणः तमोगुणश्च दूरीकरणीयः इत्यर्थः।

५. सगुणब्रह्मविषयकं निर्गुणब्रह्मविषयकञ्चेति द्विविधम् उपासनम्।

६. मानसव्यापाररूपम् अस्ति उपासनम्। ध्यानम् भक्तिश्च मनसा एव क्रियते। तस्मात् ध्यानयोगस्य भक्तियोगस्य च मानसव्यापाररूपे उपासने अन्तर्भावः भवति।

**पाठगतप्रश्नोत्तराणि-३**

७. कर्मणां योगबुद्ध्या समनुष्ठानम् एव कर्मयोगः इति प्रोच्यते। अहं करोमि इति कर्तृत्वबुद्धिम् इदं फलम् मम भवतु इति फलाभिसन्धिं च विना स्वकर्मणां समनुष्ठानं कर्मयोगः इति कथ्यते।

८. अहं करोमि इति कर्तृत्वबुद्धिम् इदं फलम् मम भवतु इति फलाभिसन्धिं च विना या बुद्धिः निस्स्वार्थतायाम् अवतिष्ठति सा एव योगबुद्धिः। योगबुद्धिः कामक्रोधादिभिः कदापि न विचलति। योगबुद्धियुक्तः जनः सर्वाणि अपि कर्माणि यत्नेन करोति चेदपि कर्मफलानां सिद्धौ न तुष्यति, तेषाम् असिद्धौ च न खिद्यति। स समत्वेन सर्वम् पश्यति। अनया बुद्ध्या यदि वयं कर्माणि कुर्मः तर्हि अस्माकम् अन्तःकरणं शुद्धम् भविष्यति, क्रमेण साधनचतुष्टयञ्च सम्पत्स्यते।

९. कर्मयोगस्य अन्तःकरणशुद्धिरेव फलम्। कर्मयोगः महत् पुण्यकर्म वर्तते। निष्कामकर्मयोगेन जातेन पुण्येन चित्तस्य पापं नश्यति। रागद्वेषादिकम् अथवा कामक्रोधादिकम् अस्ति चित्तस्य पापम्। इदम् पापम् एव चित्तस्य मलम्। मलिनं चित्तं वेदान्तवाक्यैः बोधितस्य आत्मस्वरूपस्य सुष्ठु ग्रहणे समर्थं न भवति। यदा साधकः निस्सङ्गतया कर्माचरणे निष्ठां प्राप्नोति तदा पापानि विनश्यन्ति, चित्तं च शुद्ध्यति।

**पाठगतप्रश्नोत्तराणि-४**

१०. उपासनानि सगुणब्रह्मविषयमानसव्यापाररूपाणि शाण्डिल्यविद्यादीनि इति।

११. चित्तस्य वर्तनम् एव वृत्तिः इत्युच्यते। कदाचित् चित्तं कामरूपेण वर्तते। कदाचिच्च क्रोधरूपेण वर्तते। कदाचित् पुनः लोभरूपेण। यदा चक्षुरादीनि इन्द्रियाणि बाह्यपदार्थैः सम्बन्धम् प्राप्नुवन्ति तदा चित्तम् अथवा अन्तःकरणं कामादिवृत्तिं धत्ते। इष्टस्य कस्यचित् वस्तुनः दर्शनेन मनः कामरूपेण वर्तते। अनिष्टस्य कस्यचित् वस्तुनः दर्शनेन मनः क्रोधरूपेण वर्तते। एवञ्च कामक्राधादयः चित्तस्य वृत्तयः इत्युच्यन्ते।

१२. कामादिभिः वृत्तिभिः एव अन्तःकरणं विक्षिप्तम् भवति। तस्मात् इमाः वृत्तयः एव चित्तस्य विक्षेपाः।

१३. निर्मलम् एकाग्रञ्च चित्तं शुद्धम् इत्युच्यते। विक्षेपैः चित्तम् अनेकाग्रम् भवति। अनेकाग्रं चित्तं न सम्पूर्णतः शुद्धम्। तस्मात् चित्तशुद्ध्यै चित्तविक्षेपाः निरोद्धव्याः।

१४. ध्यानयोगाभ्यासः चित्तविक्षेपाणां नाशेन चित्तैकाग्रतायाः ततः चित्तशुद्धेश्च सम्पादनाय। विक्षेपाणां हेतवः भवन्ति संस्काराः। संस्कारेभ्यः विक्षेपाख्याः चित्तवृत्तयः पुनः पुनः जायन्ते। ध्यानाभ्यासेन चित्ते अवस्थितानां विक्षेपहेतूनां संस्काराणां ततः विक्षेपाणाञ्च क्रमशः नाशः सम्भवति। ततश्च चित्तम् एकाग्रं शुद्धञ्च भवति।

**पाठगतप्रश्नोत्तराणि-५**

१५. विषयवस्तुषु विरागः, ईश्वरे अनुरागश्च भक्तिः इति कथ्यते। भगवति परमम् प्रेम एव भक्तिरिति नारदभक्तिसूत्रे प्रोक्तम्।

१६. आर्तः, जिज्ञासुः, अर्थार्थी, ज्ञानी चेति चतुर्विधाः भक्ताः भगवद्गीतायाम् भगवता प्रोक्ताः।

१७. आत्मस्वरूपस्य निर्गुणस्य ब्रह्मणः स्वरूपानुसन्धानमेव निर्गुणब्रह्मविषयिणी भक्तिः। आत्मस्वरूपानुसन्धानरूपा भक्तिः क्रमशः आत्मस्वरूपज्ञानरूपेण परिणमते। निर्गुणब्रह्मणि पूर्वं यत्नेन कृता इयम् भक्तिः अभ्यासेन साधकस्य अन्तःकरणे दृढा भवति। सुदृढा इयम् भक्तिः निर्गुणब्रह्मविद्यारूपम् प्राप्य संसारहेतुभूतां निर्गुणब्रह्मविषयिणीम् अविद्यां नाशयति।

१८. सर्वात्मभूते परमे ब्रह्मणि उपासनायाः सौकर्यार्थं शास्त्रेण आचार्येण वा नामरूपादिकं कल्प्यते। तत् एव उपास्यम् ब्रह्म सगुणब्रह्म इति च प्रसिद्धं वेदान्तशास्त्रे। शास्त्रम् अवलम्ब्य जीवैः कृताभिः अन्तःकरणगताभिः भावनाभिः सर्वेषाम् आत्मस्वरूपम् यत् ब्रह्म तत् निर्गुणमपि सगुणम् भवति। अस्मिन् सगुणे ब्रह्मणि रामकृष्णगणेशदुर्गादिरूपे क्रियमाणम् प्रेम सगुणभक्तिरिति कथ्यते। सगुणभक्त्या सगुणब्रह्मणः कृपाम् प्राप्य भक्तः विशुद्धान्तःकरणः सन् ब्रह्मविद्याम् प्राप्नोति।

१९. "श्रवणं कीर्तनं विष्णोः स्मरणम् पादसेवनम्। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्॥" इति।

**पाठगतप्रश्नोत्तराणि-६**

२०. अहिंसा, सत्यम्, अस्तेयः, ब्रह्मचर्यम्, अपरिग्रहश्चेति यमाः।

२१. शौचम्, सन्तोषः, तपः, स्वाध्यायः, ईश्वरप्रणिधानञ्चेति नियमाः।

२२. विषयवस्तुभ्यः इन्द्रियाणाम् प्रत्याहरणम् प्रत्याहारः।

॥ इति त्रयोविंशः पाठः ॥

# २४

# अन्तरङ्गसाधनम्

## प्रस्तावना

मोक्षः एव जनिमतां प्राणिनां लक्ष्यम्। स च मोक्षः जीवब्रह्मणोः ऐक्यविज्ञानेन भवति। अद्वैतं ब्रह्मैव जीवरूपेण परिच्छिन्नतया प्रतिभाति। ब्रह्म हि नित्यशुद्धबुद्धमुक्तस्वरूपम्। एतादृशस्य ब्रह्मणः ज्ञानं न मलिनान्तकरणवता शक्यसम्भवम्। ब्रह्मैव आत्मा। अतः ब्रह्मज्ञानं वै आत्मस्वरूपज्ञानम्। आत्मस्वरूपज्ञानाय मनः एकाग्रं निर्मलं शान्तं शुद्धं च भवेत्। मनसः निर्मलत्वादिसाधनाय बहूनि साधनानि अद्वैतवेदान्ते उपदिष्टानि। तेषु कानिचित् बहिरङ्गसाधनानि, कानिचन अन्तरङ्गसाधनानि इति उच्यन्ते। बहिरङ्गसाधनानि वै कर्मयोग–ध्यानयोगादीनि साधनानि, उपासनानि च। तानि बहिरङ्गसाधनानि उपासनादीनि अद्वैततत्त्वज्ञानाय परम्परया कारणानि। न तानि साक्षात्साधनानि। यानि च अद्वैततत्त्वसाक्षात्काराय साक्षात्साधनानि तानि एव सहकारिसाधनानि इत्युच्यन्ते। सहकारिसाधनं वै साधनचतुष्टयम्। विवेकः, वैराग्यम्, शमादिषट्कम्, मुमुक्षुत्वं चेति चत्वारि साधनानि साधनचतुष्टयम् इति नाम्ना प्रथितानि। एभिः युक्तः एव साधकः वेदान्तवाक्यानां श्रवणादिकं कृत्वा तत्फलम् प्राप्नोति। अत्र पाठे साधनचतुष्टयं यथाशास्त्रं वर्ण्यते।

## उद्देश्यानि

अमुम् पाठम् पठित्वा भवान् –

- अद्वैतवेदान्तमते मोक्षस्य सहकारिसाधनानि कानि इति ज्ञातुम् प्रभवेत् ।
- ब्रह्मविद्यायाम् अधिकारी कः इति ज्ञातुम् प्रभवेत् ।
- साधनचतुष्टयं किम् इति ज्ञातुं शक्नुयात् ।
- श्रवण-मनन-निदिध्यासनानि ब्रह्मज्ञाने कथम् उपकुर्वन्ति इति ज्ञातुं शक्नुयात् ।
- साधनचतुष्टयसम्पन्नस्य नचिकेतसः कथां ज्ञातुं शक्नुयात् ।
- तात्पर्यग्राहकलिङ्गानि ज्ञातुं शक्नुयात्।
- तात्पर्यं वै किमिति ज्ञातुं शक्नुयात्।

## २४.१ मोक्षस्य सहकारिसाधनम्

मोक्षस्य परम्परासाधनैः कर्मयोगादिभिः चित्तशुद्धिः भवति। यस्य चित्तशुद्धिः अस्ति तस्यैव साधनचतुष्टयाख्यं मोक्षस्य सहकारिसाधनं सिद्ध्यति। तस्मात् ब्रह्मविद्यायाम् अधिकारं प्राप्तुकामेन जनेन

मोक्षस्य परम्परासाधनानां कर्मयोगादीनाम् अनुष्ठानम् प्रथमं कर्तव्यम् भवति। परम्परासाधनैः (बहिरङ्गसाधनैः) यदा क्रमशः अन्तःकरणं शुद्ध्यति तदा साधकेन साधनचतुष्टयस्य अभ्यासः करणीयः।

मोक्षस्य सहकारिसाधनम् इत्यनेन मोक्षम् प्रति साक्षात्साधनस्य ब्रह्मज्ञानस्य उत्पत्तौ यत् सहकारिसाधनम् तत् एव बोद्धव्यम्। वेदान्तशास्त्रे सर्वत्र साधनचतुष्टयम् इति नाम्ना मोक्षस्य सहकारिसाधनम् प्रसिद्धम्। साधनचतुष्टयम् इत्येनन चत्वारि साधनानि प्रसिद्धानि। नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षुत्वं चेति चत्वारि साधनानि साधनचतुष्टयम् इति नाम्ना वेदान्तशास्त्रे निगद्यन्ते।

साधनचतुष्टयं किमिति वेदान्तसारग्रन्थे सदानन्दयोगीन्द्रेण उच्यते -

"साधनानि नित्यानित्यवस्तुविवेक-इहामुत्रफलभोगविराग-शमादिषट्कसम्पत्ति-मुमुक्षुत्त्वानि"इति।

अर्थात् १. नित्यानित्यवस्तुविवेकः, २. इहामुत्रफलभोगविरागः, ३. शमादिषट्कसम्पत्तिः, ४. मुमुक्षुत्वं च चत्वारि साधनानि। इदानीम् एतेषां क्रमशः विवरणम् अधः क्रियते -

## २४.२ नित्यानित्यवस्तुविवेकः

चतुर्षु साधनेषु आदिमं साधनं तावत् नित्यानित्यवस्तुविवेकः। नित्यम् अनित्यं च वस्तु इति नित्यानित्यवस्तुनी, तयोः नित्यानित्यवस्तुनोः विवेकः नित्यानित्यवस्तुविवेकः। नित्यं वस्तु अनित्यं च वस्तु इति द्विविधं वस्तु विद्यते जगति। तयोः विवेकः विवेचनम्, किं नित्यं वस्तु किं च अनित्यं वस्तु इति विचारपूर्वकज्ञानम् एव नित्यानित्यवस्तुविवेकः। वेदान्तसारकारमते - "नित्यानित्यवस्तुविवेकस्तावत् ब्रह्मैव नित्यं वस्तु ततोऽन्यदखिलमनित्यमिति विवेचनम्" इति। ब्रह्म एव नित्यं वस्तु ततः अन्यत् अखिलं सर्वम् आकाशादिप्रपञ्चः अनित्यं वस्तु इति विचारपूर्वकं ज्ञानम्। नित्यं वस्तु किं भवति? यत् त्रिषु कालेषु अपि तिष्ठति तत् नित्यं वस्तु। अतीते काले अपि आसीत्, वर्तमानकाले अपि अस्ति, भविष्यत्काले अपि भविष्यति यत् तत् नित्यं वस्तु। तादृशम् एकं ब्रह्म एव विद्यते। ब्रह्म नित्यं वस्तु इत्यत्र प्रमाणम् - "नित्यं विभुं सर्वगतं सुसूक्ष्मम्" (मुण्डकोपनिषदि १/१/६) "आकाशवत् सर्वगतश्च नित्यः", "अजो नित्यः शाश्वतः" (कठोपनिषदि १/२/१८), "सत्यं ज्ञानम् अनन्तं ब्रह्म" (तैत्तिरीये २/१) इत्यादयः श्रुतयः। ब्रह्मभिन्नम् अन्यत् सर्वम् अपि अनित्यम्। तानि पूर्वं नासन्, इदानीं सन्ति, भविष्यत्काले अपि न स्थास्यन्ति। अतः तानि कालत्रये न तिष्ठन्ति। अतः तानि अनित्यवस्तूनि। ब्रह्मभिन्नानां सर्वेषाम् अनित्यत्वविषये "नेह नानास्ति किञ्चन" (४/४/१९) "अथ यदल्पं तन्मर्त्यम्" (छान्दोग्ये ७/२४/१) इत्यादिश्रुतयः प्रमाणभूताः। नित्यवस्तुनः अनित्यवस्तुनः पृथक्करणम् एव नित्यानित्यवस्तुविवेकः। विवेकचूडामणौ अपि उक्तम् -

**"ब्रह्म सत्यं जगन्मिथ्येत्येवंरूपो विनिश्चयः।**
**सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः।।"इति।**

"ब्रह्म सत्यं जगत् मिथ्या" - इत्येवंरूपः यः विनिश्चयः निर्धारणः, सः अयं नित्यानित्यवस्तुविवेकः समुदाहृतः कथितः उक्तः इत्यर्थः।

ननु नित्यानित्यवस्तुविवेकेन किम् सिद्ध्यति इति चेत् अस्माकं प्रकृतं यत् शुद्धबुद्धमुक्तस्वरूपं तद्धि नित्यम्। तेन स्वस्वरूपभूते नित्ये वस्तुनि एव प्रीतिः उत्पद्यते। अयं नित्यानित्यवस्तुविचारः वस्तुतः वेदान्तवाक्यानां श्रवणेन सिद्ध्यति। न केवलं नित्ये वस्तुनि प्रीतिः, अपि तु वेदान्तवाक्यविचारेण अनित्ये वस्तुनि द्वेषः उत्पद्यते। एतेन नित्यानित्यवस्तुविवेकः यदा सिद्धः भवति तदा एव द्वितीये साधने इहामुत्रफलभोगविरागरूपे यत्नः करणीयः।

## २४.३ इहामुत्रफलभोगविरागः

नित्यानित्यवस्तुविवेकरूपस्य प्रथमस्य साधनस्य फलरूपम् इदं साधनम् इहामुत्रफलभोगविरागः इति। इह अस्मिन् लोके अमुत्र स्वर्गलोके कर्मजन्यं यत् फलं प्राप्यते तस्य भोगः इहामुत्रफलभोगः, तस्मात् फलभोगात् विरागः विरक्तिः आसक्त्याः अभावः एव इहामुत्रफलभोगविरागः। इहामुत्रफलभोगविरागविषये वेदान्तसारे उक्तम् -

"ऐहिकानां स्रक्चन्दनवनितादिविषयभोगानाम् अनित्यत्ववत् आमुष्मिकाणाम् अपि अमृतादिविषयभोगानाम् अनित्यतया तेभ्यो नितरां विरतिः इहामुत्रफलभोगविरागः"इति।

इहलोके भव ऐहिकः। स्रक्, चन्दनं, वनिता, गृहं, क्षेत्रम् - इत्यादिविषयाः इहलोके भवाः अर्थात् इहलोके एव तिष्ठन्ति, अत एते विषया ऐहिकाः। एतेषां विषयाणां भोगेन एव जीवाः आत्मानं सुखिनः इति मन्यन्ते। परन्तु ऐहिकवस्तुभ्यः यत् सुखं प्राप्नुवन्ति जीवाः तत् अनित्यम्। यतो हि विषयाः अनित्याः। अतः ततः जन्यं सुखम् अपि अनित्यम्। एवम् एव आमुष्मिकाणां स्वर्गसुखानाम् अमृतादिविषयभोगानाम् अपि अनित्यत्वम्। तत्र प्रमाणम् -

"तद्यथेह कर्मजितो लोकः क्षीयते एवम् एव अमुत्र पुण्यजितो लोकः क्षीयते" (छा - १/८/१६) इत्यादयः श्रुतयः।

अर्थात् कर्मणा जितः पृथिवीलोकः भोगेन क्षीयते तथैव पुण्येन जितः लोकः स्वर्गलोकः अपि भोगेन क्षीयते। "क्षीणे पुण्ये मर्त्यलोकं विशन्ति"(गीता ९.२१) इति गीतावचनम् अपि प्रमाणम्। अतः लौकिकं सुखं तथा स्वर्गसुखम् उभयम् अपि अनित्यम्। यतो हि ते अनित्याः अतः तेभ्यः नितरां विरतिः अत्यन्ततया विमुखता एव इहामुत्रफलभोगविरागः। विवेकचूडामणौ अपि उक्तम् -

**"तद्वैराग्यं जुगुप्सा या दर्शनश्रवणादिभिः।**
**देहादिब्रह्मपर्यन्ते ह्यनित्ये भोगवस्तुनि।।" इति।** (२१)

स्वदेहात् आरभ्य ब्रह्मलोकपर्यन्ते भोग्यवस्तुनि दर्शनेन श्रवणेन वा या जुगुप्सा घृणाबोधः तत् एव वैराग्यम्। अर्थात् मनुष्यशरीरम् अनित्यम् इति सर्वे एव जानन्ति। पुण्यकर्मणा पुरुषः ब्रह्मलोकं प्राप्नोति। यद्यपि तत्र निवासः दीर्घकालपर्यन्तं भवति तथापि नित्यं तत्र निवासः न सम्भवति। ब्रह्मलोके प्राप्तस्य सुखस्य अवसानं भवति एव। कानिचन वस्तूनि अनित्यानि इति दृष्ट्वा एव ज्ञायते, कानिचन

वस्तूनि अनित्यानि इति आप्तजनमुखात् श्रुत्वा ज्ञायते। उभयप्रकारेण भोग्यवस्तुनः अनित्यत्वं ज्ञात्वा तस्मिन् या जुगुप्सा घृणाभावः तत् एव वैराग्यम् इति उच्यते।

एवम् अनित्ये वस्तुनि यदा वैराग्यम् उत्पद्यते तदा नित्यं वस्तु ज्ञातुं मनः आकुलितं भवति। तदैव साधकः साधनचतुष्टये तृतीयं साधनं साधितुं प्रारभते।

## २४.४ शमादिषट्कसम्पत्तिः

अधिकारी द्वितीयसाधनसम्पन्नः यदा भवति तदा तृतीयसाधनस्य मार्गः उन्मुक्तः भवति। तृतीयसाधनं भवति शमादिषट्सम्पत्तिः इति। शमादिषण्णां साधनानां सम्पत्तिः सम्प्राप्तिः इति शमादिषट्सम्पत्तिः। शमादयः हि शमः दमः उपरतिः तितिक्षा समाधानं श्रद्धा च। एतेषां सर्वेषां साधनानां प्राप्तिरेव शमादिषट्सम्पत्तिः। के तावत् शमादयः इति चेत् शमादीनां षण्णां वर्णनम् एकैकशः अधस्तात् क्रियते -

### २४.४.१ शमः

"शमस्तावत् श्रवणादिव्यतिरिक्तविषयेभ्यः मनसः निग्रहः" इति उक्तं वेदान्तसारे। वस्तुतः मनसः निग्रहः एव शमः। वेदान्ततत्त्वस्य श्रवण-मनन-निदिध्यासनेन एव तत्त्वज्ञानं जायते। येन वृत्तिविशेषेण आत्मविषयकश्रवणादिभिन्नविषयेभ्यः बलात् मनसः निग्रहः भवति सः शमः। जीवस्य चित्तम् अतिशयचपलम्। एकस्मिन् विषये दीर्घकालं यावत् न तिष्ठति। बुभुक्षोः भोजनं प्रति यथा अभिरुचिः भवति तथा एव वैराग्ययुक्तस्य पुरुषस्य मनः तत्त्वज्ञाने अभिरुचिसम्पन्नं सत् अपि पूर्वसंस्कारवशात् विक्षिप्तं भवति। तस्यां दशायां येन वृत्तिविशेषेण पार्थिवं सुखम् अनित्यं परिणामे दुःखजनकम् इति बलपूर्वकं विषयेभ्यः आकर्षति सः शमः। उच्यते च सुबोधिन्याम् -

"यथा तीव्रायां बुभुक्षायां भोजनाद् अन्यव्यापारो मनसे न रोचते, भोजने च विलम्बं न सहते, तथा स्रक्चन्दनादिविषयेषु अन्त्यन्तम् अरुचिः, तत्त्वज्ञानसाधनेषु श्रवणमननादिषु अत्यन्तम् अभिरुचिर्जायते यदा, तदा पूर्ववासनाबलात् श्रवणादिसाधनेभ्यः उड्डीय स्रक्चन्दनादिविषयेषु गम्यमानं मनः, येनान्तःकरणवृत्तिविशेषेण निगृह्यते, स वृत्तिविशेषः शम इत्यर्थः" इति।

विवेकचूडामणौ अपि उक्तम् -

**"विरज्य विषयव्राताद्दोषदृष्ट्या मुहुर्मुहुः।**
**स्वलक्ष्ये नियतावस्था मनसः शम उच्यते।।"इति (२२)**

मुहुर्मुहुः प्रतिक्षणं, दोषदृष्ट्या दोषदर्शनेन, विषयव्रातात् विषयसमूहात् विरज्य वैराग्यप्राप्त्या मनसः स्वलक्ष्ये ब्रह्मतत्त्वज्ञाने नियतावस्था निश्चलरूपेण अवस्थानं शमः उच्यते कथितो भवति इति श्लोकस्य अस्य अर्थः।

## २४.४.२ दमः

"दमो बाह्येन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम्" इति वेदान्तसारे उक्तम्। बाह्येन्द्रियाणि चक्षु-कर्ण-नासिका-जिह्वा-त्वगाख्यानि पञ्च। एतेषाम् इन्द्रियाणाम् मध्ये चक्षुषः रूपं प्रति, कर्णस्य शब्दं प्रति, नासिकायाः गन्धं प्रति, जिह्वायाः रसं प्रति, त्वचः च स्पर्शं प्रति स्वाभाविकतया प्रवृत्तिः दृश्यते। आत्मविषयक-श्रवणमननादिषु यदा मनसः प्रवृत्तिः भवति तदा बाह्येन्द्रियाणि स्वविषयं प्रति धावन्ति चेत् अन्तःकरणस्य येन वृत्तिविशेषेण इन्द्रियाणां स्वविषयं प्रति धावनं निराक्रियते सः दमः। अतः दमः वै बाह्येन्द्रियाणां निग्रहः। तस्मादुच्यते वेदान्तसारस्य टीकायां सुबोधिन्याम् - "ज्ञानसाधनश्रवणादिभ्यो विलक्षणेषु शब्दादिविषयेषु प्रवर्त्तमानानि श्रोत्रादीनि बाह्येन्द्रियाणि येन वृत्तिविशेषेण निवर्तन्ते स दम इत्यर्थः" इति। आदौ अन्तरिन्द्रियस्य निग्रहः कर्तव्यः। ततः बाह्येन्द्रियाणां निग्रहः। तस्मात् आदौ शमस्य निर्देशः ततः दमस्य निर्देशः। यदि मनः वशीभूतं भवति तर्हि चक्षुरादीनां निग्रहः सम्भवः। मनसः सङ्कल्पवशात् एव चक्षुरादयः रूपादिषु धाविताः भवन्ति। यदि कोऽपि पुरुषः कस्मिंश्चित् विषये मनसः नियोगं करोति तर्हि तस्य सम्मुखे सुरूपं तिष्ठति चेत् अपि न पश्यति, सुगीतं भवति चेत् अपि न शृणोति। अतः मनसः निग्रहः भवति चेत् बहिरिन्द्रियाणां स्वतः निग्रहः भवति। परन्तु संस्कारवशात् मनः विक्षिप्तं भवति, इन्द्रियाणि च स्वविषयं प्रति धावन्ति। तस्मात् पुनः पुनः यत्नः कर्तव्यः। विवेकचूडामणौ दमविषये उक्तम् -

**"विषयेभ्यः परावर्त्य स्थापनं स्वस्वगोलके।**
**उभयेषामिन्द्रियाणां स दमः परिकीर्तितः॥" इति (२३)**

उभयेषाम् इन्द्रियाणां ज्ञानेन्द्रियाणां कर्मेन्द्रियाणां च विषयेभ्यः स्वस्वविषयेभ्यः परावर्त्य विमुखीकृत्य स्वस्वगोलके स्वस्वस्थाने स्थापनं स्थिरीकृत्य निश्चलरूपेण रक्षणं, सः दमः परिकीर्तितः कथितः।

शमदमवान् पुरुषः एव स्थितप्रज्ञः इति भगवान् श्रीकृष्णः अपि गीतायाम् उक्तवान् -

**"यदा संहरते चायं कुर्मोऽङ्गानीव सर्वशः।**
**इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता॥" इति (२/५८)**

यदा अयं कुर्मः अङ्गानि इव सर्वशः इन्द्रियाणि इन्द्रियार्थेभ्यः संहरते तस्य प्रज्ञा प्रतिष्ठिता भवति इति अन्वयः। अर्थात् इन्द्रियाणि सर्वदा अपि शब्दादिषु विषयेषु प्रवृत्तानि भवन्ति। कूर्मः यथा भयात् स्वानि अङ्गानि संकोचयति तथा यदा अयं ज्ञाननिष्ठायां प्रवृत्तः जनः सर्वाणि इन्द्रियाणि शब्दादिभ्यः संकोचयति तदा तस्य प्रज्ञा प्रतिष्ठिता भवति। स च स्थितप्रज्ञः भवति।

## पाठगतप्रश्नाः-१

२३. साधनचतुष्टयम् किम्?

२४. अद्वैतवेदान्तमते नित्यानि वस्तूनि कानि?

२५. ब्रह्मणः नित्यत्वे श्रुतिप्रमाणं किम्?

२६. विवेकचूडामणौ नित्यानित्यवस्तुविवेकविषये किम् उक्तम्?

२७. दमो वै किम्?

a) मनसः निग्रहः b) बहिरिन्द्रियाणां निग्रहः c) अन्तरिन्द्रियाणां निग्रहः

२८. शमः वै किम्?

२९. शमादयः के?

३०. स्वर्गादीनाम् अनित्यत्वे श्रुतिप्रमाणं किम्?

## २४.४.३ उपरतिः

वेदान्तसारे उपरतेः लक्षणद्वयम् उक्तम् - “निवर्तितानाम् एतेषां तद्व्यतिरिक्तविषयेभ्यः उपरमणम् उपरतिः” अथवा “विहितानां कर्मणां विधिना परित्यागः” इति।

मनसः तथा बहिरिन्द्रियाणां निग्रहणेन एव तत्त्वज्ञानस्य मार्गः उन्मुक्तः न भवति। पूर्वतनवासनावशात् तानि इन्द्रियाणि मनश्च पुनः चञ्चलानि भवन्ति। अतः निवर्तितानाम् इन्द्रियाणाम् मनसः च श्रवणादिसाधनव्यतिरिक्तविषयेषु शब्दादिषु प्रवृत्तिः भवति। तदा येन वृत्तिविशेषेण तेषां निग्रहः क्रियते सा उपरतिः। अर्थात् श्रवणादिव्यतिरिक्तविषयेभ्यः पुनः पुनः दोषदर्शनेन उपरमणम् निवृत्तिः एव उपरतिः। तथाहि उच्यते सुबोधिन्याम् - "निगृहीतानाम् एतेषां बाह्येन्द्रियाणां श्रवणादिसाधनव्यतिरिक्तेषु शब्दादिविषयेषु यथा तानीन्द्रियाणि सर्वथा न गच्छन्ति, तथा तेषां निग्रहो येन वृत्तिविशेषेण क्रियते, सोपरतिः इत्यर्थः" इति। उपरतेः लक्षणान्तरम् उच्यते वेदान्तसारकारेण सदानन्दयोगीन्द्रेण - “विहितानां कर्मणां विधिना परित्यागः” इति। शास्त्रविहितानां नित्यनैमित्तिकप्रायश्चित्तानां विधिपूर्वकं सन्न्यासाश्रमस्वीकारेण परित्यागः एव उपरतिः। अर्थात् अहं कर्ता नास्मि इति भावनया सर्वकर्मत्यागः एव उपरतिः। विवेकचूडामणौ उक्तम् - “बाह्यानालम्बनं वृत्तेरेषोपरतिरुत्तमा।” इति। वृत्तेः मनसः विषयप्रकाशकशक्तेः, बाह्यानालम्बनं बाह्यानात्मवस्त्वाकारेण अपरिणतभवनम् एव उत्तमा उपरतिः।

## २४.४.४ तितिक्षा

“तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता” इति उक्तम्। अर्थात् शीतोष्णप्रभृति-विपरीतविषयान् तथा ततः उत्पन्नसुखदुःखादीनां सहनम्। सर्वे जीवाः सुखेन आनन्दम् अनुभवन्ति। आनन्देन प्रमादः न भवति। परन्तु दुःखस्य सहनं सर्वे कर्तुं न शक्नुवन्ति। अतः दुःखकारणात् प्रमादं कुर्वन्ति बहवः। परन्तु यः तितिक्षाम् अभ्यस्यति तस्य समीपे सुखं दुःखम् उभयम् अपि समानम्। सः सुखेन अत्यधिकम् आनन्दम् न अनुभवति, दुःखेन अपि दुःखितः न भवति। अतः सः अप्रमादः धैर्यवान् भूत्वा साधनातः अविचलितः भवति। विवेकचूडामणौ उक्तम् -

**“सहनं सर्वदुःखानामप्रतीकारपूर्वकम्।**

**चिन्ताविलापरहितं सा तितिक्षा निगद्यते।।"इति।**

सर्वदुःखानां सर्वविधदुःखानां चिन्ताविलापरहितं चिन्तां विलापं च त्यक्त्वा अप्रतीकारपूर्वकम् प्रतीकारं न कृत्वा सहनं स्वीकारः एव तितिक्षा निगद्यते उच्यते इत्यर्थः।

गीतायाम् अपि भगवता वासुदेवेन उच्यते -

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।**
**वीतरागभयक्रोधस्थितधीर्मुनिरुच्यते।। इति।**

वस्तुतः शमदमोपरतिभ्यः बहिर्विषयेभ्यः निवृत्तिः भवति। तितिक्षायां तु अन्तर्विषयेभ्यः चित्तस्य निवर्तनं भवति।

## २४.४.५ श्रद्धा

केवलेन श्रवणादिना तत्त्वसाक्षात्कारः न भवति। तदपि श्रद्धापूर्वकं कर्तव्यम् एव। श्रद्धा वै का इति चेत् उच्यते - "गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा" इति। गुरुवचनेषु तथा गुरूपदिष्टशास्त्रवचनेषु दृढतरनिश्चयः एव श्रद्धा। आत्मतत्त्वजिज्ञासोः श्रद्धा एव मेरुदण्डः। श्रद्धा न तिष्ठति चेत् शतशः उपदिष्टः अपि अर्थस्य अवधारणं न भविष्यति। अतः आत्मजिज्ञासोः श्रद्धायाः अवलम्बनम् अनिवार्यम्। गीतायाम् गीयते भगवता "श्रद्धावान् लभते ज्ञानम्" इति। भगवता शङ्कराचार्येण श्रद्धाविषये विवेकचूडामणौ उक्तम् -

**"शास्त्रस्य गुरुवाक्यस्य सत्यबुद्ध्यवधारणम्।**
**सा श्रद्धा कथिता सद्भिर्यया वस्तूपलभ्यते।।"इति।**

गुरुवाक्यस्य गुरुणा उपदिष्टस्य वाक्यस्य, तथा शास्त्रवाक्यस्य वेदान्तवाक्यस्य, सत्यबुद्ध्यवधारणं सत्यतया ग्रहणं, यया येन निश्चयेन वस्तूपलभ्यते आत्मनः उपलब्धिः भवति सा श्रद्धा कथिता सर्वैः उक्ता।

## २४.४.६ समाधानम्

"निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्।" अर्थात् विषयेभ्यः प्रत्याहितस्य चित्तस्य आत्मनः विषये श्रवण-मनन-निदिध्यासने तथा तस्य अनुगुणविषये गुरुशुश्रुषादौ अवस्थानम् एव समाधानम्। अस्याम् दशायाम् एवं किमपि न कर्तव्यं येन आत्मविषयस्मृतिधारायाः विच्छेदो भवति। आत्मविषयकप्रत्ययप्रवाहस्य उत्पादनम् एव समाधिः, तदेव समाधानम्। विवेकचूडामणौ उक्तम् -

**"सम्यगास्थापनं बुद्धेः शुद्धे ब्रह्मणि सर्वथा।**
**तत्समाधानमित्युक्तं न तु चित्तस्य लालनम्।।"इति।**

शुद्धे निर्गुणे ब्रह्मणि ब्रह्मविषयकतत्त्वज्ञाने बुद्धेः चित्तस्य सम्यक् यथार्थतया आस्थापनं स्थिरीकरणम् एव समाधानम् इत्युक्तम्। तु किन्तु चित्तस्य लालनम् कौतुहलात् वेदान्ततत्त्वस्य आलोचनेन मनसः तृप्तिलाभः न समाधानम् इत्यर्थः। समाधिं विना आत्मसाक्षात्कारः न भवति।

एवं शमादिषट्कसम्पत्तिः सहकारिसाधनेषु अन्यतमा। साधनचतुष्टयस्य सिद्धौ आत्मज्ञानम् अनायासतया जायते साधकस्य। एवं साधनचतुष्टयसम्पन्नः अधिकारी तत्त्वमस्यादिवेदान्तवाक्यश्रवणात् अद्वैतं ब्रह्मात्मज्ञानम् आप्नोति।

## २४.५ मुमुक्षुत्वम्

मुमुक्षुत्वस्य अर्थः मोक्षे इच्छा। आत्मज्ञानप्राप्तये एतत् एव प्रधानं साधनम्। यदि पुरुषस्य मोक्षप्राप्तये इच्छा न भवति तर्हि मोक्षोपायस्य अन्वेषणं न करोति। तस्मात् आत्मदर्शनम् अपि न करोति। आत्मदर्शनं मोक्षस्य मार्गः इति वेदान्ततत्त्व-श्रवण-मनन-निदिध्यासनम् आत्मदर्शने कारणम् इति बोद्धुं न शक्नोति। अतः वेदान्ते तस्य प्रवृत्तिः एव न स्यात्। तेन वेदान्तैकवेद्यस्य आत्मनः ज्ञानम् अपि तस्य न भवति। अतः अधिकारिणः मोक्षेच्छा अवश्यं भवितव्या। विवेकचूडामणौ शङ्कराचार्येण उक्तम् -

**"अहंकारादिदेहान्तान् बन्धानज्ञानकल्पितान्।**
**स्वस्वरूपावबोधेन मोक्तुमिच्छा मुमुक्षुता।।"इति।**

अहंकारादिदेहान्तान् सूक्ष्मात् अहंकारात् आरभ्य स्थूलदेहपर्यन्तम्, अज्ञानकल्पितान् अज्ञानात् उत्पन्नान् बन्धान् बन्धसहमूहान् स्वस्वरूपावबोधेन आत्मज्ञानेन मोक्तुम् इच्छा एव मुमुक्षुता इत्यर्थः।

एवं साधनचतुष्टयं निरूपितम्। यावत् नित्यानित्यवस्तुविवेकः न भवति तावत् अनित्ये वस्तुनि वैराग्यं न उत्पद्यते। वैराग्यं विना शमादीनाम् अपि आचरणं न सम्भवति। शमादीनाम् अभावे मोक्षविषयिणी इच्छा एव न सम्भवति। मोक्षे इच्छां विना ब्रह्मजिज्ञासा अपि न स्यात्। तस्मात् आदौ नित्यानित्यवस्तुविवेकः ततः इहामुत्रफलभोगविरागः ततः शमादिषट्कसम्पत्तिः ततः मुमुक्षुत्वम् इति क्रमेण तेषामुल्लेखः।

एवं साधनचतुष्टयसम्पन्न एव प्रमाता वेदान्तविद्यायाम् अधिकारी भवति। अत्र श्रुतेः प्रमाणम् अपि प्राप्यते -

"**शान्तो दान्त उपरतिस्तितिक्षुः समाहितो भूत्वाऽत्मन्येवात्मानं पश्यति**"इति।

अर्थात् यस्य मनः शान्तम्, इन्द्रियाणि न चञ्चलानि, यः सन्न्यासदीक्षां प्राप्तवान्, यः सुखदुःखेषु समानमनाः तिष्ठति सः समाहितः भूत्वा एकाग्रभावं प्राप्य आत्मनि एव आत्मानं पश्यति।

अस्य श्रुतेः समर्थनं करोति उपदेशसाहस्रीगतं वाक्यम् इदम् -

**"प्रशान्तचित्ताय जितेन्द्रियाय च**
**प्रहीणदोषाय यथोक्तकारिणे।**
**गुणान्विताय अनुगताय सर्वदा**
**प्रदेयमेतत् सततं मुमुक्षवे।।"** (३२४,१६/१२)

प्रशान्तचित्ताय यस्य मनः शान्तं तस्मै, जितेन्द्रियाय यस्य इन्द्रियाणि चञ्चलानि न भवन्ति, प्रहीणदोषाय यः त्याज्यकर्म परित्यज्य नित्यादिकर्मणाम् अनुष्ठानं करोति तस्मै, गुणान्विताय विवेकवैराग्यादिगुणविशिष्टाय, यथोक्तकारिणे अनुगताय सर्वदा यः गुरोः तथा शास्त्रवचनं निर्देशानुसारं



पालयति सर्वदा आचार्यस्य अनुगतः एव तिष्ठति तस्मै, सततं मुमुक्षवे मोक्षप्राप्तये यस्य अदम्यः उत्साहः तस्मै एतत् ब्रह्मविद्या प्रदेयं दातव्यम् इति।

## २४.६ साधनचतुष्टयम् एव ब्रह्मविद्याधिकारः

पूर्वम् अस्माभिः वेदान्तशास्त्रस्य अनुबन्धचतुष्टये अधिकारी कः भवति इति आलोचितम् । यस्य साधनचतुष्टयं विद्यते स एव जनः वेदान्तशास्त्रे अधिकारी भवति। स वेदान्तशास्त्रेण बोधितस्य विषयस्य अवगमने समर्थः भवति इत्यर्थः। आत्मस्वरूपम् ब्रह्म एव इति वेदान्तशास्त्रेण बोध्यते। इदम् आत्मब्रह्मणोः ऐक्यम् अथवा जीवब्रह्मणोः ऐक्यं वेदान्तशास्त्रस्य विषयः भवति। इमं विषयं वेदान्ताध्ययनेन साधनचतुष्टयसम्पन्नः एव नरः अवगच्छति, न अन्यः। तस्मात् वेदान्तशास्त्रस्य अधिकारी साधनचतुष्टयसम्पन्नः एव इति ज्ञायते।

यः नद्याः परं पारं गन्तुमिच्छति स नौकाम् आरुह्य स्फ्यां चालयित्वा तत्र गन्तुं शक्नोति । किन्तु हस्ते स्फ्या नास्ति चेत् नौकायाः आरोहणं कृत्वापि सः तया नौकया परपारम् प्राप्तुं समर्थः न भवति । यस्य हस्ते स्फ्या अस्ति स नौकाम् आरुह्य सुखेन स्फ्यां चालयन् नद्याः परम् पारं गच्छति। एवमेव संसारस्य पारम् मोक्षाख्यं यः गन्तुम् इच्छति स वेदान्तवाक्यानां श्रवणादिरूपेण उपायेन तत्र गन्तुं शक्नोति। किन्तु यस्य साधनचतुष्टयं नास्ति स श्रवणादिकं कृत्वा अपि आत्मस्वरूपम् ब्रह्म ज्ञातुं समर्थः न भवति। साधनचतुष्टयसम्पन्नस्तु ब्रह्मबोधकानि वेदान्तवाक्यानि श्रुत्वा मत्वा निदिध्याय च ब्रह्मविद्याम् अवश्यं लभते, जननमरणरूपात् संसारात् मुक्तश्च भवति। तस्मात् स एव नरः ब्रह्मविद्याधिकारी । स एव ब्रह्मविद्यायाः अन्तरङ्गसाधनानि उपनिषद्वाक्यश्रवणादीनि कर्तुं योग्यः भवति इत्यर्थः। ब्रह्मविद्याधिकारी अद्वैतशास्त्रग्रन्थेषु क्वचित् "मोक्षे अधिकारी", "वेदान्तश्रवणे अधिकारी", "वेदान्ते अधिकारी" इति च निर्दिश्यते ।

साधनचतुष्टयसम्पन्नस्य ब्रह्मविद्याधिकारिणः विषये विवेकचूडामणौ शङ्करभगवत्पादाः प्राहुः –

**विवेकिनो विरक्तस्य शमादिगुणशालिनः।**
**मुमुक्षोरेव हि ब्रह्मजिज्ञासायोग्यता मता ॥** (विवेकचूडामणिः, श्लोकः १७) इति ।

**अन्वयः** –विवेकिनः विरक्तस्य शमादिगुणशालिनः मुमुक्षोः एव हि ब्रह्मजिज्ञासायोग्यता मता ।

**तात्पर्यम्** – यः विवेकी विरक्तः शमदमादिगुणसहितः मुमुक्षुः च भवति तस्य एव ब्रह्मजिज्ञासायां योग्यता अस्ति इति शास्त्रस्य आचार्याणां च मतम् । ब्रह्मजिज्ञासा इत्यस्य अत्र ब्रह्मविचारः इत्यर्थः। श्रवणम् मननं निदिध्यासनं चेति त्रिभिः उपायैः उपनिषद्वाक्यानि समाश्रित्य ब्रह्म कीदृशम् इति विचारः क्रियते। तस्मात् ब्रह्मजिज्ञासायां योग्यता इत्यस्य श्रवणादिषु योग्यता इत्यर्थः। विवेकादीनि साधनानि विना ब्रह्मविचारः फलप्रदः न भवति। ब्रह्मविचारस्य ब्रह्मविद्या एव फलम्। विवेकादिसाधनैः सम्पन्नः एव जनः श्रवणादिना तत् फलम् प्राप्तुं योग्यः। तस्मात् साधनचतुष्टयसम्पन्नस्य एव ब्रह्मजिज्ञासायोग्यता अभिमता ।

## २४.७ साधनचतुष्टयसम्पन्नः नचिकेताः

कठोपनिषदि साधनचतुष्टयसम्पन्नस्य नचिकेतसः कथा श्रूयते ।

वाजश्रवसस्य पुत्रः आसीत् बालकः नचिकेताः। एकदा वाजश्रवसः यागं कृतवान्। यागान्ते दक्षिणारूपेण वृद्धाः दुग्धहीनाः गाः दत्तवान्। तत् दृष्ट्वा नचिकेताः शास्त्रविधानानि स्मरन् चिन्तितवान् – ईदृश्या दक्षिणया पिता स्वेन कृतस्य यागस्य इष्टं फलं न प्राप्नुयात्, अपि तु अनिष्टं फलं प्राप्नुयात्। अतः तस्य पुत्रेण मया एव अयं यागः सफलः कर्तव्यः इति। एवम् मत्वा नचिकेताः पितुः समीपं गत्वा हे पितः, कस्मै मां दक्षिणारूपेण त्वं दास्यसि इति अपृच्छत्। पुनः पुनः एवं पृष्टे सति कुपितः वाजश्रवसः त्वाम् मृत्यवे दास्यामि इति अवदत्। उक्त्वा वाजश्रवसः किमिदम् मया उक्तमिति चिन्तयन् दुःखी अभवत्। किन्तु नचिकेताः पितुः वचनम् मिथ्या मा भूत् इति मत्वा मृत्युदेवस्य यमस्य गृहं गतवान्। नचिकेतसि तत्र गते यमः अन्यत्र क्वचित् आसीत्। यमलोके कोऽपि नचिकेतसे अतिथिसत्कारं न अकरोत्। तथापि अक्षुब्धः सन् नचिकेताः रात्रित्रयं यमालये अवसत्। यमः स्वगृहम् प्रत्यागत्य सर्वं श्रुत्वा नचिकेतसम् अर्घ्यपाद्यादिभिः पूजयित्वा अवदत् – हे ब्रह्मन्, काले पूजादिकं तुभ्यम् मया न कृतम्। क्षमस्व। भोजनादिकं विना त्वया उषितं रात्रित्रयम् प्रति अहं वरत्रयं तुभ्यं दास्यामि। यथेच्छम् पृच्छ इति। नचिकेताः प्रथमवररूपेण पितुः सौख्यम् इष्टवान्। यमः तमेव वरं तस्मै प्रादात्। द्वितीयवररूपेण नचिकेताः स्वर्गप्राप्तेः उपायभूतां विद्याम् अकामयत। यमः तमपि वरं नचिकेतसे अयच्छत्। तृतीयवररूपेण च आत्मस्वरूपं ज्ञातुम् इष्टवान्। अस्य वरस्य प्रदानं तु यमः न अनुमतवान्। साधनचतुष्टयसम्पन्नाय अधिकारिणे एव आत्मस्वरूपम् उपदेष्टव्यम्, अन्यथा स उपदेशः फलदायी न भविष्यति इति यमः जानाति स्म। तस्मात् नचिकेतसः साधनचतुष्टयम् अस्ति वा इति परीक्षितुं निश्चितवान् मृत्युदेवः यमः।

आत्मस्वरूपज्ञानस्य स्थाने अन्यं कमपि वरम् प्रष्टुं यमः नचिकेतसम् अवोचत्। आत्मज्ञानम् एकं विहाय प्रपञ्चे यत्किमपि यथेच्छम् तुभ्यम् प्रददामि, पृच्छ इति यमः तम् बालकम् प्रचोदितवान्। सेविकाः, रथाः, हस्ती, हिरण्यम्, वित्तम्, दीर्घं जीवनम् इत्यादिकं यद्यद् इच्छसि तत् सर्वं दास्यामि इति यमः यदा उक्तवान् तदा नचिकेताः अवदत् – अनित्यं खलु इदम् अखिलं वस्तु। अनित्यमिदं जगत्। अत्र जगति जीवनमपि दीर्घं चेदपि अनित्यमेव भविष्यति। अहम् अनित्यं किमपि न वाञ्छामि, अपि तु नित्यम् आत्मज्ञानमेव मम अभीष्टम्। तस्मात् तदेव मह्यं देहि इति। इदं श्रुत्वा यमः नचिकेतसः नित्यानित्यवस्तुविवेकः अस्ति इति ज्ञातवान्।

रथः हस्ती हिरण्यं दीर्घजीविका इत्यादीन् ऐहिकान् भोगान्, अप्सरःप्रभृतीन् आमुष्मिकान् भोगान् च दास्यामि इति यदा यमः प्रलोभनं कृतवान् तदा नचिकेताः दृढम् अवोचत् – एषु भोगेषु मम रतिः नास्त्येव। एतान् अहं नैव वृणोमि। मम वरणीयः वरः आत्मज्ञानम् एव इति। अनेन नचिकेतसः इहामुत्रार्थफलभोगविरागोऽपि अस्ति इति यमेन अवगतम्।

नचिकेतसः शमादिसम्पत्तिरपि इतः एव अवगतं यमेन। मनसः इन्द्रियाणाञ्च निग्रहः खलु शमदमौ। तौ नचिकेतसि नितरां विद्येते इत्यतः एव स यमेन प्रदर्शितैः विषयोपभोगैः प्रलोभितः न जातः। तितिक्षा अपि नचिकेतसि अस्ति। शीतोष्ण-सुखदुःख-मानापमानादिरूपं यत् द्वन्द्वं तस्य विषये सहिष्णुता

एव तितिक्षा इति उच्यते। नचिकेताः यमगृहम् प्रति यदा आगतवान् तदा सर्वैः उपेक्षितः एव सन् रात्रित्रयम् तत्र उषितवान्। केनापि तस्मै भोजनमपि न प्रदत्तम्, सम्मानस्य कथा तु दूरे। तथापि यदा यमः अर्घ्यपाद्यादिभिः तं पूजितवान् तदा क्षोभं विनैव अप्रतीकारपूर्वकं तत् स्वीकृतवान् नचिकेताः। नचिकेताः तितिक्षवान् इति ज्ञातुं यमस्य इतः अधिकं किम् प्रमाणम् आवश्यकम्। श्रद्धा अपि तस्य बालकस्य स्फुटा। शास्त्रे गुरुवाक्ये च विश्वासः अथवा आस्तिक्यबुद्धिरेव श्रद्धा इत्युच्यते। यागे निष्फलगवां दानं कुर्वन्तम् पितरं दृष्ट्वा शास्त्रोपदेशं स्मरति नचिकेताः। किञ्च शास्त्रे बोधितम् पुत्रधर्मं स्मृत्वा स्वसमर्पणेन अपि पितुः यागं सफलं कर्तुं स यतते। अपि च आत्मस्वरूपस्य उपदेशाय यमः इव समर्थः अन्यः आचार्यः सुखेन न लभ्यते इत्यपि नचिकेताः वदति। इतश्च तस्य गुरोः यमस्य वचने श्रद्धा अस्तीति अवगम्यते। एवञ्च शमादिषु केचन गुणाः नचिकेतसि स्पष्टं दृश्यन्ते इत्यतः अन्येऽपि गुणाः तस्मिन् विद्यन्ते इति ज्ञातुं शक्यते।

मुमुक्षुत्वम् अथवा मोक्षेच्छा अपि नचिकेतसः विद्यते। अत एव खलु स निरवधिप्रलोभनानां सम्मुखेऽपि मोक्षस्य उपायभूतम् आत्मज्ञानमेव केवलम् पुनः पुनः प्रार्थयति।

एवं नचिकेताः साधनचतुष्टयसम्पन्नः इति यमः परीक्षणेन निश्चितवान्। ततः स मोक्षस्य अन्तरङ्गसाधनेषु श्रवणमनननिदिध्यासनेषु अधिकारी इति ज्ञात्वा यमः तस्मै आत्मस्वरूपम् उपादिशत्। आचार्यस्य यमस्य मुखात् आत्मस्वरूपम् ब्रह्म श्रुत्वा च नचिकेताः ब्रह्मज्ञानी अभवत्।

## पाठगतप्रश्नाः-२

३१. उपरतिः वै का?

३२. तितिक्षा वै का?

३३. श्रद्धा वै का?

३४. समाधानं वै किम्?

३५. मुमुक्षुत्वं वै किम्?

३६. साधनचतुष्टयसम्पन्नः एव वेदान्तविद्यायाम् अधिकारी भवति इत्यत्र श्रुतिप्रमाणं किम्?

३७. नचिकेताः कस्य पुत्रः आसीत्?

a) अग्नेः b) वाजश्रवसस्य c) यमस्य d) याज्ञवल्क्यस्य

## २४.८ श्रवण-मनन-निदिध्यासनानि

"आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (बृह.उ.२.२.४) इति मन्त्रेण उपनिषदि आत्मनः श्रवणं मननं निदिध्यासनं च उपदिष्टम्। आत्मसाक्षात्कारं प्रति श्रवण–मनन–निदिध्यासनानि साक्षात्कारणानि इति कारणात् प्रसङ्गे अस्मिन् श्रवणमनननिदिध्यासनानि

आलोचनीयानि। यावत् स्वस्वरूपचैतन्यसाक्षात्कारः न भवति तावत् श्रवणमनननिदिध्यासनानि अनुष्ठेयानि। तस्मात् उच्यते वेदान्तसारे – "स्वस्वरूपचैतन्यसाक्षात्कारपर्यन्तं श्रवण–मनन–निदिध्यासन–समाध्यनुष्ठानस्य अपेक्षितत्वात्" इति। "आवृत्तिरसकृदुपदेशात्" (४.१.१) इति ब्रह्मसूत्रे अपि सूत्रकारेण बादरायणेण श्रवणादीनां पुनः पुनः अनुष्ठानं कर्तव्यम् इति प्रतिपाद्यते। भाष्यकारेण शङ्करभगवत्पादेनापि निगद्यते – "दर्शनपर्यवसानानि हि श्रवणादीनि आवर्त्यमानानि दृष्टार्थानि भवन्ति, यथा अवघातादीनि तण्डुलादिनिष्पत्तिपर्यवसानानि, तद्वत्" इति। अस्यार्थः हि – यथा पुनः पुनः अवघातेन धान्येभ्यः तण्डुलानि निष्पद्यन्ते, यावत् न तण्डुलनिष्पत्तिः तावत् अवघातः कर्तव्यः इति तथा एव यावत् तत्त्वसाक्षात्कारः न भवति तावत् श्रवणादीनां पुनः पुनः अभ्यासः कर्तव्यः इति।

## २४.८.१ श्रवणम्

धर्मराजाध्वरीन्द्रविरचिते वेदान्तपरिभाषाभिधेये अद्वैतवेदान्तप्रकरणग्रन्थे अपि ब्रह्मसाक्षात्कारहेतुत्वेन श्रवणमनननिदिध्यासनानि निगदितानि। तत्र श्रवणस्य विषये उच्यते - "श्रवणं नाम वेदान्तानाम् अद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया" इति। श्रवणं वै न केवलं कर्णाभ्यां वेदान्तवाक्यानां श्रवणम्, अपि तु अशेषाणि वेदान्तवाक्यानि श्रुत्वा तेषां सर्वेषां वेदान्तवाक्यानाम् तात्पर्यम् अद्वैते ब्रह्मणि एव इति निश्चयः। वेदान्तसारे अपि श्रवणविषये उच्यते - "श्रवणं नाम षड्विधलिङ्गैः अशेषवेदान्तानाम् अद्वितीयवस्तुनि तात्पर्यावधारणम्" इति।

### तात्पर्यशब्दार्थः

ननु किं वै तात्पर्यनिर्णायकलिङ्गम्? लीनं गमयतीति लिङ्गम्, तात्पर्यनिर्णयाय लिङ्गम् इति तात्पर्यनिर्णायकलिङ्गम्। ननु किं वै तात्पर्यम्? तत् अर्थः, स परो यस्य स तत्पर इति बहुव्रीहिः, अर्थपर इत्यर्थः। तस्य भावः तात्पर्यम् इति भावे ष्यञ्प्रत्ययः। शब्दः वाक्यं वा यदर्थपरं तत्प्रतीतिजननयोग्यत्वम् एव तात्पर्यम् इति व्युत्पत्तिलब्धः अर्थः। अद्वैतमते अद्वितीये ब्रह्मणि एव अशेषवेदान्तानां तात्पर्यम्। आकाङ्क्षा इव तात्पर्यम् अपि शाब्दबोधं प्रति सहकारिकारणम्। नैयायिकमते वक्तुः इच्छाविशेष एव तात्पर्यशब्दार्थः। लोके अभिप्रेतम् अर्थं बोधयितुं शब्दो वाक्यं वा प्रयुज्यते। तस्मात् शब्दाद् वाक्याद् वा ईदृशस्य अर्थस्य प्रतीतिः भवतु इति वक्तुः या इच्छा सैव तात्पर्यशब्दार्थः - "वक्तुरिच्छा तु तात्पर्यं परिकीर्तितम्" (अन्नम्भट्टस्य दीपिकाटीका ) इति। परन्तु तथा लक्षणे सति वेदस्य पुरुषकर्तृकत्वाभावाद् वेदेषु अव्याप्तिः, तस्माद् वैयाकरणैः ईश्वरेच्छा तात्पर्यत्वेन निगदिता। तेषां मते - एतद्वाक्यम् एतत्पदं वा एतदर्थबोधाय उच्चारणीयम् इति ईश्वरेच्छा तात्पर्यम् इति तात्पर्यस्वरूपम्। अतः सर्वज्ञेश्वरप्रणीतत्वात् नास्ति अत्र अतिव्याप्तिशङ्का। यत्र तु एकस्य एव शब्दस्य बहवः अर्थाः, तत्र वक्तुः इच्छा एव तात्पर्यम् इति तैः अपि अङ्गीक्रियते। वेदान्तमते तु - तत्प्रतीतिजननयोग्यत्वम् एव तात्पर्यम्। इष्टस्य अर्थस्य प्रतीतिजननसामर्थ्यम् एव तात्पर्यम् इति तस्यार्थः। शब्दस्य तादृशसामर्थ्यवशाद् एव भोजनप्रकरणे 'सैन्धवम् आनय' इति सैन्धवशब्दः लवणं बोधयति। ननु सैन्धवशब्दस्य अश्वबोधनसामर्थ्यसत्त्वे अपि कथं स लवणम् एव बोधयति इति चेत् - भोजनप्रकरणे सैन्धवशब्दात् अश्वार्थप्रतीतिः न भवतु इति

इच्छावशात् अश्वार्थप्रतीतियोग्यतासत्त्वे अपि अश्वः न प्रतीयते। ननु एतेन इच्छा एव तात्पर्यत्वेन अभिहिता इति चेत् न, तदितरप्रतीतिजननेच्छया अनुच्चरितत्वे सति तत्प्रतीतिजननयोग्यत्वस्य तात्पर्यत्वेन विवक्षितत्वात्। लौकिकवाक्येषु तु तात्पर्यं प्रकरणादिना अवगम्यते। तथाहि उच्यते वाक्यपदीये -

**वाक्यात् प्रकरणादर्थादौचित्याद्देशकालतः।**
**शब्दार्थाः प्रविभज्यन्ते न रूपादेव केवलम्।। इति।**

अस्यार्थः - वाक्यात् प्रकरणात् अर्थात् औचित्यात् देशतः कालतः च शब्दानाम् अर्थाः भिन्नाः भवन्ति, तस्मात् एतान् सर्वान् विषयान् विचार्य एव केनचित् शब्दानाम् तात्पर्यम् अवगन्तव्यम् इति।

वैदिकानां वाक्यानां तु केषाञ्चित् मते अधिकरणमुखेन, केषाञ्चित् मते उपक्रमादिना तात्पर्यनिर्णयः क्रियते।

अधिकरणं वै विषय-संशय-पुर्वपक्ष-उत्तरपक्ष-सङ्गत्यात्मकं पञ्चलिङ्गकम्। तथाहि उच्यते -

**विषयो विशयश्चैव पूर्वपक्षस्तथोत्तरम्।**
**सङ्गतिश्चेति पञ्चाङ्गं शास्त्रेऽधिकरणं स्मृतम्।। इति।**

## तार्पर्यनिर्णायकानि षट् लिङ्गानि

प्रकृते उपक्रमादिना तात्पर्यनिर्णयः क्रियते इत्यतः उपक्रमादिनां सामान्यपरिचयः प्रदीयते।

उपक्रमादितात्पर्यनिर्णायकलिङ्गप्रतिपादकः श्लोको हि -

**उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्।**
**अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये।। इति।**

उपक्रमोपसंहारौ, अभ्यासः, अपूर्वता, फलम्, अर्थवादः, उपपत्तिः चेति षट् तात्पर्यग्राहकलिङ्गानि। इदानीम् एतेषाम् उपक्रमादिलिङ्गानां स्वरूपवर्णनपुरःसरम् उदाहरणं सामान्यतः प्रदीयते -

**क) उपक्रमोपसंहारौ** - प्रकरणप्रतिपाद्यस्य अर्थस्य प्रकरणस्य आदौ अन्ते च उपपादनम् उपक्रमोपसंहारौ इति। यथा- छान्दोग्योपनिषदि षष्ठे अध्याये आदौ 'एकमेवाद्वितीयम्', अन्ते 'ऐतदात्म्यमिदं सर्वम्' इति अद्वितीयवस्तुनः प्रतिपादनं क्रियते।

**ख) अभ्यासः** - प्रकरणप्रतिपाद्यस्य वस्तुनः तन्मध्ये पौनःपुन्येन प्रतिपादनम् अभ्यासः। यथा - छान्दोग्योपनिषदि अद्वितीयवस्तुनः मध्ये 'तत्त्वमसि' इति नवकृत्वा प्रतिपादनम् विद्यते।

**ग) अपूर्वता** - प्रकरणप्रतिपाद्यस्य अर्थस्य प्रमाणान्तरेण अविषयीकरणम् अपूर्वता इति। यथा छान्दोग्योपनिषदि अद्वितीयवस्तुनः प्रत्यक्षादिप्रमाणान्तरेण अविषयीकरणम्।

**घ) फलम्** - प्रकरणप्रतिपाद्यस्य आत्मज्ञानस्य तदनुष्ठानस्य वा तत्र तत्र श्रूयमाणं प्रयोजनं फलम्। यथा - छान्दोग्योपनिषदि 'आचार्यवान् पुरुषो वेद, तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ सम्पत्स्ये' (छान्दोग्योपनिषदि ६.१४.२) इति अद्वितीयवस्तुज्ञानस्य तत्प्राप्तिः प्रयोजनम्।

**ङ) <u>अर्थवादः</u>** - प्रकरणप्रतिपाद्यस्य तत्र तत्र प्रशंसनम् अर्थवादः। यथा छान्दोग्योपनिषदि 'उत तमादेशमप्राक्ष्यः, येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्' (छान्दोग्योपनिषदि ६.१.३) इति अद्वितीयवस्तुनः प्रशंसनम् क्रियते।

**च) <u>उपपत्तिः</u>** - उपपत्तिर्हि युक्तिः। प्रकरणप्रतिपाद्यार्थसाधने तत्र तत्र श्रूयमाणा युक्तिः उपपत्तिः। यथा - 'यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद् वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' इत्यादौ अद्वितीयवस्तुसाधने विकारस्य वाचारम्भणमात्रत्वे युक्तिः श्रूयते।

इत्थं छान्दोग्योपनिषदः षष्ठाध्यायस्य तात्पर्यम् अद्वितीयं ब्रह्म इति सुस्पष्टम्। एवमेव अन्ये उपनिषत्प्रकरणाः अपि द्रष्टव्याः। एवम् वेदान्तानाम् अद्वितीये ब्रह्मणि तात्पर्यावधारणम् एव श्रवणम् इति निगदितं यथाविस्तरम्।

### २४.८.२ मननम्

मननस्य लक्षणं निगद्यते वेदान्तपरिभाषाकारेण धर्मराजाध्वरिन्द्रेण "मननं नाम शब्दावधारिते अर्थे मानान्तरविरोधशङ्कायाम् तन्निराकरणानुकूलतर्कात्मज्ञानजनको मानसो व्यापारः" इति। अस्यार्थः हि - श्रवणेन यः अर्थः निश्चितः भवति तत्र प्रमाणान्तरेण बहवः विरोधाः समागच्छन्ति। द्वैतवादिनः तत्र आक्षेपं कर्तुं शक्नुवन्ति, अथवा स्वमनसि एव विरुद्धाः युक्तयः आविर्भवितुम् अर्हन्ति। एवं सत्याम् येन मनोवृत्तिविशेषेण वेदान्तानुगुणयुक्तिभिः विरुद्धमतानां खण्डनं विधाय स्वमते दृढता सम्पाद्यते तदेव मननम् इति उच्यते। अध्यात्मोपनिषदि अपि आम्नायते - "युक्त्या सम्भवितत्त्वानुसन्धानं मननं तु तत्" इति। मननं हि तर्कात्मकम्, परन्तु एतेन वेदसिद्धान्ताविरोधी तर्कः ज्ञातव्यः, न तु वेदसिद्धान्तविरोधी तर्कः। तस्मादेव भगवता भाष्यकारेण उच्यते - "श्रुत्यनुगृहीतः एव ह्यत्र तर्कोनुभवाङ्गत्वेन आश्रियते" इति। मनुना अपि उक्तम् -

**आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना।**
**यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः।।** इति। (मनुसंहिता १०.१०६)

अस्यार्थः - यः ऋषीणाम् धर्मोपदेशं वेदस्मृत्यादिशास्त्राविरोधिणा तर्केण अनुसन्धत्ते सः एव धर्मस्य यथार्थं स्वरूपं वेत्ति, न अन्यः इति।

वेदान्तसारकारेण मननविषये उच्यते - "मननं तु श्रुतस्य अद्वितीयवस्तुनः वेदान्तानुगुणयुक्तिभिः अनवरतम् अनुचिन्तनम्" इति। अतः वेदान्तवाक्यानि श्रुत्वा अद्वैतं ब्रह्मैव वेदान्तानाम् तात्पर्यम् इति विज्ञाय विरुद्धयुक्तिनां वेदसिद्धान्ताविरोधियुक्तिभिः निराकरणम् एव मननम् इति अर्थः फलति।

## २४.८.३ निदिध्यासनम्

श्रवणात् मननात् च अनन्तरं निदिध्यासनस्य लक्षणम् निगद्यते वेदान्तपरिभाषायाम् - "निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणचित्तस्य विषयेभ्यऽपकृष्यात्मविषयक-स्थैर्यानुकूलो मानसो व्यापारः" इति। अशेषाणां वेदान्तानाम् तात्पर्यम् अद्वितीये ब्रह्मणि इति निश्चिततया ज्ञानं भवति चेत् अपि अनादिकालाद् याः दुर्वासनाः अस्माकं मनःसु विद्यन्ते ताः चित्तं विषयेषु एव

आकर्षन्ति। एवं विषयेषु आकृष्यमाणं चित्तं येन मनोवृत्तिविशेषेण विषयेभ्यः अपकृष्य आत्मविषयिणि स्थिरता सम्पाद्यते तत् निदिध्यासनम् उच्यते। वेदान्तपरिभाषाकारमते निदिध्यासनं हि ब्रह्मसाक्षात्कारे साक्षात्कारणम्। तथाहि तेन उच्यते - "निदिध्यासनं ब्रह्मसाक्षात्कारे साक्षात्कारणम्" इति। वेदान्तसारे तु निदिध्यासनविषये उच्यते - "विजातीयदेहादिप्रत्ययरहित-अद्वितीयवस्तुसजातीयप्रत्ययप्रवाहः निदिध्यासनम्" इति। यदा मनः स्थिरं भवति, अर्थात् मनसि देहादिप्रत्ययाः न आविर्भवन्ति, तदा स्थिरे शान्ते एकाग्रे मनसि अविच्छिन्नतैलधारावत् अद्वितीयब्रह्मज्ञानं सततं प्रवहते, तदेव निदिध्यासनम् उच्यते। तथाहि उच्यते

**ताभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत्।**
**एकतानत्वम् एतद्धि निदिध्यासनमुच्यते।। इति।**

अर्थात् श्रवणमननाभ्यां यदा अर्थः निःसन्दिग्धः भवति तदा तस्मिन् निःसन्दिग्धे वस्तुनि मनसः एकतानता हि निदिध्यासनम् उच्यते।

एवं श्रवण-मनन-निदिध्यासनानि ब्रह्मसाक्षात्कारं प्रति सहकारिकारणानि साक्षात्कारणानि वा। तथाहि उच्यते -

श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।
मत्वा च सततं ध्येयम् एते दर्शनहेतवः।। इति।

## पाठगतप्रश्नाः-३

३८. "आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" इति कस्यामुपनिषदि विद्यते।

a) कठोपनिषदि b) केनोपनिषदि c) छान्दोग्योपनिषदि d) बृहदारण्यकोपनिषदि

३९. श्रवणं वै किम्?

४०. मननं वै किम्?

४१. निदिध्यासनं वै किम्?

४२. वेदान्तसिद्धान्ते तात्पर्यं वै किम्?

## पाठसारः

अद्वैतब्रह्मप्राप्तये सहकारिसाधनानि अस्मिन् पाठे आलोचितानि। तानि हि साधनानि साधनचतुष्टयम् इति नाम्ना प्रसिद्धानि। तानि हि नित्यानित्यवस्तुविवेकः, इहामुत्रफलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षुत्वम् च इति। एतेषु नित्यानित्यवस्तुविवेकः वै ब्रह्म एव नित्यं वस्तु ततः अन्यत् अखिलं वस्तु अनित्यम् इति अवधारणम्। अस्मिन् जगति विद्यमानानि भोग्यवस्तूनि यथा अनित्यानि तथैव स्वर्गादिलोकान्तरेषु अपि विद्यमानानि भोग्यवस्तूनि अनित्यानि इति ज्ञात्वा

अनित्यविषयभोगात् विरतिः इहामुत्रफलभोगविरागः। शमः दमः उपरतिः तितिक्षा श्रद्धा समाधानम् इति षण्णां साधनानां प्राप्तिः हि शमादिषट्कसम्पत्तिः। मुमुक्षुत्वं हि मोक्षेच्छा। एतत् साधनचतुष्टयं यस्य विद्यते स एव अद्वैतवेदान्तस्य अधिकारी भवति। आसीत् नचिकेताः साधनचतुष्टयसम्पन्नः, तस्मादेव यमसकाशात् सः ब्रह्मविद्याम् अधिगतवान्। साधनचतुष्टयं विद्यते चेत् वेदान्तवाक्यानां श्रवणात् मननात् निदिध्यासनात् च आत्मतत्त्वसाक्षात्कारः भवति। श्रवणं वै "वेदान्तानाम् अद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया"। मननं वै "शब्दावधारिते अर्थे मानान्तरविरोधशङ्कायाम् तन्निराकरणानुकूलतर्कात्मज्ञानजनको मानसो व्यापारः"। निदिध्यासनं वै "अनादिदुर्वासनया विषयेष्वाकृष्यमाणचित्तस्य विषयेभ्योऽपकृष्यात्मविषयकस्थैर्यानुकूलो मानसो व्यापारः"। एवम् आत्मतत्त्वसाक्षात्कारस्य सहकारिसाधनानि साक्षात्कारणानि च अस्मिन् पाठे आलोचितानि।

## पाठान्तप्रश्नाः

१. नित्यानित्यवस्तुविवेकं वर्णयतु।

२. साधनचतुष्टयस्य द्वितीयं साधनं वैशद्येन प्रतिपादयतु।

३. शम-दमविषये लघुटिप्पणीं लिखत।

४. उपरतिः का?

५. तात्पर्यविषये लघुटिप्पणीम् लिखत।

६. तात्पर्यग्राहकाणां लिङ्गानां परिचयः दीयताम्।

७. नचिकेतसः ब्रह्मविद्यायाम् अधिकारः किमर्थम् आसीत् इति वर्ण्यताम्।

८. श्रवणविषये लघुटिप्पणीम् लिखत।

९. मननविषये लघुटिप्पणीम् लिखत।

१०. निदिध्यासनविषये लघुटिप्पणीं लिखत।

११. शमादिषट्सु श्रद्धां समाधानं च वर्णयतु।

१२. का वै तितिक्षा?

## पाठगतप्रश्नानाम् उत्तराणि

१. 1. नित्यानित्यवस्तुविवेकः, २. इहामुत्रफलभोगविरागः, ३. शमादिषट्कसम्पत्तिः, ४. मुमुक्षुत्वं च इति चत्वारि साधनानि।

२. अद्वैतवेदान्तमते ब्रह्मैव एकं नित्यं वस्तु।

३. "नित्यं विभुं सर्वगतं सुसूक्ष्मम्" इति।

४. ब्रह्म सत्यं जगन्मिथ्येत्येवंरूपो विनिश्चयः। सोऽयं नित्यानित्यवस्तुविवेकः समुदाहृतः।। इति।

५. b) बहिरिन्द्रियाणां निग्रहः

६. "शमस्तावत् श्रवणादिव्यतिरिक्तविषयेभ्यः मनसः निग्रहः" इति।

७. शमः, दमः, उपरतिः, तितिक्षा, श्रद्धा, समाधानं चेति।

८. "तद्यथेह कर्मजितो लोकः क्षीयते एवम् एव अमुत्र पुण्यजितो लोकः क्षीयते" इति छान्दोग्यश्रुतिः।

९. निवर्तितानाम् इन्द्रियाणाम् मनसः च श्रवणादिसाधनव्यतिरिक्तविषयेषु शब्दादिषु प्रवृत्तिः भवति चेत् येन वृत्तिविशेषेण तेषां निग्रहः क्रियते सा उपरतिः। अथवा उपरतिः वै विहितानां कर्मणां विधिना परित्यागः इति।

१०. तितिक्षा शीतोष्णादिद्वन्द्वसहिष्णुता।

११. गुरूपदिष्टवेदान्तवाक्येषु विश्वासः श्रद्धा।

१२. निगृहीतस्य मनसः श्रवणादौ तदनुगुणविषये च समाधिः समाधानम्।

१३. मोक्षेच्छा।

१४. "शान्तो दान्त उपरतिस्तितिक्षुः समाहितो भूत्वाऽत्मन्येवात्मानं पश्यति" इति श्रुतिः।

१५. वाजश्रवसस्य।

१६. d) बृहदारण्यकोपनिषदि।

१७. "श्रवणं नाम वेदान्तानाम् अद्वितीये ब्रह्मणि तात्पर्यावधारणानुकूला मानसी क्रिया" इति।

१८. "मननं नाम शब्दावधारिते अर्थे मानान्तरविरोधशङ्कायाम् तन्निराकरणानुकूलतर्कात्मज्ञानजनको मानसो व्यापारः" इति।

१९. "निदिध्यासनं नाम अनादिदुर्वासनया विषयेष्वाकृष्यमाणचित्तस्य विषयेभ्योऽपकृष्यात्मविषयकस्थैर्यानुकूलो मानसो व्यापारः" इति।

२०. तदितरप्रतीतिजननेच्छया अनुच्चरितत्वे सति तत्प्रतीतिजननयोग्यत्वम् तात्पर्यम्।

॥ इति चतुर्विंशः पाठः ॥

२५

# मोक्षः

## प्रस्तावना

धर्मः अर्थः कामः मोक्षश्चेति चत्वारः पुरुषार्थाः सन्ति। तेषु मोक्षः भवति परमपुरुषार्थः। मोक्षः नित्यः अस्ति इत्यतः एव स परमपुरुषार्थः। मोक्षम् उद्दिश्य एव अद्वैतवेदान्तशास्त्रेण आत्मस्वरूपम् ब्रह्म बोध्यते, साधनानि च विधीयन्ते। साधनानां यथायथम् अनुष्ठानं यः करोति स एव मोक्षाख्यम् फलम् अवाप्नोति। मोक्षः कः, मोक्षप्राप्तिम् प्रति वेदान्तशास्त्रे बोधितानि साधनानि च कानि इति अत्र पाठे विशिष्य विचार्यते।

## उद्देश्यानि

अमुम् पाठम् पठित्वा भवान् –

- अद्वैतवेदान्तशास्त्रस्य किम् प्रयोजनम् इति ज्ञातुम् प्रभवेत्।
- अद्वैतवेदान्तमते मोक्षस्वरूपं किम् इति ज्ञातुम् प्रभवेत्।
- मोक्षः कथं नित्यः इति अवगन्तुं शक्नुयात्।
- अद्वैतवेदान्तदर्शने "ज्ञानेन एव मोक्षः भवति" इति सिद्धान्तस्य स्वीकारे किं कारणम् इति ज्ञातुम् शक्नुयात्।
- मोक्षस्य साक्षात्साधनम् ब्रह्मज्ञानम् एव इति ज्ञातुम् प्रभवेत्।
- ब्रह्मज्ञानव्यतिरिक्तानि मोक्षसाधनानि किमर्थानि इति ज्ञातुम् प्रभवेत्।
- ब्रह्मज्ञानस्य उत्पत्तिम् प्रति साधनानि कानि इति ज्ञातुम् प्रभवेत्।

## २५.१ वेदान्तशास्त्रं किमर्थम् अध्येतव्यम्।

साधनचतुष्टयं यस्य विद्यते स एव जनः वेदान्तशास्त्रे अधिकारी इति पूर्वमेव अस्माभिः ज्ञातम्। स एव वेदान्तशास्त्रस्य तात्पर्यम् अवगन्तुम् पारयति इत्यर्थः। साधनचतुष्टयसम्पन्नः जनः यदा वेदान्तशास्त्रं शृणोति तदा स वेदान्तवाक्यानां तात्पर्यभूतम् ब्रह्म साक्षात्करोति। तस्य मनसि ब्रह्मविद्या उदेति इत्यर्थः। ब्रह्मविद्यया च मोक्षः भवति। एवञ्च साधनचतुष्टयवान् साधकः वेदान्तशास्त्रश्रवणेन अन्ते मोक्षम् एव प्राप्नोति। अतः अयम् मोक्षः भवति वेदान्तशास्त्रस्य प्रयोजनम्। आत्यन्तिकतया सर्वविधस्यापि दुःखस्य निवृत्तिः परमानन्दस्य प्राप्तिश्च मोक्षः इति पदेन उच्यते।



वेदान्तशास्त्रम् उपनिषदां मीमांसा अस्ति। उपनिषद् एव वेदान्तः इति कथ्यते। मीमांसा इत्यस्य विचारः इत्यर्थः। वेदान्तशास्त्रे आचार्याः उपनिषदां तात्पर्यविषये मीमांसां कुर्वन्ति। आचार्यैः किम् उद्दिश्य उपनिषत्तात्पर्यमीमांसा क्रियते ? "साधनचतुष्टयसम्पन्नः इदं शास्त्रम् अधीत्य उपनिषदां तात्पर्यम् अवगच्छेत्" इति उद्देश्येन वेदान्ताचार्याः उपनिषन्मीमांसां कुर्वन्ति। किम् प्रयोजनम् उद्दिश्य साधनचतुष्टयसम्पन्नः जनः उपनिषदां तात्पर्यम् अवगन्तुम् इच्छति? उच्यते – स मोक्षाख्यम् प्रयोजनम् उद्दिश्य उपनिषदां तात्पर्यम् अवगन्तुम् इच्छति इति।

तथा हि, साधनचतुष्टयसम्पन्नः जनः मुमुक्षुः वर्तते। स मोक्षम् इच्छति इत्यर्थः। यः बद्धः अस्ति सः "अहम् बद्धः अस्मि" इति ज्ञात्वा तस्मात् बन्धनात् स्वस्य मोक्षम् इच्छेत्। साधनचतुष्टयसम्पन्नः जनः संसाररूपात् बन्धनात् मोक्षम् इच्छति। यस्मात् सः संसारात् मोक्षम् अभिलषति तस्मात् सः संसारस्य विषये पूर्वमेव जानाति। जन्ममरणादिचक्रमेव संसारः इति कथ्यते। अयं दुःखमयः अस्ति। आत्मनः स्वरूपविषये यत् अज्ञानं तेन संसारः सञ्जायते। नित्यसुखात्मकम् ब्रह्म एव आत्मनः स्वरूपम् इति उपनिषत्सु बोधितम् अस्ति। आत्मा ब्रह्म एव इति स्वयम् अनुभूय महात्मानः अपि तत् अस्मभ्यम् बोधयन्ति। अयम् आत्मब्रह्मणोः अभेदः अथवा आत्मनः अद्वैतं वयं तु न जानीमः। अतः अस्माकम् आत्मस्वरूपविषये अथवा ब्रह्मविषये अथवा अद्वैतविषये अज्ञानम् अस्ति। अस्मात् अज्ञानात् एव दुःखम् अनुभवामः।

**अज्ञानात् दुःखं कथम् भवति?** उच्यते – सर्वम् इदं जगत् वस्तुतः आत्मस्वरूपम् ब्रह्म एव। ब्रह्म एव जगद्रूपेण दृश्यते। अस्माकम् आत्मस्वरूपात् भिन्नः कोऽपि जनः नास्ति, भिन्नं किमपि वस्तु नास्ति। इदं ज्ञानम् एव अद्वैतदर्शनम्। उपनिषत् इदम् अद्वैतम् बोधयति। किन्तु वयम् अद्वैतं न जानीमः। अस्मात् अज्ञानात् वयं द्वैतम् अनुभवामः। किम् इदं द्वैतम् ? "अहं त्वम्, इदं तत्, अत्र तत्र, इदानीं तदानीम्, अन्तः बहिः, अयं लोकः परलोकः, जीवः जगदीश्वरः" इत्यादिरूपेण अस्माभिः यत् अनुभूयते तदेव द्वैतम्। अखिलम् अपि जगत् द्वैतम् एव। अस्मात् द्वैतात् कामः, लोभः, मोहः, भयम्, दुःखम् इत्यादिकं जायते। कामेन वयं विषयोपभोगेषु प्रवर्तामहे। भयादिना वयं विषयेभ्यो निवर्तामहे। प्रवृत्तिरूपं निवृत्तिरूपञ्च सर्वं कर्म इति उच्यते। साधुकर्मणा पुण्यं जायते, असाधुकर्मणा च पापम्। कर्मभिः सञ्चितस्य पुण्यस्य पापस्य च उपभोगाय वयं शरीरात् शरीरान्तरम् प्रति गच्छामः। एवम् जन्म, जरा, मरणम् इत्यादिरूपः संसारः सञ्जायते। संसारे वयं महत् दुःखम् अनुभवामः। अस्य संसारदुःखस्य हेतुः अस्ति अविद्या, कामः, कर्म इति त्रितयम्। संसारस्य हेतुः कर्म, तस्य हेतुः कामः, तस्य च हेतुः अविद्या अथवा अज्ञानम्। एवम् अज्ञानेन संसाराख्यं दुःखम् भवति।

संसारदुःखस्य मूलं कारणम् इदम् अज्ञानम् भवति आत्मस्वरूपविषयकम्। तत् कस्मात् ? आत्मस्वरूपस्य अद्वैतस्य विषये अस्माकं ज्ञानं नास्ति इति कारणात् खलु संसारदुःखं जातम्। तस्मात् आत्मस्वरूपविषयकात् अज्ञानात् एव संसारः जातः इति अवगम्यते। आत्मस्वरूपस्य ज्ञानेन तत् अज्ञानं निवर्तते। अतः संसारस्य निवृत्तिः आत्मस्वरूपस्य ज्ञानेन भवति। संसारनिवृत्तिः एव मोक्षः इति उच्यते। तस्मात् यः मोक्षम् इच्छति सः आत्मस्वरूपं जानीयात्। आत्मनः स्वरूपं यत् ब्रह्म तत् उपनिषत्सु एव तात्पर्यतः बोधितम् अस्ति। अत एव साधनचतुष्टयसम्पन्नः नरः उपनिषदां तात्पर्यम् अवगन्तुम् इच्छति।



तस्य तात्पर्यस्य सुखेन अवगमनार्थम् एव उत्तरमीमांसाख्यं वेदान्तशास्त्रम् आचार्यैः प्रवर्तितम्। मीमांसया उपनिषदां तात्पर्यभूतम् ब्रह्म यदा साधकेन ज्ञायते तदा स मोक्षं लभते। तस्मात् मोक्षम् उद्दिश्य साधकैः उपनिषन्मीमांसारूपस्य वेदान्तशास्त्रस्य अध्ययनं कर्तव्यम्।

## पाठगतप्रश्नाः-१

अत्र केचन पाठगताः प्रश्नाः प्रदीयन्ते।

१. संसारः कः, तस्य किं कारणम्।

२. संसारस्य निवृत्तिः कथम् भवति।

३. वेदान्तशास्त्रं किमर्थम् प्रवृत्तम्।

४. साधनचतुष्टयसम्पन्नः एव वेदान्तशास्त्रे अधिकारी इति कस्मात् उच्यते।

## २५.२ मोक्षस्वरूपम्

साधनचतुष्टयसम्पन्नः साधकः वेदान्तशास्त्राध्ययनेन उपनिषदां तात्पर्यविचारं कृत्वा ब्रह्मविद्यया मोक्षं लभते इति अवगतम्। कोऽयम् मोक्षः? मोक्षः इति नित्यस्य निरतिशयस्य आनन्दस्य संज्ञा।

संसारे सर्वेऽपि जन्तवः आनन्दमेव वाञ्छन्ति। कोऽपि प्राणी दुःखं नेच्छति। अतः एव दुःखस्य परिहाराय सुखस्य प्राप्त्यै च प्राणिनः यतन्ते। यतमानेषु तेषु केचन पुण्यकर्मभिः विषयसुखम् प्राप्नुवन्ति। किन्तु कर्मभिः सम्पादितं तत् सुखम् अनित्यं सातिशयञ्च भवति। यावत्कालम् पुण्यकर्मणाम् फलं तिष्ठति तावत्कालमेव वैषयिकं सुखं लभ्यते। पुण्यकर्मफले क्षीणे सति तत् सुखं नश्यति, दुःखञ्च पुनः आगच्छति। तस्मात् पुण्यकर्मभिः लब्धं वैषयिकं सुखम् अनित्यम्। किञ्च तत् सुखम् अत्युत्कृष्टं नास्ति। पुण्यकर्म यावद् उत्कृष्टम् भवति तावत् ततो जायमानं वैषयिकसुखमपि उत्कृष्टम् भवति। मनुष्यलोके यत् सुखं ततोऽपि उत्कर्षः अथवा अतिशयः गन्धर्वलोकगतस्य सुखस्य विद्यते। ततोऽपि अतिशयः स्वर्गलोके लभ्यस्य सुखस्य वर्तते। ततोऽप्यतिशयः वैकुण्ठलोके लभ्यमानस्य सुखस्य अस्ति। तस्मात् पुण्यकर्मभिः प्राप्यं सुखं सातिशयम् अपि भवति।

कर्मभिः प्राप्यं सुखं कस्मात् कारणात् अनित्यं सातिशयञ्च भवति। अस्य प्रश्नस्य समाधानम् इदम् – कर्मभिः उपलभ्यमानं सुखं वैषयिकमस्ति इति। वैषयिकम् इत्यस्य विषयसम्बद्धम् इत्यर्थः। विषयाः इत्यस्य आत्मभिन्नाः पदार्थाः इत्यर्थः। आत्मा तु न कदापि विषयः। स सर्वदा विषयी एव। आत्मना एव सर्वेऽपि पदार्थाः विषयीक्रियन्ते अथवा ज्ञायन्ते। तस्मात् आत्मा विषयी, आत्मभिन्नाः सर्वेऽपि पदार्थाः तस्य विषयाः। विषयी आत्मा एव वस्तुतः सर्वस्यापि सुखस्य मूलम्। नित्यं निरतिशयञ्च सुखमेव वस्तुतः आत्मा इत्युच्यते। अतः एव उपनिषदः आत्मानम् आनन्दस्वरूपं वदन्ति। आत्मनि एव सर्वं सुखं निहितं चेदपि आत्मभिन्नेषु पदार्थेषु विषयेषु सुखम् अस्ति इति चिन्तयन्तः लोके जीवाः

भ्रान्ताः। सुखस्वरूपस्य आत्मनः ज्ञानं तेषां नास्ति इति कारणाद् एव ते एवं व्यवहरन्ति। तस्मात् यः नित्यं निरतिशयञ्च आनन्दम् प्राप्तुम् इच्छति सः आत्मानं जानीयात्। आत्मज्ञानेन च आत्मस्वरूपं नित्यनिरतिशयसुखम् अनुभवितुं शक्यते। अस्मिन् सुखे दुःखस्य लवलेशोऽपि नास्ति। जन्मजरामरणादिरूपे संसारे उपलभ्यमानं सुखम् अनित्यं सातिशयञ्च अस्ति, पुनः दुःखमिश्रितञ्च विद्यते। स संसारः नित्ये निरतिशये च सुखे प्राप्ते निवृत्तः भवति। एवम् आत्मज्ञानद्वारा आत्मस्वरूपस्य नित्यनिरतिशयसुखस्य प्राप्तिः संसारस्य निवृत्तिश्च अद्वैतवेदान्तशास्त्रे मोक्षः इति मुक्तिः इति वा प्रोच्यते। अयम् मोक्षः एव वेदान्तशास्त्रस्य प्रयोजनम्।

(चित्रम् – साधनचतुष्टयसम्पन्नः साधकः वेदान्तशास्त्रम् गुरुमुखात् अधीते। ब्रह्मविचारं करोति। ततः ब्रह्मविद्यं लभते। मुक्तश्च भवति )

## पाठगतप्रश्नाः-२

अत्र केचन पाठगताः प्रश्नाः प्रदीयन्ते।

५. मोक्षः कः।

६. वैषयिकानन्दात् आत्मस्वरूपानन्दस्य कः भेदः।

७. मोक्षः कथम् प्राप्यते।

## २५.३ निवृत्तस्य निवृत्तिः, प्राप्तस्य प्राप्तिः

अस्माकम् आत्मा सर्वदा ब्रह्म एव इत्यतः वयं वस्तुतः सदा संसारात् मुक्ताः एव भवामः। तस्मात् वस्तुतः संसारः अस्माकं सदा निवृत्तः एव वर्तते, नित्यनिरतिशयः ब्रह्मानन्दश्च सर्वदा प्राप्तः एव वर्तते। तथापि आत्मस्वरूपविषयिण्या भ्रान्त्या संसारः निवृत्तः एव, ब्रह्मानन्दश्च प्राप्तः एव इति वयं न जानीमः। यदा ब्रह्मविद्यया सा भ्रान्तिः अपगच्छति तदा निवृत्तः एव संसारः निवर्तते इव, प्राप्तः एव ब्रह्मानन्दः प्राप्यते इव च अनुभूयते। एवञ्च यदा मोक्षः यदा भवति तदा निवृत्तस्य एव संसारदुःखस्य निवृत्तिः भवति, प्राप्तस्य एव परमानन्दस्य प्राप्तिश्च भवति।

अत्र कश्चन संशयः समुदेति – कथं निवृत्तस्य निवृत्तिः, प्राप्तस्य प्राप्तिश्च सम्भवति इति। उच्यते – निवृत्तस्य निवृत्तिः रज्जुसर्पन्यायेन सम्भवति, प्राप्तस्य प्राप्तिश्च कण्ठचामीकरन्यायेन सम्भवति इति।

तथा हि क्वचित् मार्गे एका रज्जुः पतिता आसीत्। सायङ्कालस्य मन्दान्धकारः। कश्चन वृद्धः आपणात् गृहम् प्रत्यागच्छन् तां रज्जुं दूरात् दृष्ट्वा सर्पम् अमन्यत। अरे अयं सर्पः इति आक्रोशन् सः अत्यन्तम् भीत्या ततोऽपि दूरं गत्वा स्थितवान्। तस्य शरीरे स्वेदः समुत्पन्नः। कम्पनम् अपि आरब्धम्। तदा कश्चित् बालकः तत्र समागतः। सः किञ्चित् पूर्वं तेन मार्गेण क्रीडाङ्गणं गच्छन् तत्र रज्जुं दृष्टवान्

आसीत्। तस्मात् अधुना अन्धकारेऽपि तत्र रज्जुरेव अस्तीति स जानाति स्म। भयाक्रान्तं वृद्धं दृष्ट्वा बालकः अपृच्छत् – भवान् केन हेतुना भीत्या एवं कम्पते इति। वृद्धः रज्जुं दर्शयन् अवदत् – भोः कुमार, तत्र पश्य, अतिघोरः विषधरः कश्चन सर्पः मम मृत्युरिव तत्र शेते इति। इदं श्रुत्वा बालकः हसन् प्रीत्या वृद्धस्य हस्तं गृहीत्वा तं रज्जोः निकटम् आनीय उक्तवान् – पश्यतु भवान्, अयं न सर्पः, अपि तु इयं रज्जुः इति। एकाग्रतया किञ्चित्कालम् अवलोक्य वृद्धः सा रज्जुरेवेति निश्चित्य बालकम् अवदत् – अधुना मम शान्तिः जाता, स सर्पः निवृत्तः इति। वस्तुतः सर्पः पूर्वमेव निवृत्तः आसीत्। तथापि स अनिवृत्तः इति भ्रान्तिः आसीत् वृद्धस्य। रज्जुज्ञानेन यदा सा भ्रान्तिः अपगता तदा निवृत्तस्य एव सर्पस्य निवृत्तिः जाता। अयं दृष्टान्तः रज्जुसर्पन्यायः इत्युच्यते। रज्जुसर्पन्यायात् इदं सिद्ध्यति – निवृत्तस्य अपि निवृत्तिः सम्भवति इति। तस्मात् ब्रह्मविद्यया यदा ब्रह्मविषयिणी अविद्या अपगच्छति तदा निवृत्तस्य एव संसारदुःखस्य निवृत्तिः सञ्जायते।

चामीकर (कण्ठहारः) इति नाम्ना कण्ठे परिधीयमानं किमपि सुवर्णनिर्मितम् आभरणं विद्यते। एकदा काचन महिला उत्सवं द्रष्टुं गच्छामि इति निश्चित्य वेषाभूषादिभिः आत्मानम् अलङ्कर्तुम् प्रवृत्ता। सुवर्णाभरणानाम् पेटिकां यदा उद्घाटितवती तदा सा तत्र अतिमूल्यवन्तं चामीकरं न अपश्यत्। खेदेन सा आक्रोशं कर्तुम् आरब्धवती। हा हन्त, मम चामीकरः कुत्र गतः इत्येवम् उच्चैः विलपन्ती सा गृहस्य अन्तः बहिश्च सर्वत्र चामीकरस्य अन्वेषणे व्यग्रा जाता। गृहस्य पुरस्तात् अङ्गणे यदा सा चामीकरान्वेषणे निरता तदा विद्यालयात् गृहम् प्रत्यागच्छन् कश्चन बालकः तस्याः विलापं श्रुत्वा समीपम् आगतवान्। सः ताम् अपृच्छत् – भवती एवं विलपन्ती किं वस्तु अन्विषति इति। सा महिला नष्टस्य चामीकरस्य विषये तम् अवदत्। तदा स बालकः मृदु हसन् अङ्गुल्या महिलायाः कण्ठं निर्दिशन् ताम् अवोचत् – अयि भद्रे, स चामीकरः भवत्याः कण्ठे एव विराजते खलु इति। आश्चर्येण महिला स्वस्य कण्ठं स्पृष्ट्वा चामीकरं तत्रैव अनुभूतवती। सा आनन्देन बालकाय मिष्टान्नं दत्त्वा उक्तवती – तव वचनेन अहम् मम नष्टं चामीकरम् पुनः प्राप्तवती इति। वस्तुतस्तु चामीकरः सर्वदाऽपि महिलायाः कण्ठे एव विराजते स्म। तस्मात् सदा प्राप्तः एव आसीत् स चामीकरः। भ्रमेण सा तम् अप्राप्तम् अमन्यत। यदा ज्ञानेन भ्रान्तिः अपगता तदा प्राप्तस्य एव चामीकरस्य प्राप्तिः जाता। अयं दृष्टान्तः कण्ठचामीकरन्यायः इत्युच्यते। कण्ठचामीकरन्यायात् इदं सिद्ध्यति – प्राप्तस्य अपि प्राप्तिः सम्भवति इति। तस्मात् यदा ब्रह्मज्ञानेन ब्रह्मविषयकम् अज्ञानम् अपगच्छति तदा प्राप्तः एव परमानन्दः प्राप्यते।

आत्यन्तिकतया संसारदुःखस्य निवृत्तिः, परमानन्दस्य प्राप्तिश्च मोक्षः इत्युच्यते। रज्जुसर्पन्यायेन निवृत्तस्य एव निवृत्तिः, कण्ठचामीकरन्यायेन प्राप्तस्य एव प्राप्तिश्च मोक्षे भवति इत्यतः मोक्षः नित्यः इति अवगम्यते।

## पाठगतप्रश्नाः-३

अत्र केचन पाठगताः प्रश्नाः प्रदीयन्ते।

८. निवृत्तस्य अपि निवृत्तिः सम्भवतीति दृष्टान्तमुखेन प्रदर्श्यताम् (अथवा रज्जुसर्पन्यायः विव्रियताम् )।

९. प्राप्तस्य अपि प्राप्तिः सम्भवतीति दृष्टान्तमुखेन प्रदर्श्यताम् (अथवा कण्ठचामीकरन्यायः विव्रियताम्)।

१०. मोक्षः नित्यः इति कथम् अवगम्यते।

११. मोक्षः नित्यश्चेत् वयं कथम् बद्धाः स्मः।

## २५.४ मोक्षस्य साक्षात्साधनं ज्ञानम् एव

मोक्षः नित्यः इति अस्माभिः अवगतम्। नित्यः इति कारणात् मोक्षः ज्ञानेन एव भवितुम् अर्हति। आत्मनः स्वरूपम् ब्रह्म एव इति ज्ञानम् अस्माकं नास्ति इति कारणात् खलु वयं जननमरणचक्रे संसारे बद्धाः स्मः। वस्तुतस्तु अस्माकं सर्वेषाम् आत्मा सर्वदा ब्रह्म एव। अतः एव वस्तुतः वयम् मुक्ताः स्मः। तथापि तादृशं ज्ञानम् अस्माकं नास्ति इत्यत एव वयम् बद्धाः। तस्मात् मुक्तिः नित्या, सा अज्ञानेन आच्छादिता। आत्मा ब्रह्मैव इति ज्ञानं यदा लभामहे तदा तत् अज्ञानं नश्यति, वयम् अस्माकं नित्यमुक्तस्वभावताम् अनुभवामश्च। तस्मात् ब्रह्मज्ञानेन अथवा ब्रह्मविद्यया एव मोक्षः सिद्ध्यति।

ब्रह्मविद्यया जायमाना अविद्यानिवृत्तिः परमानन्दप्राप्तिश्च मोक्षः इत्युच्यते। यस्मात् ब्रह्मज्ञानेन एव मोक्षः भवति तस्मात् ब्रह्मज्ञानम् एव मोक्षस्य साक्षात्साधनम्।

अतः एव श्रीशङ्करभगवत्पादाः विवेकचूडामणौ वदन्ति – आत्मैक्यबोधेन विना विमुक्तिर्न लभ्यते जन्मशतान्तरेऽपि इति। आत्मा एकः अद्वैतः इति यः बोधः स एव आत्मैक्यबोधः। स एव ब्रह्मविद्या। अनया विद्यया विना मुक्तिः शतशः जन्मसु अपि न लभ्यते इत्यर्थः।

ज्ञानेन एव मोक्षः भवति इति अद्वैतवेदान्तदर्शनस्य आचार्याः अस्मान् पुनः पुनः स्मारयन्ति। मुमुक्षुणा तस्माद् आत्मज्ञानमेव सम्पादनीयम्। आत्मनः यथार्थं स्वरूपम् ब्रह्म उपनिषत्सु बोधितं विद्यते। तस्माद् आत्मज्ञानाय उपनिषदर्थः ज्ञेयः। तमर्थं निर्णेतुम् उपनिषन्मीमांसारूपम् अद्वैतवेदान्तशास्त्रम् प्रवृत्तम्। सच्चिदानन्दस्वरूपम् ब्रह्म एव आत्मनः वास्तविकं स्वरूपमिति उपनिषद्व्याख्यानद्वारा वेदान्तशास्त्रे आचार्यैः निर्णीतम्। तस्माद् ब्रह्मविद्यया हि मोक्षः भवति। ब्रह्म एवास्माकं सर्वेषाम् आत्मा। अतः ब्रह्मविद्यया वयम् अस्माकम् आत्मनः स्वरूपमेव ज्ञास्यामः। आत्मस्वरूपस्य ब्रह्मणः ज्ञानेनैव ब्रह्माभिन्नं नित्यं निरतिशयम् आनन्दं लप्स्यामहे। ब्रह्मस्वरूपभूतः अयम् आनन्दः निखिलदुःखविवर्जितः। तस्माद् ब्रह्मानन्दे लब्धे दुःखमयः संसारः नश्यति। एवञ्च यदा अस्माभिः ब्रह्मविद्या प्राप्यते तदा वयं निवृत्तनिखिलदुःखम् आत्मानन्दम् अनुभवामः, संसाराख्यात् जन्ममरणचक्रात् चिराय मुक्ताश्च भवामः।

## पाठगतप्रश्नाः-३

अत्र केचन पाठगताः प्रश्नाः प्रदीयन्ते।

१२. ज्ञानेन एव मोक्षः भवतीति कस्मात् उच्यते।

१३. मुमुक्षुणा ज्ञानं कुतः लब्धुं शक्यते।

१४. ज्ञानेन यः मुक्तः स किम् अनुभवति।

## २५.५ ज्ञानातिरिक्तानि मोक्षसाधनानि किमर्थानि

ब्रह्मज्ञानातिरिक्तानि अपि बहुविधानि मोक्षसाधनानि कर्मयोगादीनि शास्त्रेषु श्रूयन्ते। तानि ब्रह्मज्ञानोत्पत्त्यर्थानि भवन्ति।

यत् वस्तु सर्वदा प्राप्तम् एव वर्तते तस्य प्राप्त्यै किमपि कर्तव्यं नास्ति। नित्यप्राप्तस्य वस्तुनः विषये इदं वस्तु मम नास्ति, प्रयत्नेन इदम् मया प्राप्तव्यम् इति यः भ्रमः तस्य निवारणं केवलं ज्ञानेन एव भवति। प्राप्तेऽपि अप्राप्तिरूपायाः भ्रान्त्याः निवर्तकं हि ज्ञानम्। तस्मात् साध्यं यदा सर्वदा साधकस्य सिद्धमेव वर्तते तदा तस्य अप्राप्तिः साध्यविषयकेण अज्ञानेन एव स्यात्, पुनः प्राप्तिश्च ज्ञानेन भवति। आत्मा कालत्रयेऽपि ब्रह्म एव इत्यतः मोक्षः सर्वेषाम् प्राणिनां वस्तुतः सिद्धःएव अस्ति। तथापि ब्रह्मविषयकाज्ञानकारणात् अहं न मुक्तः, अपि तु संसारे बद्धः एव इति चिन्त्यते जीवेन। अतः ब्रह्मज्ञानेन एव संसारात् मुक्तिः भवति। सर्वेषाम् आत्मत्वेन नित्यसिद्धस्य ब्रह्मणः ज्ञानम् एव अस्माभिः ब्रह्मविद्या अखण्डाकारवृत्तिः ब्रह्मानुभवः इत्यादिशब्दैः अपि उच्यते। एवञ्च मोक्षः ब्रह्मविद्याम् एव अपेक्षते, न तु कर्मोपासनायोगसमाध्यादिकम्। एवं यदि ब्रह्मविद्यया एव मोक्षः भवति तर्हि मोक्षस्य उपायः अथवा साधनम् ब्रह्मविद्या एव केवलं स्यात्। कर्मयोगः, भक्तियोगः, इन्द्रियनिग्रहः, ध्यानम् इत्यादीनि मोक्षसाधनानि न स्युः। ततश्च कर्मादीनाम् अत्यन्तम् अनुपयोगिता एव अध्यात्ममार्गे प्राप्ता। किन्तु एवं न भवति। कर्मयोगादीनि श्रवणमनननिदिध्यासनपर्यन्तानि मोक्षस्य साधनानि भवन्ति इति वेदान्तशास्त्रे आचार्यैः उपदिष्टम् अस्ति। तस्मात् संशयः – ब्रह्मज्ञानातिरिक्तानि कर्मयोगादीनि साधनानि कथम् मोक्षसाधनानि भवन्ति इति।

उच्यते – संसारकारणस्य अज्ञानस्य निवारकम् ब्रह्मज्ञानमेव भवति चेदपि तस्य ब्रह्मज्ञानस्य उत्पत्त्यर्थम् अन्यानि साधनानि आवश्यकानि सन्ति। तथा हि, ब्रह्मविद्या अथवा अखण्डाकारवृत्तिः कलुषिते अन्तःकरणे न उदेति। शुद्धम् एव अन्तःकरणं तत्र सर्वदा प्रतिबिम्बितस्य ब्रह्मणः अनुभवे समर्थम् भवति। बहिर्मुखता, कर्मवासनाः, कामः, क्रोधः, लोभः इत्यादिभिः मलैः अस्माकम् अन्तःकरणं कलुषितं विद्यते। एषाम् मलानां निवारणाय कर्मयोगः, उपासनम् इत्यादीनि साधनानि आवश्यकानि। कर्मयोगादिसाधनैः शुद्धान्तःकरणः यः साधकः स एव गुरूपदिष्टस्य वेदान्तवाक्यस्य तात्पर्यं विजानाति। कर्मयोगादीनां साधनानां निरन्तरानुष्ठानेन शुद्धे अन्तःकरणे ब्रह्मविद्या गुरूपदिष्टानाम्

ब्रह्मबोधकवेदान्तवाक्यानां श्रवणमनननिदिध्यासनैः समुत्पद्यते। अयम् ब्रह्मानुभवः एव ब्रह्मविद्या अथवा अखण्डाकारवृत्तिः इति उच्यते। एवञ्च शास्त्रे प्रोक्तानाम् ब्रह्मज्ञानातिरिक्तानां सर्वेषामपि साधनानाम् प्रयोजनम् एतावदेव – मोक्षसम्पादिकायाः ब्रह्मविद्याख्यायाः प्रमाणवृत्तेः आश्रयभूतं यत् अन्तःकरणं तत्र स्थितानाम् मलानां निवर्तनपूर्वकम् ब्रह्मविद्योत्पादनम् इति। अतः ब्रह्मज्ञानातिरिक्तानि सर्वाणि अपि मोक्षसाधनानि ब्रह्मज्ञानोत्पत्त्यर्थानि भवन्ति इति सिद्धम्।

वास्तविकम् मोक्षसाधनम् ब्रह्मविद्या एवेति निःशङ्कं निश्चितमस्ति इत्यतः ब्रह्मविद्या एव मोक्षः इति ब्रह्मविद्यायाः स्तुतिं कुर्वन्ति आचार्याः। तस्मात् मोक्षरूपायाः ब्रह्मविद्यायाः यानि साधनानि तानि अपि मोक्षसाधनानि एव इति युक्तम्। शास्त्रे प्रायः मोक्षसाधनम् इति शब्देन ब्रह्मविद्यायाः उत्पत्त्यै यानि साधनानि अपेक्षितानि तानि निर्दिश्यन्ते। तस्मात् यत्र विशेषतया मोक्षसाधनानां विचारः कर्तव्यः भवति तत्र वयम् ब्रह्मविद्यायाः उत्पत्त्यर्थकानि यानि साधनानि कर्मयोगादीनि भवन्ति तानि एव विचारयामः।

## पाठगतप्रश्नाः-४

अत्र केचन पाठगताः प्रश्नाः प्रदीयन्ते।

१५. मोक्षस्य साक्षात्साधनं किम्।

१६. ब्रह्मज्ञानातिरिक्तानि साधनानि किमर्थानि।

## २५.६ ज्ञानोत्पत्तेः साधनानि तेषां त्रैविध्यं च

ब्रह्मज्ञानेन एव मोक्षः भवति इति सिद्धमेव वर्तते। अतः मोक्षसाधननानां विचारे अद्वैतवेदान्तशास्त्रे प्रायः ब्रह्मज्ञानस्य उत्पत्तिम् प्रति यानि साधनानि सन्ति तानि एव आलोच्यन्ते।

यानि ब्रह्मविद्योत्पत्तिसाधनानि मोक्षसाधनानि तानि त्रिविधानि भवन्ति। तानि यथा अन्तरङ्गसाधनानि, सहकारिसाधनानि, परम्परासाधनानि चेति।

येन करणेन किमपि साध्यते तदेव साधनम् इत्युच्यते। यत्र वस्त्रं साध्यम् भवति तत्र वस्त्रनिर्मातुः मुख्यानि साधनानि सन्ति तन्तवः। तस्मात् तन्तवः वस्त्रम् प्रति अन्तरङ्गसाधनानि भवन्ति। किन्तु केवलं तन्तुभिः तन्तुवायः वस्त्रं न निर्मातुं शक्नोति, अपि तु स तन्तुभिः सह तुरी वेमा इत्यादीनि वस्तून्यपि उपयुङ्क्ते। तन्तुभिः वस्त्रनिर्माणे कर्तव्ये तुरीवेमादीनि तन्तुवायं सहकुर्वन्ति इत्यर्थः। तस्मात् वस्त्रम् प्रति तुरीवेमादिकम् भवति सहकारिसाधनम्। इदञ्च सहकारिसाधनं तन्तुवायस्य निकटे स्वयमेव न समायाति, अपि तु काष्ठैः अन्यैश्च उपकरणैः श्रमेण तत् निर्मीयते। तुरीवेमादिकस्य सहकारिसाधनस्य साधनमस्ति काष्ठादिकम् इत्यर्थः। तस्मात् काष्ठादिकम् भवति वस्त्रम् प्रति परम्परासाधनम्। एवञ्च तन्तुवायः वस्त्रं साधयितुम् प्रथमं वस्त्रस्य परम्परासाधनानि काष्ठादीनि समाहरति। ततः परं स काष्ठादीनां तक्षणादिद्वारा

वस्त्रस्य सहकारिसाधनानि तुरीवेमादीनि सम्पादयति। तदनन्तरं तैः सहकृतैः वस्त्रस्य अन्तरङ्गसाधनैः तन्तुभिः स वस्त्रं साधयति।

एवमेव मोक्षे साधनीये (अथवा मोक्षस्य साक्षात्साधनभूतायाम् ब्रह्मविद्यायां साधनीयायाम् ) मुमुक्षोरपि यथोक्तानि त्रिविधानि साधनानि आवश्यकानि भवन्ति। मोक्षम् प्रति अन्तरङ्गसाधनानि भवन्ति श्रवणमनननिदिध्यासनानि। सहकारिसाधनानि श्रवणादीनाम् अनुष्ठानकाले सदा भवितव्यानि साधनचतुष्टयम् इति नाम्ना शास्त्रे प्रसिद्धानि चत्वारि साधनानि। तानि यथा नित्यानित्यवस्तुविवेकः, इहामुत्रार्थफलभोगविरागः, शमादिषट्कसम्पत्तिः, मुमुक्षुत्वञ्च। (यथा चैतानि प्रसिद्धानि – अमानित्वम्, अद्वेष्टा सर्वभूतानाम्, शान्तो दान्त उपरत इत्यादिशास्त्रवाक्यैः।) परम्परासाधनानि तु यैः साधनैः साधनचतुष्टयाख्यानि सहकारिसाधनानि सिद्ध्यन्ति तानि एव। यथा कर्मयोगः, भक्तियोगः, जपः, उपासनम्, ध्यानम्, यज्ञः, दानम्, तपः इत्यादीनि। (गीता – उपविश्यासने युञ्ज्याद् योगम् आत्मविशुद्धये, यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ) परम्परासाधनानि कदाचित् बहिरङ्गसाधनानि इत्यपि उच्यन्ते।

(त्रीणि सोपानानि, तदुपरि ब्रह्मविद्योदयः ततः मोक्षश्च – एवं किमपि चित्रम्)

एवं मोक्षस्य त्रिविधानि साधनानि सोपानक्रमेण कस्माद् उच्यन्ते इति संशयः स्यात्। तत्र समाधानम् इदम् – कर्मयोगः ध्यानयोगः इत्यादीनाम् परम्परासाधनानाम् अनुष्ठानं यः करोति तस्य एव अन्तःकरणं शुद्ध्यति। अन्तःकरणे शुद्धे सति साधनचतुष्टयाख्यं सहकारिसाधनं तस्य सम्पद्यते। शुद्धान्तःकरणः साधनचतुष्टयसम्पन्नश्च नरः ब्रह्मविद्यायाम् अधिकारी अथवा योग्यः भवति। अत्र ब्रह्मविद्यायाम् अधिकारी इत्यस्य ब्रह्मविद्योपदेशकानां वेदान्तवाक्यानां तात्पर्यावगमने अधिकारी इत्यर्थः। वेदान्तवाक्यानां तात्पर्यावगमनञ्च श्रवणमनननिदिध्यासनैः त्रिभिरुपायैः सिद्ध्यति। तस्मात् ब्रह्मविद्यायां योऽधिकारी स श्रवणादिषु अधिकारी इत्यर्थः समायाति। एवञ्च कर्मयोगादिभिः साधनैः अन्तःकरणशुद्धिं साधनचतुष्टयञ्च सम्पाद्य ब्रह्मविद्यायाम् अधिकारी सन् यः श्रवणादिकं करोति स एव ब्रह्मविद्यां लभते इत्यतः साधनानां कश्चन सोपानक्रमः अस्ति इति ज्ञायते।

## पाठगतप्रश्नाः-५

अत्र केचन पाठगताः प्रश्नाः प्रदीयन्ते।

१७. त्रिविधानि ज्ञानसाधनानि कानि।

१८. मोक्षस्य त्रिषु साधनेषु सोपानक्रमः कस्मात् अङ्गीक्रियते।

## २५.७ भगवद्गीतायां ज्ञानोत्पत्तिसाधनानां सङ्ग्रहः

आत्मनः स्वरूपपरिज्ञानेन एव मोक्षः भवति इति भगवद्गीतायाम् भगवान् श्रीकृष्णः भूयो भूयः अस्मान् उपदिशति। आत्मनः स्वरूपं तु ब्रह्म। तस्मात् मोक्षं यः काङ्क्षति तेन ब्रह्म ज्ञेयम्। मुमुक्षुणा ब्रह्म एव ज्ञेयम् इत्युक्त्या ब्रह्मज्ञानेन एव मोक्षः भवति इति सिद्धम्। एवं स्थिते आपरा शङ्का समुत्पद्यते – इदम् ब्रह्मज्ञानं कथम् प्राप्तव्यम्, अस्य ब्रह्मज्ञानस्य किं किं साधनं विद्यते इति। इमां शङ्कां निवारयन् श्रीभगवान् श्रीमद्भगवद्गीतायाः त्रयोदशे अध्याये ब्रह्मज्ञानस्य साधनानि सङ्गृह्य समुपदिशति। एषां साधनानाम् अभ्यासेन अस्माकम् अन्तःकरणं शुद्ध्यति। शुद्धम् अन्तःकरणं साधनचतुष्टयेन सम्पन्नम् भवति। शुद्धान्तःकरणः साधकः यदा आत्मस्वरूपस्य ब्रह्मणः बोधकानि वेदान्तवाक्यानि शृणोति तस्य अन्तःकरणे ब्रह्मज्ञानं समुदेष्यति, ततश्च सः संसारात् मुक्तः भविष्यति। तथा च भगवता प्रोक्तानि ज्ञानसाधनानि –

**अमानित्वम् अदम्भित्वम् अहिंसा क्षान्तिरार्जवम्।**
**आचार्योपासनं शौचं स्थैर्यम् आत्मविनिग्रहः॥**
**इन्द्रियार्थेषु वैराग्यम् अनहङ्कार एव च।**
**जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम्॥**
**असक्तिरनभिष्वङ्गः पुत्रदारगृहादिषु।**
**नित्यञ्च समचित्तत्वम् इष्टानिष्टोपपत्तिषु॥**
**मयि चानन्ययोगेन भक्तिरव्यभिचारिणी।**
**विविक्तदेशसेवित्वम् अरतिर्जनसंसदि॥**
**अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्।**
**एतज्ज्ञानमिति प्रोक्तम् अज्ञानं यदतोऽन्यथा॥** (**श्रीमद्भगवद्गीता, अध्यायः** १३, **श्लोकाः** ७-११)

इमानि अमानित्वादीनि यस्माद्धि ज्ञानस्य साधनानि भवन्ति तस्मात् एतानि श्रीभगवता ज्ञानशब्देन अभिहितानि – एतज्ज्ञानमिति प्रोक्तम् इति। यथा लोके आयुर्वै घृतम् इति प्रयोगः सम्भवति तथा अयमपि प्रयोगः सम्भवति। घृतभक्षणेन आरोग्यं सेत्स्यति, ततश्च आयुः वर्धते। एवं घृतसेवनेन आरोग्यं ततः दीर्घम् आयुश्च प्राप्यते इत्यतः आयुर्वृद्धेः साधनं घृतम् आयुरेव इति प्रशंस्यते। एवमेव अत्रापि अमानित्वादिभिः साधनैः ज्ञानम् प्राप्यते इति हेतोः अमानित्वादिकं ज्ञानमेव इति प्रशस्यते भगवता।

अमानित्वादीनाम् ब्रह्मज्ञानसाधनानां सामान्यार्थः अधस्तात् प्रदर्श्यते –

अमानित्वम् – आत्मनः श्लाघनम् मानित्वम्। तस्य अभावः अमानित्वम्।

अदम्भित्वम् – स्वधर्मप्रकटीकरणम् दम्भित्वम्। तस्य अभावः अदम्भित्वम्।

अहिंसा – प्राणिनाम् पीडा हिंसा। तस्याः अभावः अहिंसा।

क्षान्तिः – परापराधप्राप्तौ अविक्रिया।

आर्जवम् – ऋजुभावः अवक्रत्वम्।

आचार्योपासनम् – मोक्षसाधनोपदेष्टा आचार्यः। तस्य शुश्रूषादिप्रयोगेण सेवनम्।

शौचम् – शुचिता। कायमलानाम् मृज्जलाभ्याम् प्रक्षालनम्, मनोमलानाञ्च रागादीनाम् प्रतिपक्षभावनया अपनयनम्।

स्थैर्यम् – स्थिरभावः। मोक्षमार्गे एव कृताध्यवसायत्वम्।

आत्मविनिग्रहः – मनसः इन्द्रियाणाञ्च विनिग्रहः। अत्र आत्मशब्देन विशिष्य मनः इन्द्रियादिकञ्च उच्यते।

इन्द्रियार्थेषु वैराग्यम् – इन्द्रियविषयेषु भोगेषु विरागभावः।

अनहङ्कारः – अहङ्काराभावः।

जन्ममृत्युजराव्याधिदुःखदोषानुदर्शनम् – जन्मनि मृत्यौ जरायां व्याधौ च दुःखरूपः दोषः अस्तीति अनुदर्शनम्। जन्म दुःखम्, मृत्युः दुःखम्, जरा दुःखम्, व्याधिः दुःखम् इत्येवम् अनुचिन्तनम्।

असक्तिः – भोगविषयेषु सङ्गराहित्यम्।

पुत्रदारगृहादिषु अनभिष्वङ्गः – पुत्रेषु दारेषु गृहेषु दासवर्गादिषु च अनासक्तिः।

इष्टानिष्टोपपत्तिषु नित्यं समचित्तत्वम् – इष्टानाम् अनिष्टानाञ्च उपपत्तिषु समचित्तत्वम्। उपपत्तिः सम्प्राप्तिः। समचित्तत्वं तुल्यचित्तता।

मयि अनन्ययोगेन अव्यभिचारिणी भक्तिः – ईश्वरे अनन्ययोगेन निश्चला भक्तिः। 'भगवतः परः अन्यः नास्ति, अतः स एव अस्माकम् गतिः' इत्येवं निश्चिता बुद्धिः अनन्ययोगः।

विविक्तदेशसेवित्वम् – शुद्धदेशे वासः।

जनसंसदि अरतिः – संस्कारशून्यानाम् अविनीतानां संसदि अरमणम्।

अध्यात्मज्ञाननित्यत्वम् – आत्मस्वरूपविषके ज्ञाने स्थिरता।

तत्त्वज्ञानार्थदर्शनम् – तत्त्वज्ञानार्थस्य आलोचनम्। तत्त्वज्ञानस्य अर्थः अथवा फलम् अस्ति मोक्षः। मोक्षविषये चिन्तनम् एव तत्त्वज्ञानार्थदर्शनम्।

## पाठसारः

संसाराख्यः बन्धः आत्मस्वरूपस्य ब्रह्मणः अज्ञानेन एव जातः। उपनिषन्मीमांसारूपं वेदान्तशास्त्रम् अस्मान् आत्मस्वरूपम् ब्रह्म बोधयति। तस्मात् अस्मासु यः संसारात् मोक्षम् इच्छति स साधकः गुरोः सविधं गत्वा वेदान्तशास्त्रम् अधीत्य ब्रह्म ज्ञातुम् प्रभवति। ब्रह्मज्ञानम् ब्रह्मविषयकम् अज्ञानं नाशयति। अज्ञाने नष्टे साधकस्य संसारः निवर्तते, आत्मानन्दश्च तेन प्राप्यते। किन्तु इयं संसारनिवृत्तिः रज्जुसर्पन्यायेन निवृत्तस्यैव निवृत्तिः इति ज्ञायते, परमानन्दप्राप्तिश्च कण्ठचामीकरन्यायेन

प्राप्तस्य एव प्राप्तिः इति च अवगम्यते। अज्ञानेन अनिवृत्तस्य ज्ञानेन निवृत्तिः, अज्ञानेन अप्राप्तस्य ज्ञानेन प्राप्तिः इत्यर्थः। तस्मात् मोक्षः नित्यः। अज्ञानम् एव तस्य प्रतिबन्धः इत्यतः मुमुक्षुणा ज्ञानाय एव यत्नः कार्यः।

ब्रह्मज्ञानेन एव मोक्षः भवति। तस्मात् मोक्षस्य साक्षात्साधनम् ब्रह्मज्ञानम् एव। ब्रह्मज्ञानोत्पादकत्वेन अन्यानि साधनानि अपि मोक्षसाधनानि इति उच्यन्ते। इमानि ब्रह्मज्ञानोत्पत्तिसाधनानि त्रिविधानि सन्ति – परम्परासाधनानि, सहकारिसाधनानि, अन्तरङ्गसाधनानि चेति। चित्तशुद्ध्यर्थानि साधनानि परम्परासाधनानि भवन्ति। अन्तरङ्गसाधनानुष्ठाने साधकस्य सहकारकाणि साधनानि सहकारिसाधनानि इत्युच्यन्ते। सहकारिसाधनैः युक्तेन ब्रह्मविद्याधिकारिणा साधकेन अनुष्ठातुं शक्यानि साधनानि अन्तरङ्गसाधनानि। अन्तरङ्गसाधनानुष्ठानेन ब्रह्मविद्या समुत्पद्यते।

## पाठान्तप्रश्नाः

अत्र परीक्षोपयोगिनः प्रष्टव्याः प्रश्नाः प्रदीयन्ते।

१. वेदान्तशास्त्रं वै किम्।

२. वेदान्तशास्त्राध्ययनस्य किम् प्रयोजनम्।

३. मोक्षः कः, स च कथं सिद्ध्यति।

४. मुमुक्षुः ब्रह्मज्ञानं कथम् प्राप्नोति।

५. मोक्षः नित्यः इति कस्मात् उच्यते।

६. रज्जुसर्पन्यायं व्याख्यात।

७. कण्ठचामीकरन्यायं व्याख्यात।

८. ब्रह्मविद्योत्पादकानि मोक्षसाधनानि विशदयत।

९. मोक्षसाधनेषु सोपानक्रमः कथं युज्यते इति व्याख्यात।

१०. अमानित्वादीनि साधनानि कानि।

## पाठगतप्रश्नोत्तराणि।

### पाठगतप्रश्नोत्तराणि-१

१. जन्मजरामरणादिचक्रम् एव संसारः इत्युच्यते। आत्मस्वरूपविषयकम् अज्ञानं संसारस्य कारणम्।

२. आत्मस्वरूपविषयकात् अज्ञानात् एव संसारः सञ्जातः। यदा आत्मविषयकं ज्ञानम् भविष्यति तदा संसारकारणं तत् अज्ञानं नक्ष्यति। अज्ञाने नष्टे संसारः अपि निवर्तते। आत्मविषयकं ज्ञानम् एव



ब्रह्मज्ञानम् इत्यपि उच्यते। तस्मात् ब्रह्मज्ञानेन एव संसारस्य निवृत्तिः भवति।

३. वेदान्तशास्त्रम् उपनिषन्मीमांसाद्वारा आत्मस्वरूपस्य ब्रह्मणः बोधनाय प्रवृत्तम्।

४. साधनचतुष्टयसम्पन्नः एव वेदान्तशास्त्रम् अधीत्य तस्य तात्पर्यभूतम् आत्मस्वरूपम् ब्रह्म ज्ञातुम् प्रभवति। तस्मात् साधनचतुष्टयसम्पन्नः जनः एव वेदान्तशास्त्रे अधिकारी इति उच्यते।

**पाठगतप्रश्नोत्तराणि-२**

५. संसारदुःखस्य आत्यन्तिकनिवृत्तिः, परमानन्दस्य प्राप्तिश्च मोक्षः इत्युच्यते।

६. वैषयिकानन्दः अनित्यः सातिशयश्च भवति। आत्मस्वरूपानन्दः अथवा ब्रह्मानन्दस्तु नित्यः निरतिशयश्च भवति।

७. बह्मज्ञानेन ब्रह्मविषयके अज्ञाने निवृत्ते मोक्षः प्राप्यते।

**पाठगतप्रश्नोत्तराणि-३**

८. मन्दान्धकारे मार्गे रज्जुं दृष्ट्वा कश्चन अयं सर्पः इति चिन्तयन् भ्रान्तः जातः। यदा अपरः जनः अयं सर्पः नास्ति अपि तु रज्जुः अस्तीति तम् बोधितवान् तदा तस्य भ्रान्तिः अपगता। तदा सर्पः निवृत्तः इति सः वदति। किन्तु वस्तुतः सर्पः पूर्वमेव निवृत्तः आसीत्। तथापि स अनिवृत्तः इति भ्रान्तिः आसीत् तस्य जनस्य। रज्जुज्ञानेन यदा सा भ्रान्तिः अपगता तदा निवृत्तस्य एव सर्पस्य निवृत्तिः जाता। अयं दृष्टान्तः रज्जुसर्पन्यायः इत्युच्यते। रज्जुसर्पन्यायात् इदं सिद्ध्यति – निवृत्तस्य अपि निवृत्तिः सम्भवति इति।

९. काचित् महिला तस्याः चामीकरः क्वचित् पतितः सन् अप्राप्तः इति चिन्तितवती। यदा अपरः कश्चन तस्याः कण्ठे एव चामीकरः अस्तीति बोधितवान् तदा चामीकरः प्राप्तः इति सा वदति। किन्तु सदा प्राप्तः एव आसीत् स चामीकरः। भ्रमेण सा तम् अप्राप्तम् अमन्यत। यदा ज्ञानेन भ्रान्तिः अपगता तदा प्राप्तस्य एव चामीकरस्य प्राप्तिः जाता। अयं दृष्टान्तः कण्ठचामीकरन्यायः इत्युच्यते। कण्ठचामीकरन्यायात् इदं सिद्ध्यति – प्राप्तस्य अपि प्राप्तिः सम्भवति इति।

१०. रज्जुसर्पन्यायेन निवृत्तस्य एव संसारदुःखस्य निवृत्तिः, कण्ठचामीकरन्यायेन प्राप्तस्य एव परमानन्दस्य प्राप्तिश्च मोक्षे भवति इत्यतः मोक्षः नित्यः इति अवगम्यते।

११. मोक्षः नित्यश्चेदपि आत्मस्वरूपविषयकेण अज्ञानेन संसारः अनिवृत्तः इति, ब्रह्मानन्दश्च अप्राप्तः इति च वयं चिन्तयामः। तस्मात् वयम् बद्धाः स्म।

**पाठगतप्रश्नोत्तराणि-४**

१२. आत्मविषयकेण अज्ञानेन संसारबन्धः जातः। तस्य अज्ञानस्य निवृत्तिः यदा भवति तदा संसारोऽपि निवर्तते, मोक्षश्च भवति। अज्ञानस्य निवर्तकं केवलं ज्ञानमेव भवति। तस्मात् ज्ञानेन एव मोक्षः भवति इत्युच्यते।

१३. आत्मनः यथार्थं स्वरूपम् ब्रह्म उपनिषत्सु बोधितं विद्यते। तस्माद् आत्मज्ञानाय उपनिषदर्थः ज्ञेयः। तमर्थं निर्णेतुम् उपनिषन्मीमांसारूपम् अद्वैतवेदान्तशास्त्रम् प्रवृत्तम्। तस्मात् मुमुक्षुणा

आत्मज्ञानं वेदान्तशास्त्रात् लब्धुं शक्यते।

१४. ज्ञानेन यः मुक्तः सः नित्यं निरतिशयञ्च ब्रह्मानन्दम् अनुभवति।

### पाठगतप्रश्नोत्तराणि-५

१५. मोक्षस्य साक्षात्साधनम् ब्रह्मज्ञानम्। अत एव ज्ञानेन एव मोक्षः इत्युच्यते।

१६. मोक्षस्य साक्षात्साधनम् ब्रह्मविद्या एवास्ति चेदपि तस्याः उत्पत्तिः अशुद्धे अन्तःकरणे न भवति। तस्मात् ब्रह्मज्ञानार्थम् अन्तःकरणशुद्धिः सम्पादनीया। अन्तःकरणे स्थितानाम् मलानां निवर्तनाय एव कर्मयोगादीनि साधनानि शास्त्रे बोधितानि। अतः ब्रह्मज्ञानातिरिक्तानि सर्वाणि अपि मोक्षसाधनानि अन्तःकरणशुद्धिद्वारा ब्रह्मज्ञानोत्पत्त्यर्थानि भवन्ति।

### पाठगतप्रश्नोत्तराणि-६

१७. यानि ब्रह्मज्ञानोत्पत्तिसाधनानि मोक्षसाधनानि तानि त्रिविधानि भवन्ति। तानि यथा अन्तरङ्गसाधनानि, सहकारिसाधनानि, परम्परासाधनानि चेति।

१८. कर्मयोगः ध्यानयोगः इत्यादीनाम् परम्परासाधनानाम् अनुष्ठानं यः करोति तस्य एव अन्तःकरणं शुद्ध्यति। अन्तःकरणे शुद्धे सति साधनचतुष्टयाख्यं सहकारिसाधनं तस्य सम्पद्यते। शुद्धान्तःकरणः साधनचतुष्टयसम्पन्नश्च नरः एव ब्रह्मविद्योपदेशकानि वेदान्तवाक्यानि श्रुत्वा आत्मस्वरूपम् ब्रह्म साक्षात्करोति। एवञ्च कर्मयोगादिभिः साधनैः अन्तःकरणशुद्धिं साधनचतुष्टयञ्च सम्पाद्य ब्रह्मविद्यायाम् अधिकारी सन् यः श्रवणादिकं करोति स एव ब्रह्मविद्यां लभते इत्यतः साधनानां कश्चन सोपानक्रमः अस्ति इति ज्ञायते।

॥इति पञ्चविंशः पाठः॥

# राष्ट्रियमुक्तविद्यालयीशिक्षासंस्थानम्

## माध्यमिककक्षायाः पाठ्यक्रमः

## भारतीयदर्शनम् (२४७)

### औचित्यम्

सर्वेऽपि जन्तव इष्टं लब्धुम् इच्छन्ति। अनिष्टं परिहर्तुम् इच्छन्ति। सुखम् इष्टम् दुःखं हि अनिष्टम्। अत एव सुखस्य उपायः अपि इष्टः। दुःखस्य उपायः अपि अनिष्टः। तत्र सुखं द्विविधम्। नित्यम् अनित्यं च। नित्यं सुखम् आत्मसुखम्। तत् जन्यम् नास्ति। न केनापि कारणेन तत् सुखम् उत्पद्यते। तत् सुखम् तु आत्मस्वभावः एव। अनित्यम् सुखम् जन्यम् अस्ति। तस्य किमपि कारणम् अस्ति। अनित्यसुखस्य कारणं हि धर्मः। धर्मं विना सुखं नैव भवति। धर्मोऽपि जन्यः अस्ति। वेदविहितयागादिः धर्मः। तद्यागादिजन्यः पुण्याख्यः अदृष्टविशेषो वा धर्मः। धर्मः अन्तःकरणे विद्यमानः कश्चित् गुणविशेषः।

दुःखस्य किमपि कारणं तु स्यादेव। सुखं वा दुःखं वा कारणं विना नैव उत्पद्येते। सुखस्य किं कारणम् इति यथायथम् असन्दिग्धं च ज्ञानम् आवश्यकम्। तेन इष्टं यत् सुखं तस्य यत् साधनं तत्र निष्ठया प्रवृत्तिः भवेत्। किञ्च सुखस्य कति भेदाः सन्ति तदपि स्पष्टं जानीयात्। इत्थम् 'इदं मदिष्टसाधनम्' इति ज्ञानम् प्रवृत्तिं प्रति कारणं भवति।

पुरुषः नरो वा नारी वा यद् कामयते इच्छति अर्थयते स एव पुरुषार्थः। पुरुषः सुखमेव अर्थयते। अतः सुखमेव हि पुरुषार्थः सकलप्राणिसाधारणः। सुखस्य प्रकाराः सन्ति। अतः एव पुरुषार्थस्य प्रकाराः सन्ति। नित्यसुखं हि मोक्षः कथ्यते। अनित्यसुखं हि कामः कथ्यते। कामस्य कारणं हि धर्मः कथ्यते। धर्मस्य साधनं हि अर्थः कथ्यते। अर्थो हि धर्मस्य सामग्री धनादिकम्। एवं धर्मार्थकाममोक्षाः चत्वारः पुरुषार्थाः सुप्रसिद्धा वैदिकसंस्कृतौ। तेषु काममोक्षौ मुख्यौ। कामस्य साक्षात् कारणं धर्मः। धर्मस्य प्रयोजकः अर्थः। कामलाभाय एव धर्मः अर्थः च सेव्यते नान्यथा। अथः धर्मार्थौ गौणौ। मुख्ययोः काममोक्षयोः अपि मोक्षः नित्यः। अतः मोक्षः एव परमः पुरुषार्थः। अर्थः अनित्यः इति प्रत्यक्षेण ज्ञायते। इन्द्रियजन्यं सुखम् क्षणिकम् इति तदपि अनित्यमेव इति अनुभवसिद्धम्। अनित्यसुखस्य कारणं धर्मः अपि अर्थात् अनित्यः एव। न हि कारणसत्त्वे कार्याभावः भवति।

वेदान्ते श्रुतिः तदुनुकूला युक्तिः अनुभवश्च इति एतत् त्रितयम् सदा प्रमाणत्वेन उपन्यस्यते।

यत्कृतकं तदनित्यम् इति नियमः दृष्टानुमानोभयसिद्धः। धर्मः कर्मजन्यः। अतः अनित्यः। कामः धर्मजन्यः। अतः अनित्यः। इत्थं सिद्धम् यत् मोक्षः एव परमः पुरुषार्थः नित्यत्वात्। मोक्षः ब्रह्मज्ञानाद् भवति इति अद्वैतवेदान्तस्य सिद्धान्तः। अतः ब्रह्म किम्। तज्ज्ञानं किम्। तल्लाभस्य प्रमाणं किमिति जिज्ञासा। तन्निवृत्तये अद्वैतवेदान्तमतानुकूलानि प्रकरणानि अत्र सन्ति।

सर्वेऽपि दार्शनिका जीवानां सुखवाञ्छापूर्णार्थं यतन्ते। परन्तु सुखसाधनविषये स्वरूपविषये च तेषु नैके मतभेदाः सन्ति।

दशमकक्षायाः ग्रन्थे समेषामपि दर्शनानाम् सामान्यः परिचयः विद्यते। वेदान्तस्य प्रस्थानानाम् वेदान्तसम्पदायानां च विशेषः परिचयः विद्यते। एवञ्च अद्वैतवेदान्तानुसारम् संक्षेपेण केचिद् विषया उपन्यस्ताः। तेन अद्वैतवेदान्ते यथाप्रक्रियं प्रवेशः भवेत्। विशेषः परिचयः भवेत्।

दशमकक्षायाः पाठानां सम्यक् अध्ययनं विधाय द्वादशकक्षायाः पाठा अध्येतव्या। तेन विषयस्यास्य सुष्ठु ज्ञानं भविष्यति। दशमकक्षायाः पाठस्य भित्तिरूपेण माहात्म्यम् अस्ति।

इत्थम् बहुभिः प्रकारैः पाठ्यक्रमः छात्रहिताय निर्मितः। तेन दार्शनिकतत्त्वानि सुगमानि भविष्यन्ति इति आशास्महे।

## अधिकारी

अयं पाठ्यविषयः सम्पूर्णरूपेण संस्कृतभाषया लिखितः अस्ति। परीक्षा अपि संस्कृतमाध्यमेन एव भविष्यति। अतः अस्य पाठस्य कः अधिकारी इति नूनम् समुदेति प्रश्नः।

अत्र स छात्रः अधिकृतः यः -

- अधीतकाव्यव्याकरणकोषः अनधीतदर्शनशास्त्रः दर्शनं दिदृक्षुः मुमुक्षुश्च।
- न्यायशास्त्रस्य तर्कसंग्रह इति ग्रन्थं दीपिकासहितं जानाति।
- न्यायभाषाम् अर्थात् न्यायशास्त्रस्य शैलीं जानाति।
- सरलसंस्कृतं, संस्कृतसाहित्यास्य सरलगद्यांशान् पद्यांशान् च पठितुम् बोद्धुं च शक्नोति।
- सरलसंस्कृतं बोद्धुं शक्नोति।
- स्वभावं संस्कृतभाषया लिखित्वा प्रकटयितुं शक्नोति।

## प्रयोजनम् (सामान्यम्)

माध्यमिकस्तरे भारतीयदर्शनस्य पाठ्यत्वेन योजनस्य कानिचन उद्देशानि अत्राधो दीयन्ते।

१. जीवनस्य चरमलक्ष्यं सुखलाभः। इह परत्र च। तद्विषयकं स्पष्टं ज्ञानं छात्रस्य भवतु इति लक्ष्यम्।

२. बहूनि दर्शनानि सुखप्रतिपादनाय प्रवृत्तानि विरुध्यन्ते। तेषु विरोधस्य कानि कारणानि इति ज्ञात्वा छात्रः सूक्ष्मं चिन्तनं कर्तुम् प्रभवेत्।

३. जीवने विभिन्नानां दार्शनिकसम्प्रदायानां परस्परकलहस्य कारणं ज्ञात्वा तेषु सौहार्दस्य निर्माणाय प्रयतेत इति सामर्थ्यम् छात्रस्य जायताम्।

४. स्वस्य स्वपरिचितानां च जीवनं दर्शनमवलम्ब्य नेतुम् शक्नुयात्।

५. भारतीयदर्शनस्य महिमानम् अवगम्य तस्य प्रचारे बद्धादरः सश्रद्धं प्रवर्तताम्।

६. अति प्राचीनाया भारतीयज्ञानसम्पदः वैज्ञानिकतां सर्वजनोपकारितां महिमानं च सगर्वं जगति प्रसारयेत् छात्रः।

७. दर्शनस्य सामान्यज्ञानवर्धनं भविष्यति येन दार्शनिकग्रन्थानाम् सरलान् अंशान् पठित्वा छात्राः तेषाम् अंशानाम् अर्थान् ज्ञास्यन्ति। ते स्वतः मौखिकीं लिखितां च अभिव्यक्तिं कर्तुं शक्ष्यन्ति।

८. दर्शनाध्ययनेन छात्राः महाविद्यालयस्तरे विश्वविद्यालयस्तरे च प्रवर्तमानेषु पाठ्यक्रमेषु अध्ययनार्थम् अवसरं प्राप्तुं समर्थाः भविष्यन्ति।

९. दार्शनिकचिन्तने रुचिमन्तः भूत्वा शक्ताः संलग्नाश्च भविष्यन्ति।

## प्रयोजनम् (विशिष्टम्)

**दर्शने प्रवेशस्य सामर्थ्यम्**

१०. दर्शने के विषया अन्तर्भवन्ति इति सामान्यज्ञानं भवेत्।

११. आस्तिकनास्तिकदर्शनभेदस्य ज्ञानं भवेत्।

१२. नास्तिकानां सिद्धान्तानाम् आचार्याणां ग्रन्थानां परम्पराणां सामान्यं ज्ञानं भवेत्। तेन तद्दर्शनस्य अधिकपठने मतिः जायेत।

१३. आस्तिकानां दर्शनस्य सिद्धान्तानाम् आचार्याणां ग्रन्थानां परम्पराणां सामान्यं ज्ञानं भवेत्। तेन तद्दर्शनस्य अधिकपठने प्रवर्तते।

१४. पठितसामग्रीम् आश्रितानां प्रश्नानाम् उत्तराणि दास्यन्ति।

**दर्शनाध्ययने सामर्थ्यम्**

१५. प्रस्थनात्रयस्य सविस्तरं ज्ञानं भवेत्। तेन तेषाम् प्रस्थानानाम् इतोऽपि अग्रे सविस्तरम् अध्ययने प्रवर्तेत।

१६. अद्वैतवेदान्तमतेन ब्रह्म माया जीव ईश्वरः अध्यारोपः अपवादः मोक्षः तत्साधनानि इत्यादीनां बहूनां विषयाणां ज्ञानं भवेत्।

१७. अस्य पाठ्यविषयस्य ज्ञानेन तस्मिन् दर्शने विद्यामानानाम् अन्येषाम् आकरग्रन्थानाम् अध्ययने समर्थो भवेत्।

**दर्शनप्रयोगस्य सामर्थ्यम्**

१८. दर्शनस्य स्पष्टं ज्ञानं प्राप्य स्वस्य जीवने तस्य प्रयोगं कृत्वा कृतकृत्यो भविष्यति।

१९. यथा वैद्यः जनं दृष्ट्वा तस्य रोगादिकं चिन्तयति। चौरः वित्तकाषादिकं चिन्तयति। वणिक् क्रेतारम् पश्यति। तथा जगतः दार्शनिकरूपेण दर्शने समर्थो भवेत्।

२०. अन्येषामपि दिग्भ्रान्तानां जनानां जीवने पथप्रदर्शकप्रदीपवत् सहायो भविष्यति।

## पाठ्यसामग्री

**पाठ्यक्रमेण सह निम्नलिखितसामग्री समायोजिता भविष्यति-**

- द्वे मुद्रिते पुस्तके।
- एकं शिक्षकाङ्कित-मूल्याङ्कनप्रपत्रम् प्रदास्यते। अनेन सह छात्रैः एकं परियोजनाकार्यमपि (Project) करणीयम्।
- दर्शनस्य शिक्षणं प्रायोगिकरूपेण अपि भविष्यति। परन्तु प्रायोगिकपरीक्षा कापि नास्ति।
- पाठनिर्माणे संपर्ककक्षासु च अध्यापनकाले छात्रेषु जीवनकौशलानां सम्यक् विकासः भवेत् इति ध्यातव्यम् भविष्यति। अनेन तेषु स्वतः युक्तिसमन्वितचिन्तनशक्तेः विकासः भविष्यति।
- मुक्तविद्यालये प्रवेशोत्तरं पाठ्यक्रममिमं विद्यार्थी एकवर्षत: अधिकाधिकं पञ्चवर्षेषु पूरयितुं शक्नोति।

## अङ्कमूल्यायनप्रविधिः परीक्षायोजना च

- पत्रस्य (१००) शतम् अङ्काः सन्ति। परीक्षाकालः होरात्रयात्मकः। अस्य पत्रस्य लिखितस्वरूपमेवास्ति (Theory)। प्रायोगिकरूपं (Practical) किमपि नास्ति। क्रमिकम् (Formative) समुच्चितं (Summative) चेति द्विविधं मूल्यायनं भविष्यति।
- **क्रमिकं मूल्यायनम् -** विंशतेः अङ्कानां (२०) शिक्षकाङ्कितस्य कार्यस्य (TMA) एकं पत्रं स्यात्। अस्य मूलायनम् अध्ययनकेन्द्रे (Study Centre) भवेत्। अस्य कार्यस्य अङ्काः अङ्कपत्रिकायां (Marks sheet) पृथक् उल्लिखिताः स्युः।
- **समुच्चितं मूल्यायनम् -** वर्षे वारद्वयं (मार्चमासि अक्टोबरमासि च) बाह्यपरीक्षा भविष्यति। तत्र परीक्षायां समुच्चितं मूल्यायनं भविष्यति।
- प्रश्नपत्रे ज्ञानम् (Knowledge), अवगमम् (Understanding) अभिव्यक्तिं (Application skill) चावलम्ब्य युक्तानुपातेन प्रश्नाः समाविष्टाः स्युः।
- परीक्षासु अतिलघूत्तरात्मक- लघूत्तरात्मक-निबन्धात्मक-प्रश्नानामपि समावेशः भविष्यति।

- सूत्रार्थः सूत्रव्याख्या रूपसाधनम् इति त्रयो मुख्याः विषयाः स्युः। अन्ये प्रसक्तानुप्रसक्ताः केचिद् विषयाः अपि स्युरिति अवधेयम्।
- उत्तीर्णतायै पणः (condition) - प्रतिशतं त्रयस्त्रिंशद् (३३%) अङ्काः उत्तीर्णतायै पणः (मानदण्डः) वर्तते।
- संस्थानस्य परीक्षायाम् उत्तरलेखनभाषा - संस्कृतम् (अनिवार्यम्)

## अध्ययनयोजना

- निर्देशभाषा (Medium of instruction) - संस्कृतम्।
- स्वाध्यायाय कालावधिः (Self-study hours) २४० होराः
- न्यूनतः त्रिंशत् (३०) सम्पर्ककक्षाः (Personal Contact Programme - PCP) अध्ययनकेन्द्रेषु भविष्यन्ति।
- भारांशः - सैद्धान्तिकः (Theory) शतं प्रतिशतम्। प्रायोगिकम् (Practical) - नास्ति।

## अङ्कविभाजनम्

अग्रे सारण्यां द्रष्टव्यम्

## पाठ्यविषयस्य उद्देशः (पाठ्यविषयबिन्दवः)

माध्यमिककक्षाया भारतीयदर्शनस्य पुस्तके निम्नविषयाः अन्तर्भवन्ति। विवरणमधस्तादुपन्यस्यते।-

समग्रस्य पाठ्यविषयस्य त्रयो भागाः प्रकल्पिताः सन्ति। प्रतिभागम् कति पाठाः, स्वाध्यायाय कति होराः, सैद्धान्तिकपरीक्षायाम् कियान् अंशः, प्रायोगिकपरीक्षायाम् कियान् अंशः, प्रत्यध्यायम् अङ्कविभाजनं चेति विषयाः अत्र प्रदीयन्ते।

## अध्यायः - १ दर्शनप्रस्थानपरिचयः (पाठाः १-४)

**अध्यायस्य औचित्यम्**

महर्षिः कपिलो हि जन्मना सिद्धः। सर्वेषामपि दर्शनानां तद्दर्शनादेव प्रारम्भः। एवञ्च कपिलस्य सांख्यदर्शनं वेदान्तस्य अति निकटम्। मुख्यः पूर्वपक्षः च। सांख्यानां गुणविचारः पुरुषविचारः सृष्टिविचारः इत्यादिकम् अद्वैतवेदान्ते किञ्चित् परिवर्तनेन गृहीतं दृश्यते। अतः पूर्वपक्षत्वेन मूलत्वेन च सांख्यानाम् अध्ययनम् अत्यन्तम् आवश्यकमिति हेतोः अत्र सांख्यदर्शनस्य प्रोक्ताः विषयाः अत्र उपन्यस्याः।

## अध्यायः - २ नास्तिकदर्शनानि (पाठाः - ५-७)

**अध्यायस्य औचित्यम्**

सनास्तिकदर्शनेषु चार्वाकाः बौद्धाः जैनाश्च मुख्याः। तेषां दर्शनानां स्वरूपं भेदाः आचार्याः ग्रन्थाः ऐतिहासिकता सम्प्रदायाः इत्यादिविषयाः अत्र प्रतिपादयिष्यन्ते।

## अध्यायः - ३ आस्तिकदर्शनानि (पाठाः - ८-१४)

**अध्यायस्य औचित्यम्**

आस्तिकदर्शनानि हि न्यायः वैशेषिकम् सांख्यम् योगः मीमांसा वेदान्तश्चेति षट्। तेषां स्वरूपं भेदाः आचार्याः ग्रन्थाः ऐतिहासिकाता प्रभावः प्रमाणानि इतीमे विषया अत्र प्रतिपादनीयाः।

## अध्यायः - ४ अद्वैतवेदान्तः (पाठाः - १५-२३)

**अध्यायस्य औचित्यम्**

जानन्तु नाम दर्शनानि सामान्यतः छात्राः। तथापि कस्मिन्नपि एकस्मिन् दर्शने छात्रस्य प्रक्रियापुरःसरं ज्ञानम् आवश्यकम्। यतो हि तेन तेन दर्शनेन स्वस्य सिद्धान्ताः कथं सिद्धान्तिताः, काभिः युक्तिभिः समर्थिताः, युक्तिप्रदर्शनस्य प्रमाणानि वा कानि इत्यादिसर्वमपि सविस्तरं ज्ञातव्यम् भवति छात्रेण। अतः दर्शनेषु मूर्धन्यस्य दर्शनस्यैव सविस्तरं परिचयो भवतु इति धिया अद्वैतवेदान्तस्य प्रकरणशः विभागं परिकल्प्य दशमश्रेण्यां कानिचन प्रकरणानि स्थापितानि। द्वादश्यां च अवशिष्टानि सन्ति। तत्र अनुबन्धचतुष्टयं ब्रह्म माया ईश्वरः जीवः मोक्षः तत्साधनमितीमे विषयाः अत्र प्रतिपाद्याः सन्ति।

## पाठ्यविषयस्य उद्देशः (पाठ्यविषयबिन्दवः)

माध्यमिककक्षायाः भारतीयदर्शनस्य पुस्तके निम्नविषयाः अन्तर्भवन्ति -

| क्र.सं. | | मुख्यबिन्दवः | स्वाध्यायाय होराः | भारांशः (अङ्काः) |
|---|---|---|---|---|
| १ | **अध्यायः- १** | **दर्शनविद्याप्रस्थानपरिचयः-** | ५० | २० |
| | पाठः - १ | दर्शनपरिचयः- दर्शनपदार्थः, दर्शनस्य आवश्यकता, व्यापकता, प्रवृत्तिः, मूलम्, विशेषता, दर्शनेषु मतभेदस्य कारणानि, प्रमाणानि इत्यादिकम् | | |
| | पाठः - २ | भारतीयविद्याविभागः- भारतीयविद्याविभाजनस्य विविधाः प्रकाराः। | | |
| | पाठः - ३ | भारतीयविद्यापरिचयः-१- वेदवेदाङ्गपरिचयः | | |
| | पाठः - ४ | भारतीयविद्यापरिचयः-२- उपाङ्गानाम् उपवेदानां च परिचयः। | | |
| | पाठः - ५ | प्रस्थानत्रयम्- श्रुतिस्मृतिन्यायप्रस्थानानि । स्मृतिप्रस्थाने भगवद्गीतया सह भागवतादिपुराणानाम् अष्टावक्रसंहितादीनाञ्च अन्तर्भावः। | | |
| | पाठः - ६ | प्रस्थानत्रयम्- श्रुतिस्मृतिन्यायप्रस्थानानि । स्मृतिप्रस्थाने भगवद्गीतया सह भागवतादिपुराणानाम् अष्टावक्रसंहितादीनाञ्च अन्तर्भावः। | | |
| २ | **अध्यायः- २** | **नास्तिकदर्शनानि-** | ३० | १२ |
| | पाठः - ७ | चार्वाकदर्शनम्- दर्शनाभिधानस्य व्युत्पत्तिः, इतिहासः, आचार्याः, मूलशास्त्राणि, प्रमाणानि, प्रमेयानि, मोक्षः इत्यादीनां विचारः। | | |
| | पाठः - ८ | बौद्धदर्शनम्- दर्शनाभिधानस्य व्युत्पत्तिः, इतिहासः, आचार्याः, मूलशास्त्राणि, प्रमाणानि, प्रमेयानि, मोक्षः इत्यादीनां विचारः। | | |
| | पाठः - ९ | आर्हतदर्शनम्- दर्शनाभिधानस्य व्युत्पत्तिः, इतिहासः, आचार्याः, मूलशास्त्राणि, प्रमाणानि, प्रमेयानि, मोक्षस्वरूपम्, मोक्षसाधनम् इत्यादीनां विचारः। | | |

| | | | | |
|---|---|---|---|---|
| ३ | **अध्यायः- ३** | **आस्तिकदर्शनानि-** | ७५ | ३२ |
| | पाठः - १० | न्यायवैशेषिकदर्शने- दर्शनाभिधानस्य व्युत्पत्तिः, इतिहासः, आचार्याः, मूलशास्त्राणि, पदार्थाः- प्रमेयप्रमाणानादीनि, मोक्षः इत्यादीनां विचारः। | | |
| | पाठः - ११ | न्यायवैशेषिकदर्शने- दर्शनाभिधानस्य व्युत्पत्तिः, इतिहासः, आचार्याः, मूलशास्त्राणि, पदार्थाः, प्रमाणानि, मोक्षः इत्यादीनां विचारः। | | |
| | पाठः - १२ | सांख्यदर्शनम्- दर्शनाभिधानस्य व्युत्पत्तिः, इतिहासः, आचार्याः, मूलशास्त्राणि, प्रमाणानि, प्रमेयानि, मोक्षः इत्यादीनां विचारः। | | |
| | पाठः - १३ | योगदर्शनम्- दर्शनाभिधानस्य व्युत्पत्तिः, इतिहासः, आचार्याः, मूलशास्त्राणि, प्रमाणानि, प्रमेयानि, मोक्षस्वरूपम्, मोक्षसाधनम् इत्यादीनां विचारः। किञ्च योगोपनिषदाम् परिचयः, हठयोगादिविभिन्नयोगसम्प्रदायानाम् परिचयः। विवेकानन्दस्वामिनां योगदर्शनमधि उपदेशाः। | | |
| | पाठः - १४ | मीमांसादर्शनम्- दर्शनाभिधानस्य व्युत्पत्तिः, इतिहासः, आचार्याः, मूलशास्त्राणि, प्रमाणानि, प्रमेयानि, मोक्षस्वरूपम्, मोक्षसाधनम् इत्यादीनां विचारः। | | |
| | पाठः - १५ | वेदान्तदर्शनम्- दर्शनाभिधानस्य व्युत्पत्तिः, इतिहासः, आचार्याः, मूलशास्त्राणि, प्रमाणानि, प्रमेयानि, मोक्षस्वरूपम्, मोक्षसाधनम् इत्यादीनां विचारः। किञ्च अद्वैतादीनां वेदान्तसम्प्रदायगतानाम् भिन्नानाम् मतानाम् भूमिका। | | |
| | पाठः - १६ | वेदान्तदर्शनम्-दर्शनाभिधानस्य व्युत्पत्तिः, इतिहासः, आचार्याः, मूलशास्त्राणि, प्रमाणानि, प्रमेयानि, मोक्षस्वरूपम्, मोक्षसाधनम् इत्यादीनां विचारः। अद्वैतादीनां वेदान्तसम्प्रदायगतानाम् भिन्नानाम् मतानाम् भूमिका। | | |
| ४ | **अध्यायः- ४** | **अद्वैतवेदान्तः-** | ८५ | ३६ |
| | पाठः - १७ | अनुबन्धचतुष्टयम्- अधिकारिविषयसम्बन्धप्रयोजनानि । | | |
| | पाठः - १८ | ब्रह्म- स्वरूपतटस्थलक्षणानि । समन्वयाधिकरणमाश्रित्य ब्रह्मतत्त्वप्रबोधनम् । | | |
| | पाठः - १९ | माया- वेदान्तसारस्थानि पञ्च लक्षणानि । विवेकचूडामण्यादिप्रकरणेभ्य प्रसिद्धश्लोकानाम् उद्धृतयः। | | |
| | पाठः - २० | ईश्वरः- प्रतिबिम्बदृष्टान्तमुखेन अवच्छेददृष्टान्तमुखेन च ईश्वरस्वरूपबोधनम्। | | |
| | पाठः - २१ | जीवः- प्रतिबिम्बदृष्टान्तमुखेन अवच्छेददृष्टान्तमुखेन च ईश्वरस्वरूपबोधनम्। | | |
| | पाठः - २२ | अध्यारोपापवादौ- अध्यारोपापवादयोः आवश्यकता, स्वरूपम्, दृष्टान्ताः, सृष्टिश्रुतिभिः अस्य न्यायस्य सम्बन्धः। | | |
| | पाठः - २३ | मोक्षोपायः - बहिरङ्गसाधनम् - कर्म, भक्तिः. उपासना । यज्ञदानतपांसि । | | |
| | पाठः - २४ | मोक्षोपायः - अन्तरङ्गसाधनम् - श्रवणमनननिदिध्यासनानि । समाधिः। | | |
| | पाठः - २५ | मोक्षः- मोक्षस्वरूपम् । प्राप्तप्राप्ति-परिहृतपरिहारन्यायमाश्रित्य दृष्टान्तमुखेन विवरणम्। | | |

# प्रश्नपत्रस्य प्रारूपम् (Question Paper Format)

विषयः - भारतीयदर्शनम् (२४७) (Bharatiya Darshan) स्तरः- माध्यमिककक्षा

परीक्षाकालावधिः (Time)- होरात्रयम् (३ hrs) पूर्णाङ्काः (Full Marks)- १००

## लक्ष्यानुसारि अङ्कविभाजनम्

| विषयाः | अङ्काः | प्रतिशतं योगः |
|---|---|---|
| ज्ञानम् (Knowledge) | २५ | २५% |
| अवबोधः (Understanding) | ४५ | ४५% |
| अनुप्रयोगकौशलम् (Application Skill) | ३० | ३०% |
| **महायोगः->** | **१००** | |

## प्रश्नप्रकारेण अङ्कभारविभाजनम्

| प्रश्नप्रकारः | प्रश्नसंख्या | अङ्काः | योगः |
|---|---|---|---|
| दीर्घोत्तरीयप्रश्नाः (LA) | ५ | ६ | ३० |
| लघूत्तरात्मकप्रश्नाः (SA) | १० | ४ | ४० |
| सुलघूत्तरीयप्रश्नाः (VSA) | १० | २ | २० |
| बहुविकल्पीयप्रश्नाः एकाङ्कप्रश्नाः स्तम्भमेलनं रिक्तस्थानपूर्तिः च | १० | १ | १० |
| **महायोगः->** | **३५** | | **१००** |

## पाठ्यविषयविभागानुसारि भारांशः

| विषयघटकाः | अङ्काः | स्वाध्यायाय होराः |
|---|---|---|
| १. दर्शनविद्याप्रस्थानपरिचयः | २० | ५० |
| २. नास्तिकदर्शनानि | १२ | ३० |
| ३. आस्तिकदर्शनानि | ३२ | ७५ |
| ४. अद्वैतवेदान्तः | ३६ | ८५ |
| **महायोगः ->** | **१००** | **२४०** |

## प्रश्नपत्रस्य काठिन्यस्तरः

| प्रश्नस्तरः | अङ्काः |
|---|---|
| कठिनः (Difficult) (मेधावी एव उत्तरदाने समर्थः) | २५ |
| मध्यमः (Medium) (नित्यं पठन् अध्यवसायी छात्रः उत्तरदाने समर्थः) | ५० |
| सरलः (Easy) (समग्रां पाठसामग्रीम् अल्पशः पठन् छात्रः उत्तरदाने समर्थः) | २५ |

# प्रश्नपत्रप्रतिमा

अस्मिन् प्रश्नपत्रे ... प्रश्नाः सन्ति। .... मुद्रितपुटानि च सन्ति।

| Roll No. अनुक्रमाङ्कः | ४ | ५ | ० | १ | ५ | ९ | १ | ८ | ३ | ० | ० | १ | Code No. गूढसंख्या | ५५/SS/A/S |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|

SET स्तबकः **A**

# भारतीयदर्शनम्

## Bharatiya Darshan

## (२४७)

Day and Date of Examination
परीक्षादिनं दिनाङ्कश्च ..... ____________________

Signature of two Invigilators
निरीक्षकयोः हस्ताक्षरम् १) ____________________

२) ____________________

## सामान्या निर्देशाः

१. अनुक्रमाङ्कः प्रश्नपत्रस्य प्रथमपुटे नूनं लेख्यः।

२. निरीक्ष्यताम् यत् प्रश्नपत्रस्य पुटसंख्या प्रश्नानां च संख्या प्रथमपुटस्य प्रारम्भे प्रदत्तसंख्या समाना न वा। प्रश्नक्रमः सम्यग् न वा।

३. वस्तुनिष्ठप्रश्ननाम् (क), (ख), (ग), (घ) एषु विकल्पेषु युक्तम् उत्तरं चित्वा उत्तरपत्रे लेख्यम्।

४. समेषां प्रश्नानाम् उत्तराणि निर्धारितसमये एव लेख्यानि।

५. उत्तरपत्रे आत्मपरिचयात्मकं लेखनम् अथवा निर्दिष्टस्थानं विहाय अन्यत्र क्वापि अनुक्रमाङ्कलेखनं सर्वथा वर्जितमस्ति।

६. स्वस्य उत्तरपत्रे प्रश्नपत्रस्य गूढसंख्या नूनं लेख्या।

७. समेषां प्रश्नानाम् उत्तराणि संस्कृतभाषया एव लेख्यानि।

# भारतीयदर्शनम् (Bharatiya Darshan)

## (२४७)

**परीक्षासमयावधिः (Time) होरात्रयम् (३ Hrs)** **पूर्णाङ्काः (Full Marks) - १००**

**निर्देशाः -**

१) अस्मिन् प्रश्नपत्रे [A] भागे १०, [B] भागे १०, [C] भागे १०, [D] ५ इति आहत्य ३५ प्रश्नाः सन्ति।

२) प्रश्नस्य दक्षिणे पार्श्वे संख्यासु (अङ्काःx प्रश्नाः=पूर्णाङ्काः) इति एवम् अङ्कान् निर्दिशति।

३) समे प्रश्ना अनिवार्याः।

[A] दशानां युक्तं विकल्पं चिनुत। १ x १०=१०

१) जन्माद्यस्य यतः इति सूत्रे ब्रह्मणः कति लक्षणानि उक्तानि।

(क) २ (ख) १ (ग) ३ (घ) ४

२) व्यष्टिस्थूलशरीराभिमानी कः।

(क) वैश्वानरः (ख) विश्वः (ग) प्राज्ञः (घ) ईश्वरः

३) जैनमते ज्ञानस्य कति प्रकाराः।

(क) ५ (ख) ६ (ग) ४ (घ) ७

४) अनेकान्तवादिनः के।

(क) चार्वाकाः (ख) जैनाः (ग) बौद्धाः (घ) वेदान्तिनः

५) चार्वाकनये कति प्रमाणानि।

(क) २ (ख) ३ (ग) १ (घ) ४

६) चार्वाकाणां मते प्रमा का।

(क) प्रत्यक्षम् (ख) अनुमितिः (ग) उपमितिः (घ) शाब्दी

७) लिङ्गप्रमाणापेक्षया किं प्रमाणं बलवत्।

(क) श्रुतिः (ख) वाक्यम् (ग) स्थानम् (घ) समाख्या

८) भाट्टमते प्रमेयाणां संख्या का।

(क) ४ (ख) ५ (ग) ९ (घ) १२

९) अज्ञानं त्रिगुणात्मकम् इति के न मन्यन्ते।

(क) सांख्याः (ख) नैयायिकाः (ग) योगिनः (घ) वेदान्तिनः

१०) यथोर्णनाभिः इत्यादिमन्त्रः कस्याम् उपनिषदि वर्तते।

(क) कठोपनिषद् (ख) ईशोपनिषद् (ग) मुण्डकोपनिषद् (घ) माण्डुक्योपनिषद्

[B] दशानां यथानिर्देशम् उत्तराणि लिखत। २ x १०=२०

१) ब्रह्मसूत्रे कति अध्यायाः। के च ते। १+१=२

२) कः तैजसः। कः हिरण्यगर्भः। १+१=२

३) चार्वाकाणाम् अपरं नाम किम्। प्रथमतीर्थङ्करः कः। १+१=२

४) चार्वाकमते कति तत्त्वानि। जैनदर्शनमते कति प्रमाणानि। १+१=२

५) अर्थापत्तेः भेदान् लिखत। वेदान्तपरिभाषाकारमते अर्थापत्तेः लक्षणं किम्। १+१=२

६) अद्वैतशब्दस्य अर्थं दर्शयत। अद्वैते जगत् कीदृशम्। १+१=२

७) सांख्यकारिकायाम् सत्कार्यमुपपादयितुम् कति युक्तयः उपन्यस्ताः। काश्च ताः। १+१=२

८) ब्रह्मणः सगुणत्वप्रतिपादिनी एका श्रुतिः एका स्मृतिश्च उदाह्रियताम्। १+१=२

९) अज्ञानलक्षणं किम्। तत् जगतः कीदृशं कारणम्। १+१=२

१०) दश विद्यास्थानानि कानि। १+१=२

**[C] दश अनतिदीर्घोत्तरैः समाधत्त। ४ x १०=४०**

१) भगवतः श्रीकृष्णस्य स्वरूपं निर्णयत। अथवा बृहदारण्यकस्य विषयसंक्षेपं कुरुत।

२) जैनदर्शनानुसारं मोक्षतत्त्वं प्रतिपादयत।

३) मीमांसामतानुसारम् अनुपलब्धिप्रमाणं विस्तरेण आलोचयत। अथवा मीमांसामतानुसारम् अर्थापत्तिप्रमाणम् आलोचयत।

४) अद्वैतवेदान्ते ब्रह्मस्वरूम् आलोचयत। अथवा अद्वैतवेदान्तानुसारं मायाया वैशिष्ट्यं विशदयत।

५) द्वैतवेदान्तदर्शनदिशा मोक्षस्वरूपं वर्णयत। अथवा विशिष्टाद्वैतदर्शनदिशा ईश्वरसूरूपम् आलोचयत।

६) ब्रह्मणः तटस्थलक्षणम् आलोचयत। अथवा बिम्बप्रतिबिम्बदिशा परमेश्वरस्वरूपम् आलोचयत।

७) ब्रह्मणः स्वरूपलक्षणम् आलोचयत। अथवा अद्वैतवेदान्तानुसारम् अर्थाध्यासं वर्णयत।

८) अज्ञानस्य त्रिगुणात्मकत्वं वर्णयत। अथवा अवच्छेदवादानुसारम् ईश्वरस्वरूपं वर्णयत।

९) ब्रह्मशब्दस्य व्युत्पत्तिम् उल्लिख्य तस्य अर्थं निरूपयत। अथवा किं नाम मुमुक्षुत्वम्।

१०) कर्मभेदान् आलोचयत। अथवा को नाम अपवादः।

**[D] पञ्च दीर्घोत्तरैः समाधेयाः। ६ x ५=३०**

१) न्यायप्रस्थानविषये प्रबन्धं लिखत। अथवा गीतानुसारि आत्मनः स्वरूपं प्रतिपादयत।

२) सांख्यमतानुसारं सत्कार्यवादं वर्णयत। अथवा सांख्यदर्शनानुसारं सृष्टिक्रमं वर्णयत।

३) विशिष्टाद्वैतदर्शनदिशा प्रमाणविचारं कुरुत। अथवा अद्वैते कथं निर्गुणं ब्रह्म जगतः उपादानकारणं निमित्तकारणं च भवति।

४) अज्ञानस्य अनिर्वचनीयत्वं निरूपयत। अथवा अज्ञानभेदान् विचारयत।

५) अधिकारिलक्षणम् आलोचयत। अथवा सूक्ष्मशरीरविषये विस्तरेण टिप्पणीं रचयत।

--)(O)(--

# प्रश्नपत्रप्रतिमाया उत्तरमाला

[A] दशानां युक्तः विकल्पः। १ x १०=१०

१-क), २-ख), ३-क), ४-क), ५-ग), ६-क), ७-क), ८-ख), ९-ख), १०-ग))

[B] दशानां यथानिर्देशम् उत्तराणि। २ x १०=२०

१) ब्रह्मसूत्रे चत्वारः अध्ययाः। ते हि - समन्वयाध्यायः, अविरोधाध्यायः, साधनाध्यायः, फलाध्यायश्चेति। १+१=२

२) व्यष्टिसूक्ष्मशरीराभिमानी जीवः तैजसः। समष्टिसूक्ष्मशरीराभिमानी जीवः हिरण्यगर्भः। १+१=२

३) चार्वाकाणाम् अपरं नाम लोकायतिकाः इति। प्रथमतीर्थङ्करः ऋषभदेवः। १+१=२

४) चार्वाकमते चत्वारि तत्त्वानि। जैनदर्शनमते द्वे प्रमाणे। १+१=२

५) अर्थापत्तिः दृष्टार्थापत्तिः, श्रुतार्थापत्तिः इति भेदेन द्वेधा। उपपाद्यज्ञानेन उपपादककल्पनम् अर्थापत्तिः इति वेदान्तपरिभाषाकारः। १+१=२

६) नास्ति द्वैतं यत्र तद् अद्वैतम्, द्वैतनिषेधः इत्यर्थः। अद्वैते जगत् शुक्तिरजतवत् प्रातिभासिकं मिथ्या। १+१=२

७) सांख्यकारिकायाम् सत्कार्यमुपपादयितुम् पञ्च युक्तयः उपन्यस्ताः। ता हि - असदकरणात् उपदानग्रहणात् सर्वसम्भवाभावात् शक्तस्य शक्यकरणात् कारणभावाच्च। १+१=२

८) ब्रह्मणः सगुणत्वप्रतिपादिनी श्रुतिः - (श्वेताश्वतरोपनिषद्) “त्वं स्त्री त्वं पुमानसि, त्वं कुमार उत वा कुमारी। त्वं जीर्णो दण्डेन वञ्चसि, त्वं जातो भवसि विश्वतोमुखः”[४/३] इति। स्मृतिः - (श्रीमद्भगवद्गीता) “सर्वतः पाणिपादं तत् सर्वतोऽक्षिशिरोमुखम्। सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति”[१३/१३] इति। १+१=२

९) सदसद्भ्याम् अनिर्वचनीयम् त्रिगुणात्मकं ज्ञानविरोधि भावरूपं यत्किञ्चिदिति। तत् जगतः उपादानकारणम्। १+१=२

१०) पुराणन्यायमीमांसाधर्मशास्त्राणि शिक्षाकल्पव्याकरणनिरुक्तछन्दोज्योतिषाणि षडङ्गानि इति दश विद्यास्थानानि।१+१=२

[C] दश अनतिदीर्घोत्तरैः समाधत्त। ४ x १०=४०

१) पाठः- ६ / ३ द्रष्टव्यः

२) पाठः- ७ द्रष्टव्यः

३) पाठः-१ ४ /१२ द्रष्टव्यः

४) पाठः-१ ५ /१३ द्रष्टव्यः

५) पाठः-१ ६ /१४ द्रष्टव्यः

६) पाठः-१ ९ /१७ द्रष्टव्यः

७) पाठः-१ ८ /१६ द्रष्टव्यः

८) पाठः-१ ९ /१६ द्रष्टव्यः

९) पाठः-१ ८ /१५ द्रष्टव्यः

१०) पाठः-१ ७ / २० द्रष्टव्यः

[D] पञ्च दीर्घोत्तरैः समाधेयाः। ६ x ५=३०

१) पाठः- ६ / ४ द्रष्टव्यः

२) पाठः-१ २ /१० द्रष्टव्यः

३) पाठः-१ ५ /१४ द्रष्टव्यः

४) पाठः-१ ९ /१७ द्रष्टव्यः

५) पाठः-१ ७ / २० द्रष्टव्यः

--)(O)(--